श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमद्वाल्मीकीयरामायणस्य

॥ किष्किन्धाकाण्डम् ॥

This document has been prepared by

Sunder Kidāmbi

with the blessings of

श्री रङ्गरामानुज महादेशिकन्

His Holiness śrīmad āṇḍavan śrīraṅgam

विषयसूची

1	प्रथमः सर्गः	5
2	द्वितीयः सर्गः	18
3	तृतीयः सर्गः	22
4	चतुर्थः सर्गः	27
5	पञ्चमः सर्गः	31
6	षष्ठः सर्गः	35
7	सप्तमः सर्गः	38
8	अष्टमः सर्गः	41
9	नवमः सर्गः	46
10	दशमः सर्गः	49
11	एकादशः सर्गः	53
12	द्वादशः सर्गः	63
13	त्रयोदशः सर्गः	68
14	चतुर्दशः सर्गः	72
15	पञ्चदशः सर्गः	75
16	षोडशः सर्गः	79
17	सप्तदशः सर्गः	84
18	अष्टादशः सर्गः	90
19	एकोनविंशः सर्गः	97

20	**विंशः सर्गः**	**100**
21	**एकविंशः सर्गः**	**103**
22	**द्वाविंशः सर्गः**	**105**
23	**त्रयोविंशः सर्गः**	**109**
24	**चतुर्विंशः सर्गः**	**113**
25	**पञ्चविंशः सर्गः**	**121**
26	**षड्विंशः सर्गः**	**127**
27	**सप्तविंशः सर्गः**	**132**
28	**अष्टाविंशः सर्गः**	**137**
29	**एकोनत्रिंशः सर्गः**	**147**
30	**त्रिंशः सर्गः**	**151**
31	**एकत्रिंशः सर्गः**	**163**
32	**द्वात्रिंशः सर्गः**	**169**
33	**त्रयस्त्रिंशः सर्गः**	**172**
34	**चतुस्त्रिंशः सर्गः**	**180**
35	**पञ्चत्रिंशः सर्गः**	**183**
36	**षट्त्रिंशः सर्गः**	**186**
37	**सप्तत्रिंशः सर्गः**	**189**
38	**अष्टात्रिंशः सर्गः**	**193**
39	**एकोनचत्वारिंशः सर्गः**	**197**

40 चत्वारिंशः सर्गः 202
41 एकचत्वारिंशः सर्गः 209
42 द्विचत्वारिंशः सर्गः 215
43 त्रिचत्वारिंशः सर्गः 221
44 चतुश्चत्वारिंशः सर्गः 228
45 पञ्चचत्वारिंशः सर्गः 231
46 षट्चत्वारिंशः सर्गः 233
47 सप्तचत्वारिंशः सर्गः 236
48 अष्टचत्वारिंशः सर्गः 238
49 एकोनपञ्चाशः सर्गः 241
50 पञ्चाशः सर्गः 244
51 एकपञ्चाशः सर्गः 249
52 द्विपञ्चाशः सर्गः 252
53 त्रिपञ्चाशः सर्गः 256
54 चतुःपञ्चाशः सर्गः 260
55 पञ्चपञ्चाशः सर्गः 263
56 षट्पञ्चाशः सर्गः 266
57 सप्तपञ्चाशः सर्गः 269
58 अष्टपञ्चाशः सर्गः 272
59 एकोनषष्टितमः सर्गः 276

60 षष्टितमः सर्गः 280
61 एकषष्टितमः सर्गः 283
62 द्विषष्टितमः सर्गः 285
63 त्रिषष्टितमः सर्गः 287
64 चतुःषष्टितमः सर्गः 289
65 पञ्चषष्टितमः सर्गः 292
66 षट्षष्टितमः सर्गः 296
67 सप्तषष्टितमः सर्गः 300

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ प्रथमः सर्गः ॥

पम्पाया दर्शनेन श्रीरामस्य व्याकुलत्वं श्रीरामेण लक्ष्मणं प्रति पम्पाशोभायास्तत्रत्योद्दीपनसामग्र्याश्च वर्णनं लक्ष्मणेन श्रीरामस्य प्रबोधनमृष्यमूकं गच्छन्तौ तौ द्वौ भ्रातरौ वीक्ष्य सुग्रीवस्यान्येषां च वानराणां भयम्

स तां पुष्करिणीं गत्वा पद्मोत्पलझषाकुलाम्।
रामः सौमित्रिसहितो विललापाकुलेन्द्रियः॥ **4.1.1** ॥ 1

तत्र दृष्ट्वैव तां हर्षादिन्द्रियाणि चकम्पिरे।
स कामवशमापन्नः सौमित्रिमिदमब्रवीत्॥ **4.1.2** ॥ 2

सौमित्रे शोभते पम्पा वैदूर्यविमलोदका।
फुल्लपद्मोत्पलवती शोभिता विविधैर्द्रुमैः॥ **4.1.3** ॥ 3

सौमित्रे पश्य पम्पायाः काननं शुभदर्शनम्।
यत्र राजन्ति शैला वा द्रुमाः सशिखरा इव॥ **4.1.4** ॥ 4

मां तु शोकाभिसन्तप्तमाधयः पीडयन्ति वै।
भरतस्य च दुःखेन वैदेह्या हरणेन च॥ **4.1.5** ॥ 5

शोकार्तस्यापि मे पम्पा शोभते चित्रकानना।
व्यवकीर्णा बहुविधैः पुष्पैः शीतोदका शिवा॥ **4.1.6** ॥ 6

नलिनैरपि सञ्छन्ना ह्यत्यर्थशुभदर्शना।
सर्पव्यालानुचरिता मृगद्विजसमाकुला॥ **4.1.7**॥ 7

अधिकं प्रविभात्येतन्नीलपीतं तु शाद्वलम्।
द्रुमाणां विविधैः पुष्पैः परिस्तोमैरिवार्पितम्॥ **4.1.8**॥ 8

पुष्पभारसमृद्धानि शिखराणि समन्ततः।
लताभिः पुष्पिताग्राभिरुपगूढानि सर्वतः॥ **4.1.9**॥ 9

सुखानिलोऽयं सौमित्रे कालः प्रचुरमन्मथः।
गन्धवान् सुरभिर्मासो जातपुष्पफलद्रुमः॥ **4.1.10**॥ 10

पश्य रूपाणि सौमित्रे वनानां पुष्पशालिनाम्।
सृजतां पुष्पवर्षाणि वर्षं तोयमुचामिव॥ **4.1.11**॥ 11

प्रस्तरेषु च रम्येषु विविधाः काननद्रुमाः।
वायुवेगप्रचलिताः पुष्पैरवकिरन्ति गाम्॥ **4.1.12**॥ 12

पतितैः पतमानैश्च पादपस्थैश्च मारुतः।
कुसुमैः पश्य सौमित्रे क्रीडतीव समन्ततः॥ **4.1.13**॥ 13

विक्षिपन् विविधाः शाखा नगानां कुसुमोत्कटाः।
मारुतश्चलितस्थानैः षट्पदैरनुगीयते॥ **4.1.14**॥ 14

मत्तकोकिलसन्नादैर्नर्तयन्निव पादपान्।
शैलकन्दरनिष्क्रान्तः प्रगीत इव चानिलः॥ **4.1.15**॥ 15

तेन विक्षिपतात्यर्थं पवनेन समन्ततः।
अमी संसक्तशाखाग्रा ग्रथिता इव पादपाः॥ **4.1.16**॥ 16

स एव सुखसंस्पर्शो वाति चन्दनशीतलः।
गन्धमभ्यवहन् पुण्यं श्रमापनयनोऽनिलः॥ **4.1.17**॥ 17

अमी पवनविक्षिप्ता विनदन्तीव पादपाः।
षट्पदैरनुकूजद्भिर्वनेषु मधुगन्धिषु॥ **4.1.18**॥ 18

गिरिप्रस्थेषु रम्येषु पुष्पवद्भिर्मनोरमैः।
संसक्तशिखराः शैला विराजन्ति महाद्रुमैः॥ **4.1.19**॥ 19

पुष्पसञ्छन्नशिखरा मारुतोत्क्षेपचञ्चलाः।
अमी मधुकरोत्तंसाः प्रगीता इव पादपाः॥ **4.1.20**॥ 20

सुपुष्पितांस्तु पश्यैतान् कर्णिकारान् समन्ततः।
हाटकप्रतिसञ्छन्नान् नरान् पीताम्बरानिव॥ **4.1.21**॥ 21

अयं वसन्तः सौमित्रे नानाविहगनादितः।
सीतया विप्रहीणस्य शोकसन्दीपनो मम॥ **4.1.22**॥ 22

मां हि शोकसमाक्रान्तं सन्तापयति मन्मथः।
हृष्टं प्रवदमानश्च समाह्वयति कोकिलः॥ **4.1.23**॥ 23

एष दात्यूहको हृष्टो रम्ये मां वननिर्झरे।
प्रणदन्मन्मथाविष्टं शोचयिष्यति लक्ष्मण॥ **4.1.24**॥ 24

श्रुत्वैतस्य पुरा शब्दमाश्रमस्था मम प्रिया।
मामाहूय प्रमुदिताः परमं प्रत्यनन्दत॥ **4.1.25**॥ 25

एवं विचित्राः पतगा नानारावविराविणः।
वृक्षगुल्मलताः पश्य सम्पतन्ति समन्ततः॥ **4.1.26**॥ 26

विमिश्रा विहगाः पुम्भिरात्मव्यूहाभिनन्दिताः।
भृङ्गराजप्रमुदिताः सौमित्रे मधुरस्वराः॥ **4.1.27**॥ 27

अस्याः कूले प्रमुदिताः सङ्घशः शकुनास्त्विह।
दात्यूहरतिविक्रन्दैः पुंस्कोकिलरुतैरपि॥ **4.1.28**॥ 28

स्वनन्ति पादपाश्चेमे ममानङ्गप्रदीपकाः।
अशोकस्तबकाङ्गारः षट्पदस्वननिःस्वनः॥ **4.1.29**॥ 29

मां हि पल्लवताम्रार्चिर्वसन्ताग्निः प्रधक्ष्यति।
नहि तां सूक्ष्मपक्ष्माक्षीं सुकेशीं मृदुभाषिणीम्॥ **4.1.30**॥ 30

अपश्यतो मे सौमित्रे जीवितेऽस्ति प्रयोजनम्।
अयं हि रुचिरस्तस्याः कालो रुचिरकाननः॥ **4.1.31**॥ 31

कोकिलाकुलसीमान्तो दयिताया ममानघ।
मन्मथायाससम्भूतो वसन्तगुणवर्धितः॥ **4.1.32**॥ 32

अयं मां धक्ष्यति क्षिप्रं शोकाग्निर्नचिरादिव।
अपश्यतस्तां वनितां पश्यतो रुचिरान् द्रुमान्॥ **4.1.33**॥ 33

ममायमात्मप्रभवो भूयस्त्वमुपयास्यति।
अदृश्यमाना वैदेही शोकं वर्धयतीह मे॥ **4.1.34**॥ 34

दृश्यमानो वसन्तश्च स्वेदसंसर्गदूषकः।
मां हि सा मृगशावाक्षी चिन्ताशोकबलात्कृतम्॥ **4.1.35**॥ 35

सन्तापयति सौमित्रे क्रूरश्चैत्रवनानिलः।
अमी मयूराः शोभन्ते प्रनृत्यन्तस्ततस्ततः॥ **4.1.36**॥ 36

स्वैः पक्षैः पवनोद्धूतैर्गवाक्षैः स्फाटिकैरिव।
शिखिनीभिः परिवृतास्त एते मदमूर्च्छिताः॥ **4.1.37**॥ 37

मन्मथाभिपरीतस्य मम मन्मथवर्धनाः।
पश्य लक्ष्मण नृत्यन्तं मयूरमुपनृत्यति॥ **4.1.38**॥ 38

शिखिनी मन्मथार्तैषा भर्तारं गिरिसानुनि।
तामेव मनसा रामां मयूरोऽप्यनुधावति॥ **4.1.39**॥ 39

वितत्य रुचिरौ पक्षौ रुतैरुपहसन्निव।
मयूरस्य वने नूनं रक्षसा न हृता प्रिया॥ **4.1.40**॥ 40

तस्मान्नृत्यति रम्येषु वनेषु सह कान्तया।
मम त्वयं विना वासः पुष्पमासे सुदुःसहः॥ **4.1.41**॥ 41

पश्य लक्ष्मण संरागस्तिर्यग्योनिगतेष्वपि।
यदेषा शिखिनी कामाद् भर्तारमभिवर्तते॥ **4.1.42**॥ 42

ममाप्येवं विशालाक्षी जानकी जातसम्भ्रमा।
मदनेनाभिवर्तेत यदि नापहृता भवेत्॥ **4.1.43**॥ 43

पश्य लक्ष्मण पुष्पाणि निष्फलानि भवन्ति मे।
पुष्पभारसमृद्धानां वनानां शिशिरात्यये॥ **4.1.44**॥ 44

रुचिराण्यपि पुष्पाणि पादपानामतिश्रिया।
निष्फलानि महीं यान्ति समं मधुकरोत्करैः॥ **4.1.45**॥ 45

नदन्ति कामं शकुना मुदिताः सङ्घशः कलम्।
आह्वयन्त इवान्योन्यं कामोन्मादकरा मम॥ **4.1.46**॥ 46

वसन्तो यदि तत्रापि यत्र मे वसति प्रिया।
नूनं परवशा सीता सापि शोचत्यहं यथा॥ **4.1.47**॥ 47

नूनं न तु वसन्तस्तं देशं स्पृशति यत्र सा।
कथं ह्यसितपद्माक्षी वर्तयेत् सा मया विना॥ **4.1.48**॥ 48

अथवा वर्तते तत्र वसन्तो यत्र मे प्रिया।
किं करिष्यति सुश्रोणी सा तु निर्भर्त्सिता परैः॥ **4.1.49**॥ 49

श्यामा पद्मपलाशाक्षी मृदुभाषा च मे प्रिया।
नूनं वसन्तमासाद्य परित्यक्ष्यति जीवितम्॥ **4.1.50**॥ 50

दृढं हि हृदये बुद्धिर्मम सम्परिवर्तते।
नालं वर्तयितुं सीता साध्वी मद्विरहं गता॥ **4.1.51**॥ 51

मयि भावो हि वैदेह्यास्तत्त्वतो विनिवेशितः।
ममापि भावः सीतायां सर्वथा विनिवेशितः॥ **4.1.52**॥ 52

एष पुष्पवहो वायुः सुखस्पर्शो हिमावहः।
तां विचिन्तयतः कान्तां पावकप्रतिमो मम॥ **4.1.53**॥ 53

सदा सुखमहं मन्ये यं पुरा सह सीतया।
मारुतः स विना सीतां शोकसङ्जननो मम॥ **4.1.54**॥ 54

तां विनाथ विहङ्गोऽसौ पक्षी प्रणदितस्तदा।
वायसः पादपगतः प्रहृष्टमभिकूजति॥ **4.1.55**॥ 55

एष वै तत्र वैदेह्या विहगः प्रतिहारकः।
पक्षी मां तु विशालाक्ष्याः समीपमुपनेष्यति॥ **4.1.56**॥ 56

पश्य लक्ष्मण सन्नादं वने मदविवर्धनम्।
पुष्पिताग्रेषु वृक्षेषु द्विजानामवकूजताम्॥ **4.1.57**॥ 57

विक्षिप्तां पवनेनैतामसौ तिलकमञ्जरीम्।
षट्पदः सहसाभ्येति मदोद्धूतामिव प्रियाम्॥ **4.1.58**॥ 58

कामिनामयमत्यन्तमशोकः शोकवर्धनः।
स्तबकैः पवनोत्क्षिप्तैस्तर्जयन्निव मां स्थितः॥ **4.1.59**॥ 59

अमी लक्ष्मण दृश्यन्ते चूताः कुसुमशालिनः।
विभ्रमोत्सिक्तमनसः साङ्गरागा नरा इव॥ **4.1.60**॥ 60

सौमित्रे पश्य पम्पायाश्चित्रासु वनराजिषु।
किन्नरा नरशार्दूल विचरन्ति यतस्ततः॥ **4.1.61**॥ 61

इमानि शुभगन्धीनि पश्य लक्ष्मण सर्वशः।
नलिनानि प्रकाशन्ते जले तरुणसूर्यवत्॥ **4.1.62**॥ 62

एषा प्रसन्नसलिला पद्मनीलोत्पलायुता।
हंसकारण्डवाकीर्णा पम्पा सौगन्धिकायुता॥ **4.1.63**॥ 63

जले तरुणसूर्याभैः षड्दाहतकेसरैः।
पङ्कजैः शोभते पम्पा समन्तादभिसंवृता॥ **4.1.64**॥ 64

चक्रवाकयुता नित्यं चित्रप्रस्थवनान्तरा।
मातङ्गमृगयूथैश्च शोभते सलिलार्थिभिः॥ **4.1.65**॥ 65

पवनाहतवेगाभिरूर्मिभिर्विमलेऽम्भसि।
पङ्कजानि विराजन्ते ताड्यमानानि लक्ष्मण॥ **4.1.66**॥ 66

पद्मपत्रविशालाक्षीं सततं प्रियपङ्कजाम्।
अपश्यतो मे वैदेहीं जीवितं नाभिरोचते॥ **4.1.67**॥ 67

अहो कामस्य वामत्वं यो गतामपि दुर्लभाम्।
स्मारयिष्यति कल्याणीं कल्याणतरवादिनीम्॥ **4.1.68**॥ 68

शक्यो धारयितुं कामो भवेदभ्यागतो मया।
यदि भूयो वसन्तो मां न हन्यात् पुष्पितद्रुमः॥ **4.1.69**॥ 69

यानि स्म रमणीयानि तया सह भवन्ति मे।
तान्येवारमणीयानि जायन्ते मे तया विना॥ **4.1.70**॥ 70

पद्मकोशपलाशानि द्रष्टुं दृष्टिर्हि मन्यते।
सीताया नेत्रकोशाभ्यां सदृशानीति लक्ष्मण॥ **4.1.71**॥ 71

पद्मकेसरसंसृष्टो वृक्षान्तरविनिःसृतः।
निःश्वास इव सीताया वाति वायुर्मनोहरः॥ **4.1.72**॥ 72

सौमित्रे पश्य पम्पाया दक्षिणे गिरिसानुषु।
पुष्पितां कर्णिकारस्य यष्टिं परमशोभिताम्॥ **4.1.73**॥ 73

अधिकं शैलराजोऽयं धातुभिस्तु विभूषितः।
विचित्रं सृजते रेणुं वायुवेगविघट्टितम्॥ **4.1.74**॥ 74

गिरिप्रस्थास्तु सौमित्रे सर्वतः सम्प्रपुष्पितैः।
निष्पत्रैः सर्वतो रम्यैः प्रदीप्ता इव किंशुकैः॥ **4.1.75**॥ 75

पम्पातीररुहाश्चेमे संसिक्ता मधुगन्धिनः।
मालतीमल्लिकापद्मकरवीराश्च पुष्पिताः॥ **4.1.76**॥ 76

केतक्यः सिन्दुवाराश्च वासन्त्यश्च सुपुष्पिताः।
माधव्यो गन्धपूर्णाश्च कुन्दगुल्माश्च सर्वशः॥ **4.1.77**॥ 77

चिरिबिल्वा मधूकाश्च वञ्जुला बकुलास्तथा।
चम्पकास्तिलकाश्चैव नागवृक्षाश्च पुष्पिताः॥ **4.1.78**॥ 78

पद्मकाश्चैव शोभन्ते नीलाशोकाश्च पुष्पिताः।
लोध्राश्च गिरिपृष्ठेषु सिंहकेसरपिञ्जराः॥ **4.1.79**॥ 79

अङ्कोलाश्च कुरण्टाश्च चूर्णकाः पारिभद्रकाः।
चूताः पाटलयश्चापि कोविदाराश्च पुष्पिताः॥ **4.1.80**॥ 80

मुचुकुन्दार्जुनाश्चैव दृश्यन्ते गिरिसानुषु।
केतकोद्दालकाश्चैव शिरीषाः शिंशपा धवाः॥ **4.1.81**॥ 81

शाल्मल्यः किंशुकाश्चैव रक्ताः कुरवकास्तथा।
तिनिशा नक्तमालाश्च चन्दनाः स्यन्दनास्तथा॥ **4.1.82**॥ 82

हिन्तालास्तिलकाश्चैव नागवृक्षाश्च पुष्पिताः।
पुष्पितान् पुष्पिताग्राभिर्लताभिः परिवेष्टितान्॥ **4.1.83**॥ 83

द्रुमान् पश्येह सौमित्रे पम्पाया रुचिरान् बहून्।
वातविक्षिप्तविटपान् यथासन्नान् द्रुमानिमान्॥ **4.1.84**॥ 84

लताः समनुवर्तन्ते मत्ता इव वरस्त्रियः।
पादपात् पादपं गच्छञ्शैलाच्छैलं वनाद् वनम्॥ **4.1.85**॥ 85

वाति नैकरसास्वादसम्मोदित इवानिलः।
केचित् पर्याप्तकुसुमाः पादपा मधुगन्धिनः॥ **4.1.86**॥ 86

केचिन्मुकुलसंवीताः श्यामवर्णा इवाबभुः।
इदं मृष्टमिदं स्वादु प्रफुल्लमिदमित्यपि॥ **4.1.87**॥ 87

रागरक्तो मधुकरः कुसुमेष्वेव लीयते।
निलीय पुनरुत्पत्य सहसान्यत्र गच्छति।
मधुलुब्धो मधुकरः पम्पातीरद्रुमेष्वसौ॥ **4.1.88**॥ 88

इयं कुसुमसङ्घातैरुपस्तीर्णा सुखाकृता।
स्वयं निपतितैर्भूमिः शयनप्रस्तरैरिव॥ **4.1.89**॥ 89

विविधा विविधैः पुष्पैस्तैरेव नगसानुषु।
विस्तीर्णाः पीतरक्ताभाः सौमित्रे प्रस्तराः कृताः॥ **4.1.90**॥ 90

हिमान्ते पश्य सौमित्रे वृक्षाणां पुष्पसम्भवम्।
पुष्पमासे हि तरवः सङ्घर्षादिव पुष्पिताः॥ **4.1.91**॥ 91

आह्वयन्त इवान्योन्यं नगाः षट्पदनादिताः।
कुसुमोत्तंसविटपाः शोभन्ते बहु लक्ष्मण॥ **4.1.92**॥ 92

एष कारण्डवः पक्षी विगाह्य सलिलं शुभम्।
रमते कान्तया सार्धं काममुद्दीपयन्निव॥ **4.1.93**॥ 93

मन्दाकिन्यास्तु यदिदं रूपमेतन्मनोरमम्।
स्थाने जगति विख्याता गुणास्तस्या मनोरमाः॥ **4.1.94**॥ 94

यदि दृश्येत सा साध्वी यदि चेह वसेमहि।
स्पृहयेयं न शक्राय नायोध्यायै रघूत्तम॥ **4.1.95**॥ 95

न ह्येवं रमणीयेषु शाद्वलेषु तया सह।
रमतो मे भवेच्चिन्ता न स्पृहान्येषु वा भवेत्॥ **4.1.96**॥ 96

अमी हि विविधैः पुष्पैस्तरवो विविधच्छदाः।
काननेऽस्मिन् विना कान्तां चिन्तामुत्पादयन्ति मे॥ **4.1.97**॥ 97

पश्य शीतजलां चेमां सौमित्रे पुष्करायुताम्।
चक्रवाकानुचरितां कारण्डवनिषेविताम्॥ **4.1.98**॥ 98

प्लवैः क्रौञ्चैश्च सम्पूर्णां महामृगनिषेविताम्।
अधिकं शोभते पम्पा विकूजद्भिर्विहङ्गमैः॥ **4.1.99**॥ 99

दीपयन्तीव मे कामं विविधा मुदिता द्विजाः।
श्यामां चन्द्रमुखीं स्मृत्वा प्रियां पद्मनिभेक्षणाम्॥ **4.1.100**॥ 100

पश्य सानुषु चित्रेषु मृगीभिः सहितान् मृगान्।
मां पुनर्मृगशावाक्ष्या वैदेह्या विरहीकृतम्।
व्यथयन्तीव मे चित्तं सञ्चरन्तस्ततस्ततः॥ **4.1.101**॥ 101

अस्मिन् सानुनि रम्ये हि मत्तद्विजगणाकुले।
पश्येयं यदि तां कान्तां ततः स्वस्ति भवेन्मम॥ **4.1.102**॥ 102

जीवेयं खलु सौमित्रे मया सह सुमध्यमा।
सेवेत यदि वैदेही पम्पायाः पवनं शुभम्॥ **4.1.103**॥ 103

पद्मसौगन्धिकवहं शिवं शोकविनाशनम्।
धन्या लक्ष्मण सेवन्ते पम्पाया वनमारुतम्॥ **4.1.104**॥ 104

श्यामा पद्मपलाशाक्षी प्रिया विरहिता मया।
कथं धारयति प्राणान् विवशा जनकात्मजा॥ **4.1.105**॥ 105

किं नु वक्ष्यामि धर्मज्ञं राजानं सत्यवादिनम्।
जनकं पृष्टसीतं तं कुशलं जनसंसदि॥ **4.1.106**॥ 106

या मामनुगता मन्दं पित्रा प्रस्थापितं वनम्।
सीता धर्मं समास्थाय क्व नु सा वर्तते प्रिया॥ **4.1.107**॥ 107

तया विहीनः कृपणः कथं लक्ष्मण धारये।
या मामनुगता राज्याद् भ्रष्टं विहतचेतसम्॥ **4.1.108**॥ 108

तच्चार्वञ्चितपद्माक्षं सुगन्धि शुभमव्रणम्।
अपश्यतो मुखं तस्याः सीदतीव मतिर्मम॥ **4.1.109**॥ 109

स्मितहास्यान्तरयुतं गुणवन्मधुरं हितम्।
वैदेह्या वाक्यमतुलं कदा श्रोष्यामि लक्ष्मण॥ **4.1.110**॥ 110

प्राप्य दुःखं वने श्यामा मां मन्मथविकर्शितम्।
नष्टदुःखेव हृष्टेव साध्वी साध्वभ्यभाषत॥ **4.1.111**॥ 111

किं नु वक्ष्याम्ययोध्यायां कौसल्यां हि नृपात्मज।
क्व सा स्नुषेति पृच्छन्तीं कथं चापि मनस्विनीम्॥ **4.1.112**॥ 112

गच्छ लक्ष्मण पश्य त्वं भरतं भ्रातृवत्सलम्।
नह्यहं जीवितुं शक्तस्तामृते जनकात्मजाम्॥ **4.1.113**॥ 113

इति रामं महात्मानं विलपन्तमनाथवत्।
उवाच लक्ष्मणो भ्राता वचनं युक्तमव्ययम्॥ **4.1.114**॥ 114

संस्तम्भ राम भद्रं ते मा शुचः पुरुषोत्तम।
नेदृशानां मतिर्मन्दा भवत्यकलुषात्मनाम्॥ **4.1.115**॥ 115

स्मृत्वा वियोगजं दुःखं त्यज स्नेहं प्रिये जने।
अतिस्नेहपरिष्वङ्गाद् वर्तिरार्द्रापि दह्यते॥ **4.1.116**॥ 116

यदि गच्छति पातालं ततोऽभ्यधिकमेव वा।
सर्वथा रावणस्तात न भविष्यति राघव॥ **4.1.117**॥ 117

प्रवृत्तिर्लभ्यतां तावत् तस्य पापस्य रक्षसः।
ततो हास्यति वा सीतां निधनं वा गमिष्यति॥ **4.1.118**॥ 118

यदि याति दितेर्गर्भं रावणं सह सीतया।
तत्राप्येनं हनिष्यामि न चेद् दास्यति मैथिलीम्॥ **4.1.119**॥ 119

स्वास्थ्यं भद्रं भजस्वार्य त्यज्यतां कृपणा मतिः।
अर्थो हि नष्टकार्यार्थैरयत्नेनाधिगम्यते॥ **4.1.120**॥ 120

उत्साहो बलवानार्य नास्त्युत्साहात् परं बलम्।
सोत्साहस्य हि लोकेषु न किञ्चिदपि दुर्लभम्॥ **4.1.121**॥ 121

उत्साहवन्तः पुरुषा नावसीदन्ति कर्मसु।
उत्साहमात्रमाश्रित्य प्रतिलप्स्याम जानकीम्॥ **4.1.122**॥ 122

त्यजतां कामवृत्तत्वं शोकं सन्न्यस्य पृष्ठतः।
महात्मानं कृतात्मानमात्मानं नावबुध्यसे॥ **4.1.123**॥ 123

एवं सम्बोधितस्तेन शोकोपहतचेतनः।
त्यज्य शोकं च मोहं च रामो धैर्यमुपागमत्॥ **4.1.124**॥ 124

सोऽभ्यतिक्रामदव्यग्रस्तामचिन्त्यपराक्रमः।
रामः पम्पां सुरुचिरां रम्यां पारिप्लवद्रुमाम्॥ **4.1.125**॥ 125

निरीक्षमाणः सहसा महात्मा
सर्वं वनं निर्झरकन्दरं च।
उद्विग्नचेताः सह लक्ष्मणेन
विचार्य दुःखोपहतः प्रतस्थे॥ **4.1.126**॥ 126

तं मत्तमातङ्गविलासगामी
गच्छन्तमव्यग्रमना महात्मा।
स लक्ष्मणो राघवमिष्टचेष्टो
ररक्ष धर्मेण बलेन चैव॥ **4.1.127**॥ 127

तावृष्यमूकस्य समीपचारी
चरन् ददर्शाद्भुतदर्शनीयौ।
शाखामृगाणामधिपस्तरस्वी
वितत्रसे नैव विचेष्ट चेष्टाम्॥ **4.1.128**॥ 128

स तौ महात्मा गजमन्दगामी
शाखामृगस्तत्र चरंश्चरन्तौ।
दृष्ट्वा विषादं परमं जगाम
चिन्तापरीतो भयभारभग्नः॥ **4.1.129**॥ 129

तमाश्रमं पुण्यसुखं शरण्यं
सदैव शाखामृगसेवितान्तम्।
त्रस्ताश्च दृष्ट्वा हरयोऽभिजग्मु -
र्महौजसौ राघवलक्ष्मणौ तौ॥ **4.1.130**॥ 130

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
किष्किन्धाकाण्डे प्रथमः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ द्वितीयः सर्गः ॥

सुग्रीवस्य वानराणां चाशङ्का हनुमता तस्या निवारणं सुग्रीवेण श्रीरामलक्ष्मणयोर्भावं समीक्षितुं हनुमतस्तत्सविधे प्रेषणम्

तौ तु दृष्ट्वा महात्मानौ भ्रातरौ रामलक्ष्मणौ।
वरायुधधरौ वीरौ सुग्रीवः शङ्कितोऽभवत्॥ **4.2.1** ॥ 131

उद्विग्नहृदयः सर्वा दिशः समवलोकयन्।
न व्यतिष्ठत कस्मिंश्चिद् देशे वानरपुङ्गवः॥ **4.2.2** ॥ 132

नैव चक्रे मनः स्थातुं वीक्षमाणौ महाबलौ।
कपेः परमभीतस्य चित्तं व्यवससाद ह॥ **4.2.3** ॥ 133

चिन्तयित्वा स धर्मात्मा विमृश्य गुरुलाघवम्।
सुग्रीवः परमोद्विग्नः सर्वैस्तैर्वानरैः सह॥ **4.2.4** ॥ 134

ततः स सचिवेभ्यस्तु सुग्रीवः प्लवगाधिपः।
शशंस परमोद्विग्नः पश्यंस्तौ रामलक्ष्मणौ॥ **4.2.5** ॥ 135

एतौ वनमिदं दुर्गं वालिप्रणिहितौ ध्रुवम्।
छद्मना चीरवसनौ प्रचरन्ताविहागतौ॥ **4.2.6** ॥ 136

ततः सुग्रीवसचिवा दृष्ट्वा परमधन्विनौ।
जग्मुर्गिरितटात् तस्मादन्यच्छिखरमुत्तमम्॥ **4.2.7** ॥ 137

ते क्षिप्रमभिगम्याथ यूथपा यूथपर्षभम्।
हरयो वानरश्रेष्ठं परिवार्योपतस्थिरे॥ **4.2.8**॥ 138

एवमेकायनगताः प्लवमाना गिरेर्गिरिम्।
प्रकम्पयन्तो वेगेन गिरीणां शिखराणि च॥ **4.2.9**॥ 139

ततः शाखामृगाः सर्वे प्लवमाना महाबलाः।
बभञ्जुश्च नगांस्तत्र पुष्पितान् दुर्गमाश्रितान्॥ **4.2.10**॥ 140

आप्लवन्तो हरिवराः सर्वतस्तं महागिरिम्।
मृगमार्जारशार्दूलांस्त्रासयन्तो ययुस्तदा॥ **4.2.11**॥ 141

ततः सुग्रीवसचिवाः पर्वतेन्द्रे समाहिताः।
सङ्गम्य कपिमुख्येन सर्वे प्राञ्जलयः स्थिताः॥ **4.2.12**॥ 142

ततस्तु भयसन्त्रस्तं वालिकिल्बिषशङ्कितम्।
उवाच हनुमान् वाक्यं सुग्रीवं वाक्यकोविदः॥ **4.2.13**॥ 143

सभ्भ्रमस्त्यज्यतामेष सर्वैर्वालिकृते महान्।
मलयोऽयं गिरिवरो भयं नेहास्ति वालिनः॥ **4.2.14**॥ 144

यस्मादुद्विग्नचेतास्त्वं विद्रुतो हरिपुङ्गव।
तं क्रूरदर्शनं क्रूरं नेह पश्यामि वालिनम्॥ **4.2.15**॥ 145

यस्मात् तव भयं सौम्य पूर्वजात् पापकर्मणः।
स नेह वाली दुष्टात्मा न ते पश्याम्यहं भयम्॥ **4.2.16**॥ 146

अहो शाखामृगत्वं ते व्यक्तमेव प्लवङ्गम।
लघुचित्ततयाऽऽत्मानं न स्थापयसि यो मतौ॥ **4.2.17**॥ 147

बुद्धिविज्ञानसम्पन्न इङ्गितैः सर्वमाचर।
नह्यबुद्धिं गतो राजा सर्वभूतानि शास्ति हि॥ **4.2.18**॥ 148

सुग्रीवस्तु शुभं वाक्यं श्रुत्वा सर्वं हनूमतः।
ततः शुभतरं वाक्यं हनूमन्तमुवाच ह॥ **4.2.19**॥ 149

दीर्घबाहू विशालाक्षौ शरचापासिधारिणौ।
कस्य न स्याद् भयं दृष्ट्वा ह्येतौ सुरसुतोपमौ॥ **4.2.20**॥ 150

वालिप्रणिहितावेव शङ्केऽहं पुरुषोत्तमौ।
राजानो बहुमित्राश्च विश्वासो नात्र हि क्षमः॥ **4.2.21**॥ 151

अरयश्च मनुष्येण विज्ञेयाश्छद्मचारिणः।
विश्वस्तानामविश्वस्ताश्छिद्रेषु प्रहरन्त्यपि॥ **4.2.22**॥ 152

कृत्येषु वाली मेधावी राजानो बहुदर्शिनः।
भवन्ति परहन्तारस्ते ज्ञेयाः प्राकृतैर्नरैः॥ **4.2.23**॥ 153

तौ त्वया प्राकृतेनेव गत्वा ज्ञेयौ प्लवङ्गम।
इङ्गितानां प्रकारैश्च रूपव्याभाषणेन च॥ **4.2.24**॥ 154

लक्षयस्व तयोर्भावं प्रहृष्टमनसौ यदि।
विश्वासयन् प्रशंसाभिरिङ्गितैश्च पुनः पुनः॥ **4.2.25**॥ 155

ममैवाभिमुखं स्थित्वा पृच्छ त्वं हरिपुङ्गव।
प्रयोजनं प्रवेशस्य वनस्यास्य धनुर्धरौ॥ **4.2.26**॥ 156

शुद्धात्मानौ यदि त्वेतौ जानीहि त्वं प्लवङ्गम।
व्याभाषितैर्वा रूपैर्वा विज्ञेया दुष्टतानयोः॥ **4.2.27**॥ 157

इत्येवं कपिराजेन सन्दिष्टो मारुतात्मजः।
चकार गमने बुद्धिं यत्र तौ रामलक्ष्मणौ॥ **4.2.28**॥ 158

तथेति सम्पूज्य वचस्तु तस्य तत् -
कपेः सुभीतस्य दुरासदस्य च।

महानुभावो हनुमान् ययौ तदा
स यत्र रामोऽतिबलश्च लक्ष्मणः ॥ 4.2.29 ॥ 159

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
किष्किन्धाकाण्डे द्वितीयः सर्गः ॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ तृतीयः सर्गः ॥

हनुमता श्रीरामलक्ष्मणयोर्वने आगमनस्य किं कारणमिति जिज्ञासाकरणमात्मनः सुग्रीवस्य च परिचयदानं श्रीरामेण तद्वचनानां प्रशंसनं कृत्वा लक्ष्मणस्य स्वपक्षतो वार्ताकरणे नियोजनं लक्ष्मणेन स्वीयेऽभ्यर्थने स्वीकृते हनुमतो हर्षश्च

वचो विज्ञाय हनुमान् सुग्रीवस्य महात्मनः।
पर्वतादृष्यमूकात् तु पुप्लुवे यत्र राघवौ ॥ **4.3.1** ॥ 160

कपिरूपं परित्यज्य हनुमान् मारुतात्मजः।
भिक्षुरूपं ततो भेजे शठबुद्धितया कपिः ॥ **4.3.2** ॥ 161

ततश्च हनुमान् वाचा श्लक्ष्णया सुमनोज्ञया।
विनीतवदुपागम्य राघवौ प्रणिपत्य च ॥ **4.3.3** ॥ 162

आबभाषे च तौ वीरौ यथावत् प्रशशंस च।
सम्पूज्य विधिवद् वीरौ हनुमान् वानरोत्तमः ॥ **4.3.4** ॥ 163

उवाच कामतो वाक्यं मृदु सत्यपराक्रमौ।
राजर्षिदेवप्रतिमौ तापसौ संशितव्रतौ ॥ **4.3.5** ॥ 164

देशं कथमिमं प्राप्तौ भवन्तौ वरवर्णिनौ।
त्रासयन्तौ मृगगणानन्यांश्च वनचारिणः ॥ **4.3.6** ॥ 165

पम्पातीररुहान् वृक्षान् वीक्षमाणौ समन्ततः।
इमां नदीं शुभजलां शोभयन्तौ तरस्विनौ॥ **4.3.7**॥ 166

धैर्यवन्तौ सुवर्णाभौ कौ युवां चीरवाससौ।
निःश्वसन्तौ वरभुजौ पीडयन्ताविमाः प्रजाः॥ **4.3.8**॥ 167

सिंहविप्रेक्षितौ वीरौ महाबलपराक्रमौ।
शक्रचापनिभे चापे गृहीत्वा शत्रुनाशनौ॥ **4.3.9**॥ 168

श्रीमन्तौ रूपसम्पन्नौ वृषभश्रेष्ठविक्रमौ।
हस्तिहस्तोपमभुजौ द्युतिमन्तौ नरर्षभौ॥ **4.3.10**॥ 169

प्रभया पर्वतेन्द्रोऽसौ युवयोरवभासितः।
राज्यार्हावमरप्रख्यौ कथं देशमिहागतौ॥ **4.3.11**॥ 170

पद्मपत्रेक्षणौ वीरौ जटामण्डलधारिणौ।
अन्योन्यसदृशौ वीरौ देवलोकादिहागतौ॥ **4.3.12**॥ 171

यदृच्छयेव सम्प्राप्तौ चन्द्रसूर्यौ वसुन्धराम्।
विशालवक्षसौ वीरौ मानुषौ देवरूपिणौ॥ **4.3.13**॥ 172

सिंहस्कन्धौ महोत्साहौ समदाविव गोवृषौ।
आयताश्च सुवृत्ताश्च बाहवः परिघोपमाः॥ **4.3.14**॥ 173

सर्वभूषणभूषार्हाः किमर्थं न विभूषिताः।
उभौ योग्यावहं मन्ये रक्षितुं पृथिवीमिमाम्॥ **4.3.15**॥ 174

ससागरवनां कृत्स्नां विन्ध्यमेरुविभूषिताम्।
इमे च धनुषी चित्रे श्लक्ष्णे चित्रानुलेपने॥ **4.3.16**॥ 175

प्रकाशेते यथेन्द्रस्य वज्रे हेमविभूषिते।
सम्पूर्णाश्च शितैर्बाणैस्तूणाश्च शुभदर्शनाः॥ **4.3.17**॥ 176

जीवितान्तकरैर्घोरैर्ज्वलद्भिरिव पन्नगैः।
महाप्रमाणौ विपुलौ तप्तहाटकभूषणौ॥ **4.3.18**॥ 177

खड्गावेतौ विराजेते निर्मुक्तभुजगाविव।
एवं मां परिभाषन्तं कस्माद् वै नाभिभाषतः॥ **4.3.19**॥ 178

सुग्रीवो नाम धर्मात्मा कश्चिद् वानरपुङ्गवः।
वीरो विनिकृतो भ्रात्रा जगद्भ्रमति दुःखितः॥ **4.3.20**॥ 179

प्राप्तोऽहं प्रेषितस्तेन सुग्रीवेण महात्मना।
राज्ञा वानरमुख्यानां हनुमान् नाम वानरः॥ **4.3.21**॥ 180

युवाभ्यां स हि धर्मात्मा सुग्रीवः सख्यमिच्छति।
तस्य मां सचिवं वित्तं वानरं पवनात्मजम्॥ **4.3.22**॥ 181

भिक्षुरूपप्रतिच्छन्नं सुग्रीवप्रियकारणात्।
ऋष्यमूकादिह प्राप्तं कामगं कामचारिणम्॥ **4.3.23**॥ 182

एवमुक्त्वा तु हनुमांस्तौ वीरौ रामलक्ष्मणौ।
वाक्यज्ञो वाक्यकुशलः पुनर्नोवाच किञ्चन॥ **4.3.24**॥ 183

एतच्छ्रुत्वा वचस्तस्य रामो लक्ष्मणमब्रवीत्।
प्रहृष्टवदनः श्रीमान् भ्रातरं पार्श्वतः स्थितम्॥ **4.3.25**॥ 184

सचिवोऽयं कपीन्द्रस्य सुग्रीवस्य महात्मनः।
तमेव काङ्क्षमाणस्य ममान्तिकमिहागतः॥ **4.3.26**॥ 185

तमभ्यभाष सौमित्रे सुग्रीवसचिवं कपिम्।
वाक्यज्ञं मधुरैर्वाक्यैः स्नेहयुक्तमरिन्दमम्॥ **4.3.27**॥ 186

नानृग्वेदविनीतस्य नायजुर्वेदधारिणः।
नासामवेदविदुषः शक्यमेवं विभाषितुम्॥ **4.3.28**॥ 187

नूनं व्याकरणं कृत्स्नमनेन बहुधा श्रुतम्।
बहु व्याहरतानेन न किञ्चिदपशब्दितम्॥ **4.3.29**॥ 188

न मुखे नेत्रयोश्चापि ललाटे च भ्रुवोस्तथा।
अन्येष्वपि च सर्वेषु दोषः संविदितः क्वचित्॥ **4.3.30**॥ 189

अविस्तरमसन्दिग्धमविलम्बितमव्यथम्।
उरःस्थं कण्ठगं वाक्यं वर्तते मध्यमस्वरम्॥ **4.3.31**॥ 190

संस्कारक्रमसम्पन्नामद्भुतामविलम्बिताम्।
उच्चारयति कल्याणीं वाचं हृदयहर्षिणीम्॥ **4.3.32**॥ 191

अनया चित्रया वाचा त्रिस्थानव्यञ्जनस्थया।
कस्य नाराध्यते चित्तमुद्यतासेररेरपि॥ **4.3.33**॥ 192

एवंविधो यस्य दूतो न भवेत् पार्थिवस्य तु।
सिद्ध्यन्ति हि कथं तस्य कार्याणां गतयोऽनघ॥ **4.3.34**॥ 193

एवङ्गुणगणैर्युक्ता यस्य स्युः कार्यसाधकाः।
तस्य सिद्ध्यन्ति सर्वेऽर्था दूतवाक्यप्रचोदिताः॥ **4.3.35**॥ 194

एवमुक्तस्तु सौमित्रिः सुग्रीवसचिवं कपिम्।
अभ्यभाषत वाक्यज्ञो वाक्यज्ञं पवनात्मजम्॥ **4.3.36**॥ 195

विदिता नौ गुणा विद्वन् सुग्रीवस्य महात्मनः।
तमेव चावां मार्गावः सुग्रीवं प्लवगेश्वरम्॥ **4.3.37**॥ 196

यथा ब्रवीषि हनुमन् सुग्रीववचनादिह।
तत् तथा हि करिष्यावो वचनात् तव सत्तम॥ **4.3.38**॥ 197

तत् तस्य वाक्यं निपुणं निशम्य
प्रहृष्टरूपः पवनात्मजः कपिः।

मनः समाधाय जयोपपत्तौ
सख्यं तदा कर्तुमियेष ताभ्याम्॥ 4.3.39॥ 198

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
किष्किन्धाकाण्डे तृतीयः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ चतुर्थः सर्गः ॥

लक्ष्मणेन श्रीरामवनागमनस्य सीताहरणस्य च वृत्तान्तस्य वर्णनं तत्र सीतान्वेषणे सुग्रीवः सहयोगं करोत्वितीच्छायाः प्रकटनं हनुमता तयोराश्वासनपूर्वकमात्मना सह नयनम्

ततः प्रहृष्टो हनुमान् कृत्यवानिति तद्वचः।
श्रुत्वा मधुरभावं च सुग्रीवं मनसा गतः॥ **4.4.1** ॥ 199

भाव्यो राज्यागमस्तस्य सुग्रीवस्य महात्मनः।
यदयं कृत्यवान् प्राप्तः कृत्यं चैतदुपागतम्॥ **4.4.2** ॥ 200

ततः परमसंहृष्टो हनूमान् प्लवगोत्तमः।
प्रत्युवाच ततो वाक्यं रामं वाक्यविशारदः॥ **4.4.3** ॥ 201

किमर्थं त्वं वनं घोरं पम्पाकाननमण्डितम्।
आगतः सानुजो दुर्गं नानाव्यालमृगायुतम्॥ **4.4.4** ॥ 202

तस्य तद् वचनं श्रुत्वा लक्ष्मणो रामचोदितः।
आचचक्षे महात्मानं रामं दशरथात्मजम्॥ **4.4.5** ॥ 203

राजा दशरथो नाम द्युतिमान् धर्मवत्सलः।
चातुर्वर्ण्यं स्वधर्मेण नित्यमेवाभिपालयन्॥ **4.4.6** ॥ 204

न द्वेष्टा विद्यते तस्य स तु द्वेष्टि न कञ्चन।
स तु सर्वेषु भूतेषु पितामह इवापरः॥ **4.4.7** ॥ 205

अग्निष्टोमादिभिर्यज्ञैरिष्टवानाप्तदक्षिणैः।
तस्यायं पूर्वजः पुत्रो रामो नाम जनैः श्रुतः॥ **4.4.8**॥ 206

शरण्यः सर्वभूतानां पितुर्निर्देशपारगः।
ज्येष्ठो दशरथस्यायं पुत्राणां गुणवत्तरः॥ **4.4.9**॥ 207

राजलक्षणसंयुक्तः संयुक्तो राज्यसम्पदा।
राज्याद् भ्रष्टो मया वस्तुं वने सार्धमिहागतः॥ **4.4.10**॥ 208

भार्यया च महाभाग सीतयानुगतो वशी।
दिनक्षये महातेजाः प्रभयेव दिवाकरः॥ **4.4.11**॥ 209

अहमस्यावरो भ्राता गुणैर्दास्यमुपागतः।
कृतज्ञस्य बहुज्ञस्य लक्ष्मणो नाम नामतः॥ **4.4.12**॥ 210

सुखार्हस्य महार्हस्य सर्वभूतहितात्मनः।
ऐश्वर्येण विहीनस्य वनवासे रतस्य च॥ **4.4.13**॥ 211

रक्षसापहृता भार्या रहिते कामरूपिणा।
तच्च न ज्ञायते रक्षः पत्नी येनास्य वा हृता॥ **4.4.14**॥ 212

दनुर्नाम दितेः पुत्रः शापाद् राक्षसतां गतः।
आख्यातस्तेन सुग्रीवः समर्थो वानराधिपः॥ **4.4.15**॥ 213

स ज्ञास्यति महावीर्यस्तव भार्यापहारिणम्।
एवमुक्त्वा दनुः स्वर्गं भ्राजमानो दिवं गतः॥ **4.4.16**॥ 214

एतत् ते सर्वमाख्यातं याथातथ्येन पृच्छतः।
अहं चैव च रामश्च सुग्रीवं शरणं गतौ॥ **4.4.17**॥ 215

एष दत्त्वा च वित्तानि प्राप्य चानुत्तमं यशः।
लोकनाथः पुरा भूत्वा सुग्रीवं नाथमिच्छति॥ **4.4.18**॥ 216

सीता यस्य स्नुषा चासीच्छरण्यो धर्मवत्सलः।
तस्य पुत्रः शरण्यश्च सुग्रीवं शरणं गतः॥ **4.4.19**॥ 217

सर्वलोकस्य धर्मात्मा शरण्यः शरणं पुरा।
गुरुर्मे राघवः सोऽयं सुग्रीवं शरणं गतः॥ **4.4.20**॥ 218

यस्य प्रसादे सततं प्रसीदेयुरिमाः प्रजाः।
स रामो वानरेन्द्रस्य प्रसादमभिकाङ्क्षते॥ **4.4.21**॥ 219

येन सर्वगुणोपेताः पृथिव्यां सर्वपार्थिवाः।
मानिताः सततं राज्ञा सदा दशरथेन वै॥ **4.4.22**॥ 220

तस्यायं पूर्वजः पुत्रस्त्रिषु लोकेषु विश्रुतः।
सुग्रीवं वानरेन्द्रं तु रामः शरणमागतः॥ **4.4.23**॥ 221

शोकाभिभूते रामे तु शोकार्ते शरणं गते।
कर्तुमर्हति सुग्रीवः प्रसादं सह यूथपैः॥ **4.4.24**॥ 222

एवं ब्रुवाणं सौमित्रिं करुणं साश्रुपातनम्।
हनूमान् प्रत्युवाचेदं वाक्यं वाक्यविशारदः॥ **4.4.25**॥ 223

ईदृशा बुद्धिसम्पन्ना जितक्रोधा जितेन्द्रियाः।
द्रष्टव्या वानरेन्द्रेण दिष्ट्या दर्शनमागताः॥ **4.4.26**॥ 224

स हि राज्याच्च विभ्रष्टः कृतवैरश्च वालिना।
हृतदारो वने त्रस्तो भ्रात्रा विनिकृतो भृशम्॥ **4.4.27**॥ 225

करिष्यति स साहाय्यं युवयोर्भास्करात्मजः।
सुग्रीवः सह चास्माभिः सीतायाः परिमार्गणे॥ **4.4.28**॥ 226

इत्येवमुक्त्वा हनुमाञ्श्लक्ष्णं मधुरया गिरा।
बभाषे साधु गच्छामः सुग्रीवमिति राघवम्॥ **4.4.29**॥ 227

एवं ब्रुवन्तं धर्मात्मा हनूमन्तं स लक्ष्मणः।
प्रतिपूज्य यथान्यायमिदं प्रोवाच राघवम्॥ **4.4.30**॥ 228

कपिः कथयते हृष्टो यथायं मारुतात्मजः।
कृत्यवान् सोऽपि सम्प्राप्तः कृतकृत्योऽसि राघव॥ **4.4.31**॥ 229

प्रसन्नमुखवर्णश्च व्यक्तं हृष्टश्च भाषते।
नानृतं वक्ष्यते वीरो हनूमान् मारुतात्मजः॥ **4.4.32**॥ 230

ततः स सुमहाप्राज्ञो हनूमान् मारुतात्मजः।
जगामादाय तौ वीरौ हरिराजाय राघवौ॥ **4.4.33**॥ 231

भिक्षुरूपं परित्यज्य वानरं रूपमास्थितः।
पृष्ठमारोप्य तौ वीरौ जगाम कपिकुञ्जरः॥ **4.4.34**॥ 232

स तु विपुलयशाः कपिप्रवीरः
पवनसुतः कृतकृत्यवत् प्रहृष्टः।
गिरिवरमुरुविक्रमः प्रयातः
स शुभमतिः सह रामलक्ष्मणाभ्याम्॥ **4.4.35**॥ 233

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
किष्किन्धाकाण्डे चतुर्थः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ पञ्चमः सर्गः ॥

श्रीरामसुग्रीवयोर्मैत्री श्रीरामेण वालिवधाय प्रतिज्ञाकरणं च

ऋष्यमूकात् तु हनुमान् गत्वा तं मलयं गिरिम्।
आचचक्षे तदा वीरौ कपिराजाय राघवौ ॥ **4.5.1** ॥ 234

अयं रामो महाप्राज्ञ सम्प्राप्तो दृढविक्रमः।
लक्ष्मणेन सह भ्रात्रा रामोऽयं सत्यविक्रमः ॥ **4.5.2** ॥ 235

इक्ष्वाकूणां कुले जातो रामो दशरथात्मजः।
धर्मे निगदितश्चैव पितुर्निर्देशकारकः ॥ **4.5.3** ॥ 236

राजसूयाश्वमेधैश्च वह्निर्येनाभितर्पितः।
दक्षिणाश्च तथोत्सृष्टा गावः शतसहस्रशः ॥ **4.5.4** ॥ 237

तपसा सत्यवाक्येन वसुधा येन पालिता।
स्त्रीहेतोस्तस्य पुत्रोऽयं रामोऽरण्यं समागतः ॥ **4.5.5** ॥ 238

तस्यास्य वसतोऽरण्ये नियतस्य महात्मनः।
रावणेन हृता भार्या स त्वां शरणमागतः ॥ **4.5.6** ॥ 239

भवता सख्यकामौ तौ भ्रातरौ रामलक्ष्मणौ।
प्रगृह्य चार्चयस्वैतौ पूजनीयतमावुभौ ॥ **4.5.7** ॥ 240

श्रुत्वा हनूमतो वाक्यं सुग्रीवो वानराधिपः।
दर्शनीयतमो भूत्वा प्रीत्योवाच च राघवम्॥ **4.5.8**॥ 241

भवान् धर्मविनीतश्च सुतपाः सर्ववत्सलः।
आख्याता वायुपुत्रेण तत्त्वतो मे भवद्गुणाः॥ **4.5.9**॥ 242

तन्ममैवैष सत्कारो लाभश्चैवोत्तमः प्रभो।
यत्त्वमिच्छसि सौहार्दं वानरेण मया सह॥ **4.5.10**॥ 243

रोचते यदि मे सख्यं बाहुरेष प्रसारितः।
गृह्यतां पाणिना पाणिर्मर्यादा बध्यतां ध्रुवा॥ **4.5.11**॥ 244

एतत् तु वचनं श्रुत्वा सुग्रीवस्य सुभाषितम्।
सम्प्रहृष्टमना हस्तं पीडयामास पाणिना॥ **4.5.12**॥ 245

हृष्टः सौहृदमालम्ब्य पर्यष्वजत पीडितम्।
ततो हनूमान् सन्त्यज्य भिक्षुरूपमरिन्दमः॥ **4.5.13**॥ 246

काष्ठयोः स्वेन रूपेण जनयामास पावकम्।
दीप्यमानं ततो वह्निं पुष्पैरभ्यर्च्य सत्कृतम्॥ **4.5.14**॥ 247

तयोर्मध्ये तु सुप्रीतो निदधौ सुसमाहितः।
ततोऽग्निं दीप्यमानं तौ चक्रतुश्च प्रदक्षिणम्॥ **4.5.15**॥ 248

सुग्रीवो राघवश्चैव वयस्यत्वमुपागतौ।
ततः सुप्रीतमनसौ तावुभौ हरिराघवौ॥ **4.5.16**॥ 249

अन्योन्यमभिवीक्षन्तौ न तृप्तिमभिजग्मतुः।
त्वं वयस्योऽसि हृद्यो मे ह्येकं दुःखं सुखं च नौ॥ **4.5.17**॥ 250

सुग्रीवो राघवं वाक्यमित्युवाच प्रहृष्टवत्।
ततः सुपर्णबहुलां भङ्क्त्वा शाखां सुपुष्पिताम्॥ **4.5.18**॥ 251

सालस्यास्तीर्य सुग्रीवो निषसाद सराघवः।
लक्ष्मणायाथ संहृष्टो हनुमान् मारुतात्मजः॥ **4.5.19**॥ 252

शाखां चन्दनवृक्षस्य ददौ परमपुष्पिताम्।
ततः प्रहृष्टः सुग्रीवः श्लक्ष्णं मधुरया गिरा॥ **4.5.20**॥ 253

प्रत्युवाच तदा रामं हर्षव्याकुललोचनः।
अहं विनिकृतो राम चरामीह भयार्दितः॥ **4.5.21**॥ 254

हृतभार्यो वने त्रस्तो दुर्गमेतदुपाश्रितः।
सोऽहं त्रस्तो वने भीतो वसाम्युभ्रान्तचेतनः॥ **4.5.22**॥ 255

वालिना निकृतो भ्रात्रा कृतवैरश्च राघव।
वालिनो मे महाभाग भयार्तस्याभयं कुरु॥ **4.5.23**॥ 256

कर्तुमर्हसि काकुत्स्थ भयं मे न भवेद् यथा।
एवमुक्तस्तु तेजस्वी धर्मज्ञो धर्मवत्सलः॥ **4.5.24**॥ 257

प्रत्यभाषत काकुत्स्थः सुग्रीवं प्रहसन्निव।
उपकारफलं मित्रं विदितं मे महाकपे॥ **4.5.25**॥ 258

वालिनं तं वधिष्यामि तव भार्यापहारिणम्।
अमोघाः सूर्यसङ्काशा ममेमे निशिताः शराः॥ **4.5.26**॥ 259

तस्मिन् वालिनि दुर्वृत्ते निपतिष्यन्ति वेगिताः।
कङ्कपत्रप्रतिच्छन्ना महेन्द्राशनिसन्निभाः॥ **4.5.27**॥ 260

तीक्ष्णाग्रा ऋजुपर्वाणः सरोषा भुजगा इव।
तमद्य वालिनं पश्य तीक्ष्णैराशीविषोपमैः॥ **4.5.28**॥ 261

शरैर्विनिहतं भूमौ प्रकीर्णमिव पर्वतम्।
स तु तद् वचनं श्रुत्वा राघवस्यात्मनो हितम्।
सुग्रीवः परमप्रीतः परमं वाक्यमब्रवीत्॥ **4.5.29**॥ 262

तव प्रसादेन नृसिंह राघव
प्रियां च राज्यं च समाप्नुयामहम्।
तथा कुरु त्वं नरदेव वैरिणं
यथा न हिंस्यात् स पुनर्ममाग्रजम्॥ **4.5.30**॥ 263

सीताकपीन्द्रक्षणदाचराणां
राजीवहेमज्वलनोपमानि।
सुग्रीवरामप्रणयप्रसङ्गे
वामानि नेत्राणि समं स्फुरन्ति॥ **4.5.31**॥ 264

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
किष्किन्धाकाण्डे पञ्चमः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ षष्ठः सर्गः ॥

सुग्रीवेण श्रीरामसमक्षे सीताभूषणानां समानयनं श्रीरामस्य शोकरोषमयं वचनं च

पुनरेवाब्रवीत् प्रीतो राघवं रघुनन्दनम्।
अयमाख्याति ते राम सचिवो मन्त्रिसत्तमः॥ **4.6.1** ॥ 265

हनुमान् यन्निमित्तं त्वं निर्जनं वनमागतः।
लक्ष्मणेन सह भ्रात्रा वसतश्च वने तव॥ **4.6.2** ॥ 266

रक्षसापहृता भार्या मैथिली जनकात्मजा।
त्वया वियुक्ता रुदती लक्ष्मणेन च धीमता॥ **4.6.3** ॥ 267

अन्तरं प्रेप्सुना तेन हत्वा गृध्रं जटायुषम्।
भार्यावियोगजं दुःखं प्रापितस्तेन रक्षसा॥ **4.6.4** ॥ 268

भार्यावियोगजं दुःखं नचिरात् त्वं विमोक्ष्यसे।
अहं तामानयिष्यामि नष्टां वेदश्रुतीमिव॥ **4.6.5** ॥ 269

रसातले वा वर्तन्तीं वर्तन्तीं वा नभस्तले।
अहमानीय दास्यामि तव भार्यामरिन्दम॥ **4.6.6** ॥ 270

इदं तथ्यं मम वचस्त्वमवेहि च राघव।
न शक्या सा जरयितुमपि सेन्द्रैः सुरासुरैः॥ **4.6.7** ॥ 271

तव भार्या महाबाहो भक्ष्यं विषकृतं यथा।
त्यज शोकं महाबाहो तां कान्तामानयामि ते॥ **4.6.8**॥ 272

अनुमानात् तु जानामि मैथिली सा न संशयः।
ह्रियमाणा मया दृष्टा रक्षसा रौद्रकर्मणा॥ **4.6.9**॥ 273

क्रोशन्ती रामरामेति लक्ष्मणेति च विस्वरम्।
स्फुरन्ती रावणस्याङ्के पन्नगेन्द्रवधूर्यथा॥ **4.6.10**॥ 274

आत्मना पञ्चमं मां हि दृष्ट्वा शैलतले स्थितम्।
उत्तरीयं तया त्यक्तं शुभान्याभरणानि च॥ **4.6.11**॥ 275

तान्यस्माभिर्गृहीतानि निहितानि च राघव।
आनयिष्याम्यहं तानि प्रत्यभिज्ञातुमर्हसि॥ **4.6.12**॥ 276

तमब्रवीत् ततो रामः सुग्रीवं प्रियवादिनम्।
आनयस्व सखे शीघ्रं किमर्थं प्रविलम्बसे॥ **4.6.13**॥ 277

एवमुक्तस्तु सुग्रीवः शैलस्य गहनां गुहाम्।
प्रविवेश ततः शीघ्रं राघवप्रियकाम्यया॥ **4.6.14**॥ 278

उत्तरीयं गृहीत्वा तु स तान्याभरणानि च।
इदं पश्येति रामाय दर्शयामास वानरः॥ **4.6.15**॥ 279

ततो गृहीत्वा वासस्तु शुभान्याभरणानि च।
अभवद् बाष्पसंरुद्धो नीहारेणेव चन्द्रमाः॥ **4.6.16**॥ 280

सीतास्नेहप्रवृत्तेन स तु बाष्पेण दूषितः।
हा प्रियेति रुदन् धैर्यमुत्सृज्य न्यपतत् क्षितौ॥ **4.6.17**॥ 281

हृदि कृत्वा स बहुशस्तमलङ्कारमुत्तमम्।
निशश्वास भृशं सर्पो बिलस्थ इव रोषितः॥ **4.6.18**॥ 282

अविच्छिन्नाश्रुवेगस्तु सौमित्रिं प्रेक्ष्य पार्श्वतः।
परिदेवयितुं दीनं रामः समुपचक्रमे॥ **4.6.19**॥ 283

पश्य लक्ष्मण वैदेह्या सन्त्यक्तं ह्रियमाणया।
उत्तरीयमिदं भूमौ शरीराद् भूषणानि च॥ **4.6.20**॥ 284

शाद्वलिन्यां ध्रुवं भूम्यां सीतया ह्रियमाणया।
उत्सृष्टं भूषणमिदं तथा रूपं हि दृश्यते॥ **4.6.21**॥ 285

एवमुक्तस्तु रामेण लक्ष्मणो वाक्यमब्रवीत्।
नाहं जानामि केयूरे नाहं जानामि कुण्डले॥ **4.6.22**॥ 286

नूपुरे त्वभिजानामि नित्यं पादाभिवन्दनात्।
ततस्तु राघवो वाक्यं सुग्रीवमिदमब्रवीत्॥ **4.6.23**॥ 287

ब्रूहि सुग्रीव कं देशं ह्रियन्ती लक्षिता त्वया।
रक्षसा रौद्ररूपेण मम प्राणप्रिया हृता॥ **4.6.24**॥ 288

क्व वा वसति तद् रक्षो महद् व्यसनदं मम।
यनिमित्तमहं सर्वान् नाशयिष्यामि राक्षसान्॥ **4.6.25**॥ 289

हरता मैथिलीं येन मां च रोषयता ध्रुवम्।
आत्मनो जीवितान्ताय मृत्युद्वारमपावृतम्॥ **4.6.26**॥ 290

मम दयिततमा हृता वनाद्
रजनिचरेण विमथ्य येन सा।
कथय मम रिपुं तमद्य वै
प्लवगपते यमसन्निधिं नयामि॥ **4.6.27**॥ 291

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
किष्किन्धाकाण्डे षष्ठः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ सप्तमः सर्गः ॥

सुग्रीवेण श्रीरामस्य समाश्वासनं श्रीरामेण सुग्रीवस्य कार्यसिद्ध्यै विश्वासदापनम्

एवमुक्तस्तु सुग्रीवो रामेणार्तेन वानरः।
अब्रवीत् प्राञ्जलिर्वाक्यं सबाष्पं बाष्पगद्गदः॥ **4.7.1** ॥ 292

न जाने निलयं तस्य सर्वथा पापरक्षसः।
सामर्थ्य विक्रमं वापि दौष्कुलेयस्य वा कुलम्॥ **4.7.2** ॥ 293

सत्यं तु प्रतिजानामि त्यज शोकमरिन्दम।
करिष्यामि तथा यत्नं यथा प्राप्स्यसि मैथिलीम्॥ **4.7.3** ॥ 294

रावणं सगणं हत्वा परितोष्यात्मपौरुषम्।
तथास्मि कर्ता नचिराद् यथा प्रीतो भविष्यसि॥ **4.7.4** ॥ 295

अलं वैक्लव्यमालम्ब्य धैर्यमात्मगतं स्मर।
त्वद् विधानां न सदृशमीदृशं बुद्धिलाघवम्॥ **4.7.5** ॥ 296

मयापि व्यसनं प्राप्तं भार्याविरहजं महत्।
नाहमेवं हि शोचामि धैर्यं न च परित्यजे॥ **4.7.6** ॥ 297

नाहं तामनुशोचामि प्राकृतो वानरोऽपि सन्।
महात्मा च विनीतश्च किं पुनर्धृतिमान् महान्॥ **4.7.7** ॥ 298

बाष्पमापतितं धैर्यान्निग्रहीतुं त्वमर्हसि।
मर्यादां सत्त्वयुक्तानां धृतिं नोत्स्रष्टुमर्हसि॥ **4.7.8**॥ 299

व्यसने वार्थकृच्छ्रे वा भये वा जीवितान्तगे।
विमृशंश्च स्वया बुद्ध्या धृतिमान् नावसीदति॥ **4.7.9**॥ 300

बालिशस्तु नरो नित्यं वैक्लव्यं योऽनुवर्तते।
स मज्जत्यवशः शोके भाराक्रान्तेव नौर्जले॥ **4.7.10**॥ 301

एषोऽञ्जलिर्मया बद्धः प्रणयात् त्वां प्रसादये।
पौरुषं श्रय शोकस्य नान्तरं दातुमर्हसि॥ **4.7.11**॥ 302

ये शोकमनुवर्तन्ते न तेषां विद्यते सुखम्।
तेजश्च क्षीयते तेषां न त्वं शोचितुमर्हसि॥ **4.7.12**॥ 303

शोकेनाभिप्रपन्नस्य जीविते चापि संशयः।
स शोकं त्यज राजेन्द्र धैर्यमाश्रय केवलम्॥ **4.7.13**॥ 304

हितं वयस्यभावेन ब्रूमि नोपदिशामि ते।
वयस्यतां पूजयन्मे न त्वं शोचितुमर्हसि॥ **4.7.14**॥ 305

मधुरं सान्त्वितस्तेन सुग्रीवेण स राघवः।
मुखमश्रुपरिक्लिन्नं वस्त्रान्तेन प्रमार्जयत्॥ **4.7.15**॥ 306

प्रकृतिस्थस्तु काकुत्स्थः सुग्रीववचनात् प्रभुः।
सम्परिष्वज्य सुग्रीवमिदं वचनमब्रवीत्॥ **4.7.16**॥ 307

कर्तव्यं यद् वयस्येन स्निग्धेन च हितेन च।
अनुरूपं च युक्तं च कृतं सुग्रीव तत् त्वया॥ **4.7.17**॥ 308

एष च प्रकृतिस्थोऽहमनुनीतस्त्वया सखे।
दुर्लभो हीदृशो बन्धुरस्मिन् काले विशेषतः॥ **4.7.18**॥ 309

किं तु यत्नस्त्वया कार्यो मैथिल्याः परिमार्गणे।
राक्षसस्य च रौद्रस्य रावणस्य दुरात्मनः॥ **4.7.19**॥ 310

मया च यदनुष्ठेयं विस्रब्धेन तदुच्यताम्।
वर्षास्विव च सुक्षेत्रे सर्वं सम्पद्यते तव॥ **4.7.20**॥ 311

मया च यदिदं वाक्यमभिमानात् समीरितम्।
तत्त्वया हरिशार्दूल तत्त्वमित्युपधार्यताम्॥ **4.7.21**॥ 312

अनृतं नोक्तपूर्वं मे न च वक्ष्ये कदाचन।
एतत्ते प्रतिजानामि सत्येनैव शपाम्यहम्॥ **4.7.22**॥ 313

ततः प्रहृष्टः सुग्रीवो वानरैः सचिवैः सह।
राघवस्य वचः श्रुत्वा प्रतिज्ञातं विशेषतः॥ **4.7.23**॥ 314

एवमेकान्तसम्पृक्तौ ततस्तौ नरवानरौ।
उभावन्योन्यसदृशं सुखं दुःखमभाषताम्॥ **4.7.24**॥ 315

महानुभावस्य वचो निशम्य
हरिर्नृपाणामधिपस्य तस्य।
कृतं स मेने हरिवीरमुख्य -
स्तदा च कार्यं हृदयेन विद्वान्॥ **4.7.25**॥ 316

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
किष्किन्धाकाण्डे सप्तमः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ अष्टमः सर्गः ॥

सुग्रीवेण श्रीरामं प्रति निजदुःखनिवेदनं श्रीरामेण तमाश्वास्य तयोरुभयोर्भ्रात्रोर्वैरस्य किं कारणमिति प्रश्नकरणम्

परितुष्टस्तु सुग्रीवस्तेन वाक्येन हर्षितः।
लक्ष्मणस्याग्रजं शूरमिदं वचनमब्रवीत्॥ **4.8.1** ॥ 317

सर्वथाहमनुग्राह्यो देवतानां न संशयः।
उपपन्नो गुणोपेतः सखा यस्य भवान् मम॥ **4.8.2** ॥ 318

शक्यं खलु भवेद् राम सहायेन त्वयानघ।
सुरराज्यमपि प्राप्तुं स्वराज्यं किमुत प्रभो॥ **4.8.3** ॥ 319

सोऽहं सभाज्यो बन्धूनां सुहृदां चैव राघव।
यस्याग्निसाक्षिकं मित्रं लब्धं राघववंशजम्॥ **4.8.4** ॥ 320

अहमप्यनुरूपस्ते वयस्यो ज्ञास्यसे शनैः।
न तु वक्तुं समर्थोऽहं त्वयि आत्मगतान् गुणान्॥ **4.8.5** ॥ 321

महात्मनां तु भूयिष्ठं त्वद्विधानां कृतात्मनाम्।
निश्चला भवति प्रीतिर्धैर्यमात्मवतां वर॥ **4.8.6** ॥ 322

रजतं वा सुवर्णं वा शुभान्याभरणानि च।
अविभक्तानि साधूनामवगच्छन्ति साधवः॥ **4.8.7** ॥ 323

आढ्यो वापि दरिद्रो वा दुःखितः सुखितोऽपि वा।
निर्दोषश्च सदोषश्च वयस्यः परमा गतिः॥ **4.8.8**॥ 324

धनत्यागः सुखत्यागो देशत्यागोऽपि वानघ।
वयस्यार्थे प्रवर्तन्ते स्नेहं दृष्ट्वा तथाविधम्॥ **4.8.9**॥ 325

तत् तथेत्यब्रवीद् रामः सुग्रीवं प्रियवादिनम्।
लक्ष्मणस्याग्रतो लक्ष्म्या वासवस्येव धीमतः॥ **4.8.10**॥ 326

ततो रामं स्थितं दृष्ट्वा लक्ष्मणं च महाबलम्।
सुग्रीवः सर्वतश्चक्षुर्वने लोलमपातयत्॥ **4.8.11**॥ 327

स ददर्श ततः सालमविदूरे हरीश्वरः।
सुपुष्पमीषत्पत्राढ्यं भ्रमरैरुपशोभितम्॥ **4.8.12**॥ 328

तस्यैकां पर्णबहुलां शाखां भङ्क्त्वा सुशोभिताम्।
रामस्यास्तीर्य सुग्रीवो निषसाद सराघवः॥ **4.8.13**॥ 329

तावासीनौ ततो दृष्ट्वा हनूमानपि लक्ष्मणम्।
शालशाखां समुत्पाट्य विनीतमुपवेशयत्॥ **4.8.14**॥ 330

सुखोपविष्टं रामं तु प्रसन्नमुदधिं यथा।
सालपुष्पावसङ्कीर्णे तस्मिन् गिरिवरोत्तमे॥ **4.8.15**॥ 331

ततः प्रहृष्टः सुग्रीवः श्लक्ष्णया शुभया गिरा।
उवाच प्रणयाद् रामं हर्षव्याकुलिताक्षरम्॥ **4.8.16**॥ 332

अहं विनिकृतो भ्रात्रा चराम्येष भयार्दितः।
ऋष्यमूकं गिरिवरं हृतभार्यः सुदुःखितः॥ **4.8.17**॥ 333

सोऽहं त्रस्तो भये मग्नो वने सम्भ्रान्तचेतनः।
वालिना निकृतो भ्रात्रा कृतवैरश्च राघव॥ **4.8.18**॥ 334

वालिनो मे भयार्तस्य सर्वलोकाभयङ्कर।
ममापि त्वमनाथस्य प्रसादं कर्तुमर्हसि॥ **4.8.19**॥ 335

एवमुक्तस्तु तेजस्वी धर्मज्ञो धर्मवत्सलः।
प्रत्युवाच स काकुत्स्थः सुग्रीवं प्रहसन्निव॥ **4.8.20**॥ 336

उपकारफलं मित्रमपकारोऽरिलक्षणम्।
अद्यैव तं वधिष्यामि तव भार्यापहारिणम्॥ **4.8.21**॥ 337

इमे हि मे महाभाग पत्रिणस्तिग्मतेजसः।
कार्तिकेयवनोद्भूताः शरा हेमविभूषिताः॥ **4.8.22**॥ 338

कङ्कपत्रपरिच्छन्ना महेन्द्राशनिसन्निभाः।
सुपर्वाणः सुतीक्ष्णाग्राः सरोषा भुजगा इव॥ **4.8.23**॥ 339

वालिसंज्ञममित्रं ते भ्रातरं कृतकिल्बिषम्।
शरैर्विनिहतं पश्य विकीर्णमिव पर्वतम्॥ **4.8.24**॥ 340

राघवस्य वचः श्रुत्वा सुग्रीवो वाहिनीपतिः।
प्रहर्षमतुलं लेभे साधु साध्विति चाब्रवीत्॥ **4.8.25**॥ 341

राम शोकाभिभूतोऽहं शोकार्तानां भवान् गतिः।
वयस्य इति कृत्वा हि त्वय्यहं परिदेवये॥ **4.8.26**॥ 342

त्वं हि पाणिप्रदानेन वयस्यो मेऽग्निसाक्षिकम्।
कृतः प्राणैर्बहुमतः सत्येन च शपाम्यहम्॥ **4.8.27**॥ 343

वयस्य इति कृत्वा च विस्रब्धः प्रवदाम्यहम्।
दुःखमन्तर्गतं तन्मे मनो हरति नित्यशः॥ **4.8.28**॥ 344

एतावदुक्त्वा वचनं बाष्पदूषितलोचनः।
बाष्पदूषितया वाचा नोच्चैः शक्नोति भाषितुम्॥ **4.8.29**॥ 345

बाष्पवेगं तु सहसा नदीवेगमिवागतम्।
धारयामास धैर्येण सुग्रीवो रामसन्निधौ॥ **4.8.30**॥ 346

स निगृह्य तु तं बाष्पं प्रमृज्य नयने शुभे।
विनिःश्वस्य च तेजस्वी राघवं पुनरूचिवान्॥ **4.8.31**॥ 347

पुराहं वालिना राम राज्यात् स्वादवरोपितः।
परुषाणि च संश्राव्य निर्धूतोऽस्मि बलीयसा॥ **4.8.32**॥ 348

हृता भार्या च मे तेन प्राणेभ्योऽपि गरीयसी।
सुहृदश्च मदीया ये संयता बन्धनेषु ते॥ **4.8.33**॥ 349

यत्नवांश्च स दुष्टात्मा मद्विनाशाय राघव।
बहुशस्तत्प्रयुक्ताश्च वानरा निहता मया॥ **4.8.34**॥ 350

शङ्कया त्वेतयाहं च दृष्ट्वा त्वामपि राघव।
नोपसर्पाम्यहं भीतो भये सर्वे हि बिभ्यति॥ **4.8.35**॥ 351

केवलं हि सहाया मे हनुमत्प्रमुखास्त्विमे।
अतोऽहं धारयाम्यद्य प्राणान् कृच्छ्रगतोऽपि सन्॥ **4.8.36**॥ 352

एते हि कपयः स्निग्धा मां रक्षन्ति समन्ततः।
सह गच्छन्ति गन्तव्ये नित्यं तिष्ठन्ति चास्थिते॥ **4.8.37**॥ 353

सङ्क्षेपस्त्वेष मे राम किमुक्त्वा विस्तरं हि ते।
स मे ज्येष्ठो रिपुर्भ्राता वाली विश्रुतपौरुषः॥ **4.8.38**॥ 354

तद्विनाशेऽपि मे दुःखं प्रमृष्टं स्यादनन्तरम्।
सुखं मे जीवितं चैव तद्विनाशनिबन्धनम्॥ **4.8.39**॥ 355

एष मे राम शोकान्तः शोकार्तेन निवेदितः।
दुःखितः सुखितो वापि सख्युर्नित्यं सखा गतिः॥ **4.8.40**॥ 356

श्रुत्वैतच्च वचो रामः सुग्रीवमिदमब्रवीत्।
किं निमित्तमभूद् वैरं श्रोतुमिच्छामि तत्त्वतः॥ **4.8.41**॥ 357

सुखं हि कारणं श्रुत्वा वैरस्य तव वानर।
आनन्तर्याद् विधास्यामि सम्प्रधार्य बलाबलम्॥ **4.8.42**॥ 358

बलवान् हि ममामर्षः श्रुत्वा त्वामवमानितम्।
वर्धते हृदयोत्कम्पी प्रावृड्वेग इवाम्भसः॥ **4.8.43**॥ 359

हृष्टः कथय विस्रब्धो यावदारोप्यते धनुः।
सृष्टश्च हि मया बाणो निरस्तश्च रिपुस्तव॥ **4.8.44**॥ 360

एवमुक्तस्तु सुग्रीवः काकुत्स्थेन महात्मना।
प्रहर्षमतुलं लेभे चतुर्भिः सह वानरैः॥ **4.8.45**॥ 361

ततः प्रहृष्टवदनः सुग्रीवो लक्ष्मणाग्रजे।
वैरस्य कारणं तत्त्वमाख्यातुमुपचक्रमे॥ **4.8.46**॥ 362

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
किष्किन्धाकाण्डे अष्टमः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ नवमः सर्गः ॥

सुग्रीवेण श्रीरामं प्रति वालिना सह स्वकीयवैरसम्बन्धिकारणस्य कथनम्

वाली नाम मम भ्राता ज्येष्ठः शत्रुनिषूदनः।
पितुर्बहुमतो नित्यं मम चापि तथा पुरा॥ **4.9.1** ॥ 363

पितर्युपरते तस्मिज्येष्ठोऽयमिति मन्त्रिभिः।
कपीनामीश्वरो राज्ये कृतः परमसम्मतः॥ **4.9.2** ॥ 364

राज्यं प्रशासतस्तस्य पितृपैतामहं महत्।
अहं सर्वेषु कालेषु प्रणतः प्रेष्यवत् स्थितः॥ **4.9.3** ॥ 365

मायावी नाम तेजस्वी पूर्वजो दुन्दुभेः सुतः।
तेन तस्य महद्वैरं वालिनः स्त्रीकृतं पुरा॥ **4.9.4** ॥ 366

स तु सुप्ते जने रात्रौ किष्किन्धाद्वारमागतः।
नर्दति स्म सुसंरब्धो वालिनं चाह्वयद् रणे॥ **4.9.5** ॥ 367

प्रसुप्तस्तु मम भ्राता नर्दतो भैरवस्वनम्।
श्रुत्वा न ममृषे वाली निष्पपात जवात् तदा॥ **4.9.6** ॥ 368

स तु वै निःसृतः क्रोधात् तं हन्तुमसुरोत्तमम्।
वार्यमाणस्ततः स्त्रीभिर्मया च प्रणतात्मना॥ **4.9.7** ॥ 369

स तु निर्धूय सर्वान् नो निर्जगाम महाबलः।
ततोऽहमपि सौहार्दान्निःसृतो वालिना सह॥ **4.9.8**॥ 370

स तु मे भ्रातरं दृष्ट्वा मां च दूरादवस्थितम्।
असुरो जातसन्त्रासः प्रदुद्राव तदा भृशम्॥ **4.9.9**॥ 371

तस्मिन् द्रवति सन्त्रस्ते ह्यावां द्रुततरं गतौ।
प्रकाशोऽपि कृतो मार्गश्चन्द्रेणोद्गच्छता तदा॥ **4.9.10**॥ 372

स तृणैरावृतं दुर्गं धरण्या विवरं महत्।
प्रविवेशासुरो वेगादावामासाद्य विष्ठितौ॥ **4.9.11**॥ 373

तं प्रविष्टं रिपुं दृष्ट्वा बिलं रोषवशं गतः।
मामुवाच ततो वाली वचनं क्षुभितेन्द्रियः॥ **4.9.12**॥ 374

इह तिष्ठाद्य सुग्रीव बिलद्वारि समाहितः।
यावदत्र प्रविश्याहं निहन्मि समरे रिपुम्॥ **4.9.13**॥ 375

मया त्वेतद् वचः श्रुत्वा याचितः स परन्तपः।
शापयित्वा च मां पद्भ्यां प्रविवेश बिलं ततः॥ **4.9.14**॥ 376

तस्य प्रविष्टस्य बिलं साग्रः संवत्सरो गतः।
स्थितस्य च बिलद्वारि स कालो व्यत्यवर्तत॥ **4.9.15**॥ 377

अहं तु नष्टं तं ज्ञात्वा स्नेहादागतसभ्रमः।
भ्रातरं न प्रपश्यामि पापशङ्कि च मे मनः॥ **4.9.16**॥ 378

अथ दीर्घस्य कालस्य बिलात् तस्माद् विनिःसृतम्।
सफेनं रुधिरं दृष्ट्वा ततोऽहं भृशदुःखितः॥ **4.9.17**॥ 379

नर्दतामसुराणां च ध्वनिर्मे श्रोत्रमागतः।
न रतस्य च सङ्ग्रामे क्रोशतोऽपि स्वनो गुरोः॥ **4.9.18**॥ 380

अहं त्ववगतो बुद्ध्या चिह्नैस्तैर्भ्रातरं हतम्।
पिधाय च बिलद्वारं शिलया गिरिमात्रया॥ **4.9.19**॥ 381

शोकार्तश्चोदकं कृत्वा किष्किन्धामागतः सखे।
गूहमानस्य मे तत् त्वं यत्नतो मन्त्रिभिः श्रुतम्॥ **4.9.20**॥ 382

ततोऽहं तैः समागम्य समेतैरभिषेचितः।
राज्यं प्रशासतस्तस्य न्यायतो मम राघव॥ **4.9.21**॥ 383

आजगाम रिपुं हत्वा दानवं स तु वानरः।
अभिषिक्तं तु मां दृष्ट्वा क्रोधात् संरक्तलोचनः॥ **4.9.22**॥ 384

मदीयान् मन्त्रिणो बद्ध्वा परुषं वाक्यमब्रवीत्।
निग्रहे च समर्थस्य तं पापं प्रति राघव॥ **4.9.23**॥ 385

न प्रावर्तत मे बुद्धिर्भ्रातृगौरवयन्त्रिता।
हत्वा शत्रुं स मे भ्राता प्रविवेश पुरं तदा॥ **4.9.24**॥ 386

मानयंस्तं महात्मानं यथावद्याभिवादयम्।
उक्ताश्च नाशिषस्तेन प्रहृष्टेनान्तरात्मना॥ **4.9.25**॥ 387

नत्वा पादावहं तस्य मुकुटेनास्पृशं प्रभो।
अपि वाली मम क्रोधान्न प्रसादं चकार सः॥ **4.9.26**॥ 388

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
किष्किन्धाकाण्डे नवमः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ दशमः सर्गः ॥

भ्रात्रा सह वैरकारणस्य कथनप्रसङ्गे सुग्रीवेण स्वकर्तृके वालिनः प्रसादने वालिकर्तृके च स्वस्य निष्कासने घटितस्य वृत्तान्तस्य वर्णनम्

ततः क्रोधसमाविष्टं संरब्धं तमुपागतम्।
अहं प्रसादयाञ्चक्रे भ्रातरं हितकाम्यया॥ **4.10.1**॥ 389

दिष्ट्यासि कुशली प्राप्तो निहतश्च त्वया रिपुः।
अनाथस्य हि मे नाथस्त्वमेकोऽनाथनन्दन॥ **4.10.2**॥ 390

इदं बहुशलाकं ते पूर्णचन्द्रमिवोदितम्।
छत्रं सवालव्यजनं प्रतीच्छस्व मया धृतम्॥ **4.10.3**॥ 391

आर्तस्तत्र बिलद्वारि स्थितः संवत्सरं नृप।
दृष्ट्वा च शोणितं द्वारि बिलाद्यापि समुत्थितम्॥ **4.10.4**॥ 392

शोकसंविग्नहृदयो भृशं व्याकुलितेन्द्रियः।
अपिधाय बिलद्वारं शैलशृङ्गेण तत् तदा॥ **4.10.5**॥ 393

तस्माद् देशादपाक्रम्य किष्किन्धां प्राविशं पुनः।
विषादात्त्विह मां दृष्ट्वा पौरैर्मन्त्रिभिरेव च॥ **4.10.6**॥ 394

अभिषिक्तो न कामेन तन्मे क्षन्तुं त्वमर्हसि।
त्वमेव राजा मानार्हः सदा चाहं यथा पुरा॥ **4.10.7**॥ 395

राजभावे नियोगोऽयं मम त्वद्विरहात् कृतः।
सामात्यपौरनगरं स्थितं निहतकण्टकम्॥ **4.10.8**॥ 396

न्यासभूतमिदं राज्यं तव निर्यातयाम्यहम्।
मा च रोषं कृथाः सौम्य मम शत्रुनिषूदन॥ **4.10.9**॥ 397

याचे त्वां शिरसा राजन् मया बद्धोऽयमञ्जलिः।
बलादस्मिन् समागम्य मन्त्रिभिः पुरवासिभिः॥ **4.10.10**॥ 398

राजभावे नियुक्तोऽहं शून्यदेशजिगीषया।
स्निग्धमेवं ब्रुवाणं मां स विनिर्भर्त्स्य वानरः॥ **4.10.11**॥ 399

धिक्त्वामिति च मामुक्त्वा बहु तत्तदुवाच ह।
प्रकृतीश्च समानीय मन्त्रिणश्चैव सम्मतान्॥ **4.10.12**॥ 400

मामाह सुहृदां मध्ये वाक्यं परमगर्हितम्।
विदितं वो मया रात्रौ मायावी स महासुरः॥ **4.10.13**॥ 401

मां समाह्वयत क्रुद्धो युद्धाकाङ्क्षी तदा पुरा।
तस्य तद् भाषितं श्रुत्वा निःसृतोऽहं नृपालयात्॥ **4.10.14**॥ 402

अनुयातश्च मां तूर्णमयं भ्राता सुदारुणः।
स तु दृष्ट्वैव मां रात्रौ सद्वितीयं महाबलः॥ **4.10.15**॥ 403

प्राद्रवद् भयसन्त्रस्तो वीक्ष्यावां समुपागतौ।
अभिद्रुतस्तु वेगेन विवेश स महाबिलम्॥ **4.10.16**॥ 404

तं प्रविष्टं विदित्वा तु सुघोरं सुमहद्बिलम्।
अयमुक्तोऽथ मे भ्राता मया तु क्रूरदर्शनः॥ **4.10.17**॥ 405

अहत्वा नास्ति मे शक्तिः प्रतिगन्तुमितः पुरीम्।
बिलद्वारि प्रतीक्ष त्वं यावदेनं निहन्म्यहम्॥ **4.10.18**॥ 406

स्थितोऽयमिति मत्वाहं प्रविष्टस्तु दुरासदम्।
तं मे मार्गयतस्तत्र गतः संवत्सरस्तदा॥ **4.10.19**॥ 407

स तु दृष्टो मया शत्रुरनिर्वेदाद् भयावहः।
निहतश्च मया सद्यः स सर्वैः सह बन्धुभिः॥ **4.10.20**॥ 408

तस्यास्यात्तु प्रवृत्तेन रुधिरौघेण तद्बिलम्।
पूर्णमासीद् दुराक्रामं स्तनतस्तस्य भूतले॥ **4.10.21**॥ 409

सूदयित्वा तु तं शत्रुं विक्रान्तं तमहं सुखम्।
निष्क्रामं नैव पश्यामि बिलस्य पिहितं मुखम्॥ **4.10.22**॥ 410

विक्रोशमानस्य तु मे सुग्रीवेति पुनः पुनः।
यतः प्रतिवचो नास्ति ततोऽहं भृशदुःखितः॥ **4.10.23**॥ 411

पादप्रहारैस्तु मया बहुभिः परिपातितम्।
ततोऽहं तेन निष्क्रम्य पथा पुरमुपागतः॥ **4.10.24**॥ 412

तत्रानेनास्मि संरुद्धो राज्यं मृगयताऽऽत्मनः।
सुग्रीवेण नृशंसेन विस्मृत्य भ्रातृसौहृदम्॥ **4.10.25**॥ 413

एवमुक्त्वा तु मां तत्र वस्त्रेणैकेन वानरः।
तदा निर्वासयामास वाली विगतसाध्वसः॥ **4.10.26**॥ 414

तेनाहमपविद्धश्च हृतदारश्च राघव।
तद्भयाच्च महीं सर्वां क्रान्तवान् सवनार्णवाम्॥ **4.10.27**॥ 415

ऋष्यमूकं गिरिवरं भार्याहरणदुःखितः।
प्रविष्टोऽस्मि दुराधर्षं वालिनः कारणान्तरे॥ **4.10.28**॥ 416

एतत्ते सर्वमाख्यातं वैरानुकथनं महत्।
अनागसा मया प्राप्तं व्यसनं पश्य राघव॥ **4.10.29**॥ 417

वालिनश्च भयात् तस्य सर्वलोकभयापह।
कर्तुमर्हसि मे वीर प्रसादं तस्य निग्रहात्॥ **4.10.30**॥ 418

एवमुक्तः स तेजस्वी धर्मज्ञो धर्मसंहितम्।
वचनं वक्तुमारेभे सुग्रीवं प्रहसन्निव॥ **4.10.31**॥ 419

अमोघाः सूर्यसङ्काशा निशिता मे शरा इमे।
तस्मिन् वालिनि दुर्वृत्ते पतिष्यन्ति रुषान्विताः॥ **4.10.32**॥ 420

यावत् तं नहि पश्येयं तव भार्यापहारिणम्।
तावत् स जीवेत् पापात्मा वाली चारित्रदूषकः॥ **4.10.33**॥ 421

आत्मानुमानात् पश्यामि मग्नस्त्वं शोकसागरे।
त्वामहं तारयिष्यामि बाढं प्राप्स्यसि पुष्कलम्॥ **4.10.34**॥ 422

तस्य तद् वचनं श्रुत्वा हर्षपौरुषवर्धनम्।
सुग्रीवः परमप्रीतः सुमहद्वाक्यमब्रवीत्॥ **4.10.35**॥ 423

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
किष्किन्धाकाण्डे दशमः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ एकादशः सर्गः ॥

सुग्रीवेण वालिनः पराक्रमस्य वर्णनं वालिना दुन्दुभिं हत्वा तस्य शवस्य मतङ्गवने क्षेपणं मतङ्गमुनिना वालिने शापदानं श्रीरामेण दुन्दुभेरस्थिसमूहस्य दूरे क्षेपणं सुग्रीवेण तं प्रति सालभेदनार्थमाग्रहकरणम्

रामस्य वचनं श्रुत्वा हर्षपौरुषवर्धनम्।
सुग्रीवः पूजयाञ्चक्रे राघवं प्रशशंस च॥ **4.11.1** ॥ 424

असंशयं प्रज्वलितैस्तीक्ष्णैर्मर्मातिगैः शरैः।
त्वं दहेः कुपितो लोकान् युगान्त इव भास्करः॥ **4.11.2** ॥ 425

वालिनः पौरुषं यत्तद् यच्च वीर्यं धृतिश्च या।
तन्ममैकमनाः श्रुत्वा विधत्स्व यदनन्तरम्॥ **4.11.3** ॥ 426

समुद्रात् पश्चिमात् पूर्वं दक्षिणादपि चोत्तरम्।
क्रामत्यनुदिते सूर्ये वाली व्यपगतक्लमः॥ **4.11.4** ॥ 427

अग्राण्यारुह्य शैलानां शिखराणि महान्त्यपि।
ऊर्ध्वमुत्पात्य तरसा प्रतिगृह्णाति वीर्यवान्॥ **4.11.5** ॥ 428

बहवः सारवन्तश्च वनेषु विविधा द्रुमाः।
वालिना तरसा भग्ना बलं प्रथयताऽऽत्मनः॥ **4.11.6** ॥ 429

महिषो दुन्दुभिर्नाम कैलासशिखरप्रभः।
बलं नागसहस्रस्य धारयामास वीर्यवान्॥ **4.11.7** ॥ 430

स वीर्योत्सेकदुष्टात्मा वरदानेन मोहितः।
जगाम स महाकायः समुद्रं सरितां पतिम्॥ **4.11.8**॥ 431

ऊर्मिमन्तमतिक्रम्य सागरं रत्नसञ्चयम्।
मम युद्धं प्रयच्छेति तमुवाच महार्णवम्॥ **4.11.9**॥ 432

ततः समुद्रो धर्मात्मा समुत्थाय महाबलः।
अब्रवीद् वचनं राजन्नसुरं कालचोदितम्॥ **4.11.10**॥ 433

समर्थो नास्मि ते दातुं युद्धं युद्धविशारद।
श्रूयतां त्वभिधास्यामि यस्ते युद्धं प्रदास्यति॥ **4.11.11**॥ 434

शैलराजो महारण्ये तपस्विशरणं परम्।
शङ्करश्वशुरो नाम्ना हिमवानिति विश्रुतः॥ **4.11.12**॥ 435

महाप्रस्रवणोपेतो बहुकन्दरनिर्झरः।
स समर्थस्तव प्रीतिमतुलां कर्तुमर्हति॥ **4.11.13**॥ 436

तं भीतमिति विज्ञाय समुद्रमसुरोत्तमः।
हिमवद्वनमागम्य शरश्चापादिव च्युतः॥ **4.11.14**॥ 437

ततस्तस्य गिरेः श्वेता गजेन्द्रप्रतिमाः शिलाः।
चिक्षेप बहुधा भूमौ दुन्दुभिर्विननाद च॥ **4.11.15**॥ 438

ततः श्वेताम्बुदाकारः सौम्यः प्रीतिकराकृतिः।
हिमवानब्रवीद् वाक्यं स्व एव शिखरे स्थितः॥ **4.11.16**॥ 439

क्लेष्टुमर्हसि मां न त्वं दुन्दुभे धर्मवत्सल।
रणकर्मस्वकुशलस्तपस्विशरणो ह्यहम्॥ **4.11.17**॥ 440

तस्य तद् वचनं श्रुत्वा गिरिराजस्य धीमतः।
उवाच दुन्दुभिर्वाक्यं क्रोधात् संरक्तलोचनः॥ **4.11.18**॥ 441

यदि युद्धेऽसमर्थस्त्वं मद्भयाद् वा निरुद्यमः।
तमाचक्ष्व प्रदद्यान्मे यो हि युद्धं युयुत्सतः॥ **4.11.19**॥ 442

हिमवानब्रवीद् वाक्यं श्रुत्वा वाक्यविशारदः।
अनुक्तपूर्वं धर्मात्मा क्रोधात् तमसुरोत्तमम्॥ **4.11.20**॥ 443

वाली नाम महाप्राज्ञ शक्रपुत्रः प्रतापवान्।
अध्यास्ते वानरः श्रीमान् किष्किन्धामतुलप्रभाम्॥ **4.11.21**॥ 444

स समर्थो महाप्राज्ञस्तव युद्धविशारदः।
द्वन्द्वयुद्धं स दातुं ते नमुचेरिव वासवः॥ **4.11.22**॥ 445

तं शीघ्रमभिगच्छ त्वं यदि युद्धमिहेच्छसि।
स हि दुर्मर्षणो नित्यं शूरः समरकर्मणि॥ **4.11.23**॥ 446

श्रुत्वा हिमवतो वाक्यं कोपाविष्टः स दुन्दुभिः।
जगाम तां पुरीं तस्य किष्किन्धां वालिनस्तदा॥ **4.11.24**॥ 447

धारयन् माहिषं रूपं तीक्ष्णशृङ्गो भयावहः।
प्रावृषीव महामेघस्तोयपूर्णो नभस्तले॥ **4.11.25**॥ 448

ततस्तु द्वारमागम्य किष्किन्धाया महाबलः।
ननर्द कम्पयन् भूमिं दुन्दुभिर्दुन्दुभिर्यथा॥ **4.11.26**॥ 449

समीपजान् द्रुमान् भञ्जन् वसुधां दारयन् खुरैः।
विषाणेनोल्लिखन् दर्पात् तद्द्वारं द्विरदो यथा॥ **4.11.27**॥ 450

अन्तःपुरगतो वाली श्रुत्वा शब्दममर्षणः।
निष्पपात सह स्त्रीभिस्ताराभिरिव चन्द्रमाः॥ **4.11.28**॥ 451

मितं व्यक्ताक्षरपदं तमुवाच स दुन्दुभिम्।
हरीणामीश्वरो वाली सर्वेषां वनचारिणाम्॥ **4.11.29**॥ 452

किमर्थं नगरद्वारमिदं रुद्ध्वा विनर्दसे।
दुन्दुभे विदितो मेऽसि रक्ष प्राणान् महाबल॥ **4.11.30**॥ 453

तस्य तद् वचनं श्रुत्वा वानरेन्द्रस्य धीमतः।
उवाच दुन्दुभिर्वाक्यं क्रोधात् संरक्तलोचनः॥ **4.11.31**॥ 454

न त्वं स्त्रीसन्निधौ वीर वचनं वक्तुमर्हसि।
मम युद्धं प्रयच्छाद्य ततो ज्ञास्यामि ते बलम्॥ **4.11.32**॥ 455

अथवा धारयिष्यामि क्रोधमद्य निशामिमाम्।
गृह्यतामुदयः स्वैरं कामभोगेषु वानर॥ **4.11.33**॥ 456

दीयतां सम्प्रदानं च परिष्वज्य च वानरान्।
सर्वशाखामृगेन्द्रस्त्वं संसादय सुहृज्जनम्॥ **4.11.34**॥ 457

सुदृष्टां कुरु किष्किन्धां कुरुष्वात्मसमं पुरे।
क्रीडस्व च समं स्त्रीभिरहं ते दर्पशासनः॥ **4.11.35**॥ 458

यो हि मत्तं प्रमत्तं वा भग्नं वा रहितं कृशम्।
हन्यात् स भ्रूणहा लोके त्वद्विधं मदमोहितम्॥ **4.11.36**॥ 459

स प्रहस्याब्रवीन्मन्दं क्रोधात् तमसुरेश्वरम्।
विसृज्य ताः स्त्रियः सर्वास्ताराप्रभृतिकास्तदा॥ **4.11.37**॥ 460

मत्तोऽयमिति मा मंस्था यद्यभीतोऽसि संयुगे।
मदोऽयं सम्प्रहारेऽस्मिन् वीरपानं समर्थ्यताम्॥ **4.11.38**॥ 461

तमेवमुक्त्वा सङ्क्रुद्धो मालामुत्क्षिप्य काञ्चनीम्।
पित्रा दत्तां महेन्द्रेण युद्धाय व्यवतिष्ठत॥ **4.11.39**॥ 462

विषाणयोर्गृहीत्वा तं दुन्दुभिं गिरिसन्निभम्।
आविध्यत तथा वाली विनदन् कपिकुञ्जरः॥ **4.11.40**॥ 463

बलाद् व्यापादयाञ्चक्रे ननर्द च महास्वनम्।
श्रोत्राभ्यामथ रक्तं तु तस्य सुस्राव पात्यतः॥ **4.11.41**॥ 464

तयोस्तु क्रोधसंरम्भात् परस्परजयैषिणोः।
युद्धं समभवद् घोरं दुन्दुभेर्वालिनस्तथा॥ **4.11.42**॥ 465

अयुध्यत तदा वाली शक्रतुल्यपराक्रमः।
मुष्टिभिर्जानुभिः पद्भिः शिलाभिः पादपैस्तथा॥ **4.11.43**॥ 466

परस्परं घ्नतोस्तत्र वानरासुरयोस्तदा।
आसीद्भीनोऽसुरो युद्धे शक्रसूनुर्व्यवर्धत॥ **4.11.44**॥ 467

तं तु दुन्दुभिमुद्यम्य धरण्यामभ्यपातयत्।
युद्धे प्राणहरे तस्मिन्निष्पिष्टो दुन्दुभिस्तदा॥ **4.11.45**॥ 468

स्रोतोभ्यो बहु रक्तं तु तस्य सुस्राव पात्यतः।
पपात च महाबाहुः क्षितौ पञ्चत्वमागतः॥ **4.11.46**॥ 469

तं तोलयित्वा बाहुभ्यां गतसत्त्वमचेतनम्।
चिक्षेप वेगवान् वाली वेगेनैकेन योजनम्॥ **4.11.47**॥ 470

तस्य वेगप्रविद्धस्य वक्त्रात् क्षतजबिन्दवः।
प्रपेतुर्मारुतोत्क्षिप्ता मतङ्गस्याश्रमं प्रति॥ **4.11.48**॥ 471

तान् दृष्ट्वा पतितांस्तत्र मुनिः शोणितविप्रुषः।
क्रुद्धस्तस्य महाभाग चिन्तयामास को न्वयम्॥ **4.11.49**॥ 472

येनाहं सहसा स्पृष्टः शोणितेन दुरात्मना।
कोऽयं दुरात्मा दुर्बुद्धिरकृतात्मा च बालिशः॥ **4.11.50**॥ 473

इत्युक्त्वा स विनिष्क्रम्य ददृशे मुनिसत्तमः।
महिषं पर्वताकारं गतासुं पतितं भुवि॥ **4.11.51**॥ 474

स तु विज्ञाय तपसा वानरेण कृतं हि तत्।
उत्ससर्ज महाशापं क्षेप्तारं वानरं प्रति॥ **4.11.52**॥ 475

इह तेनाप्रवेष्टव्यं प्रविष्टस्य वधो भवेत्।
वनं मत्संश्रयं येन दूषितं रुधिरस्रवैः॥ **4.11.53**॥ 476

क्षिपता पादपाश्चेमे सम्भग्नाश्चासुरीं तनुम्।
समन्तादाश्रमं पूर्ण योजनं मामकं यदि॥ **4.11.54**॥ 477

आगमिष्यति दुर्बुद्धिर्व्यक्तं स न भविष्यति।
ये चास्य सचिवाः केचित् संश्रिता मामकं वनम्॥ **4.11.55**॥ 478

न च तैरिह वस्तव्यं श्रुत्वा यान्तु यथासुखम्।
तेऽपि वा यदि तिष्ठन्ति शपिष्ये तानपि ध्रुवम्॥ **4.11.56**॥ 479

वनेऽस्मिन् मामके नित्यं पुत्रवत् परिरक्षिते।
पत्राङ्कुरविनाशाय फलमूलाभवाय च॥ **4.11.57**॥ 480

दिवसश्चाद्य मर्यादा यं द्रष्टा श्वोऽस्मि वानरम्।
बहुवर्षसहस्राणि स वै शैलो भविष्यति॥ **4.11.58**॥ 481

ततस्ते वानराः श्रुत्वा गिरं मुनिसमीरिताम्।
निश्चक्रमुर्वनात् तस्मात् तान् दृष्ट्वा वालिरब्रवीत्॥ **4.11.59**॥ 482

किं भवन्तः समस्ताश्च मतङ्गवनवासिनः।
मत्समीपमनुप्राप्ता अपि स्वस्ति वनौकसाम्॥ **4.11.60**॥ 483

ततस्ते कारणं सर्वं तथा शापं च वालिनः।
शशंसुर्वानराः सर्वे वालिने हेममालिने॥ **4.11.61**॥ 484

एतच्छ्रुत्वा तदा वाली वचनं वानरेरितम्।
स महर्षिं समासाद्य याचते स्म कृताञ्जलिः॥ **4.11.62**॥ 485

महर्षिस्तमनादृत्य प्रविवेशाश्रमं प्रति।
शापधारणभीतस्तु वाली विह्वलतां गतः॥ **4.11.63**॥ 486

ततः शापभयाद् भीतो ऋष्यमूकं महागिरिम्।
प्रवेष्टुं नेच्छति हरिर्द्रष्टुं वापि नरेश्वर॥ **4.11.64**॥ 487

तस्याप्रवेशं ज्ञात्वाहमिदं राम महावनम्।
विचरामि सहामात्यो विषादेन विवर्जितः॥ **4.11.65**॥ 488

एषोऽस्थिनिचयस्तस्य दुन्दुभेः सम्प्रकाशते।
वीर्योत्सेकान्निरस्तस्य गिरिकूटनिभो महान्॥ **4.11.66**॥ 489

इमे च विपुलाः सालाः सप्त शाखावलम्बिनः।
यत्रैकं घटते वाली निष्पत्रयितुमोजसा॥ **4.11.67**॥ 490

एतदस्यासमं वीर्यं मया राम प्रकाशितम्।
कथं तं वालिनं हन्तुं समरे शक्ष्यसे नृप॥ **4.11.68**॥ 491

तथा ब्रुवाणं सुग्रीवं प्रहसन् लक्ष्मणोऽब्रवीत्।
कस्मिन् कर्मणि निर्वृत्ते श्रद्दध्या वालिनो वधम्॥ **4.11.69**॥ 492

तमुवाचाथ सुग्रीवः सप्त सालानिमान् पुरा।
एवमेकैकशो वाली विव्याधाथ स चासकृत्॥ **4.11.70**॥ 493

रामो निर्दारयेदेषां बाणेनैकेन च द्रुमम्।
वालिनं निहतं मन्ये दृष्ट्वा रामस्य विक्रमम्॥ **4.11.71**॥ 494

हतस्य महिषस्यास्थि पादेनैकेन लक्ष्मण।
उद्यम्य प्रक्षिपेच्चापि तरसा द्वे धनुःशते॥ **4.11.72**॥ 495

एवमुक्त्वा तु सुग्रीवो रामं रक्तान्तलोचनम्।
ध्यात्वा मुहूर्तं काकुत्स्थं पुनरेव वचोऽब्रवीत्॥ **4.11.73**॥ 496

शूरश्च शूरमानी च प्रख्यातबलपौरुषः।
बलवान् वानरो वाली संयुगेष्वपराजितः॥ **4.11.74**॥ 497

दृश्यन्ते चास्य कर्माणि दुष्कराणि सुरैरपि।
यानि सञ्चिन्त्य भीतोऽहमृष्यमूकमुपाश्रितः॥ **4.11.75**॥ 498

तमजय्यमधृष्यं च वानरेन्द्रममर्षणम्।
विचिन्तयन्न मुञ्चापि ऋष्यमूकममुं त्वहम्॥ **4.11.76**॥ 499

उद्विग्नः शङ्कितश्चाहं विचरामि महावने।
अनुरक्तैः सहामात्यैर्हनुमत्प्रमुखैर्वरैः॥ **4.11.77**॥ 500

उपलब्धं च मे श्लाघ्यं सन्मित्रं मित्रवत्सल।
त्वामहं पुरुषव्याघ्र हिमवन्तमिवाश्रितः॥ **4.11.78**॥ 501

किं तु तस्य बलज्ञोऽहं दुर्भ्रातुर्बलशालिनः।
अप्रत्यक्षं तु मे वीर्यं समरे तव राघव॥ **4.11.79**॥ 502

न खल्वहं त्वां तुलये नावमन्ये न भीषये।
कर्मभिस्तस्य भीमैश्च कातर्यं जनितं मम॥ **4.11.80**॥ 503

कामं राघव ते वाणी प्रमाणं धैर्यमाकृतिः।
सूचयन्ति परं तेजो भस्मच्छन्नमिवानलम्॥ **4.11.81**॥ 504

तस्य तद् वचनं श्रुत्वा सुग्रीवस्य महात्मनः।
स्मितपूर्वमथो रामः प्रत्युवाच हरिं प्रति॥ **4.11.82**॥ 505

यदि न प्रत्ययोऽस्मासु विक्रमे तव वानर।
प्रत्ययं समरे श्लाघ्यमहमुत्पादयामि ते॥ **4.11.83**॥ 506

एवमुक्त्वा तु सुग्रीवं सान्त्वयन् लक्ष्मणाग्रजः।
राघवो दुन्दुभेः कायं पादाङ्गुष्ठेन लीलया॥ **4.11.84**॥ 507

तोलयित्वा महाबाहुश्चिक्षेप दशयोजनम्।
असुरस्य तनुं शुष्कां पादाङ्गुष्ठेन वीर्यवान्॥ **4.11.85**॥ 508

क्षिप्तं दृष्ट्वा ततः कायं सुग्रीवः पुनरब्रवीत्।
लक्ष्मणस्याग्रतो रामं तपन्तमिव भास्करम्।
हरीणामग्रतो वीरमिदं वचनमर्थवत्॥ **4.11.86**॥ 509

आर्द्रः समांसः प्रत्यग्रः क्षिप्तः कायः पुरा सखे।
परिश्रान्तेन मत्तेन भ्रात्रा मे वालिना तदा॥ **4.11.87**॥ 510

लघुः सम्प्रति निर्मांसस्तृणभूतश्च राघव।
क्षिप्त एवं प्रहर्षेण भवता रघुनन्दन॥ **4.11.88**॥ 511

नात्र शक्यं बलं ज्ञातुं तव वा तस्य वाधिकम्।
आर्द्रं शुष्कमिति ह्येतत् सुमहद् राघवान्तरम्॥ **4.11.89**॥ 512

स एव संशयस्तात तव तस्य च यद्बलम्।
सालमेकं विनिर्भिद्य भवेद् व्यक्तिर्बलाबले॥ **4.11.90**॥ 513

कृत्वैतत् कार्मुकं सज्यं हस्तिहस्तमिवाततम्।
आकर्णपूर्णमायम्य विसृजस्व महाशरम्॥ **4.11.91**॥ 514

इमं हि सालं प्रहितस्त्वया शरो
न संशयोऽत्रास्ति विदारयिष्यति।
अलं विमर्शेन मम प्रियं ध्रुवं
कुरुष्व राजन् प्रतिशापितो मया॥ **4.11.92**॥ 515

यथा हि तेजःसु वरः सदा रवि -
र्यथा हि शैलो हिमवान् महाद्रिषु।

यथा चतुष्पात्सु च केसरी वर -
स्तथा नराणामसि विक्रमे वरः ॥ **4.11.93** ॥ 516

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
किष्किन्धाकाण्डे एकादशः सर्गः ॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ द्वादशः सर्गः ॥

श्रीरामेण सप्तसालवृक्षाणां भेदनं श्रीरामस्याज्ञया सुग्रीवेण किष्किन्धायामागत्य वालिनो युद्धायाह्वानं युद्धे ततः पराजितस्य तस्य मतङ्गवने पलायनं तत्र श्रीरामेण तस्य समाश्वासनं तदभिज्ञानार्थं गले गजपुष्पीलतां निक्षिप्य तस्य पुनः प्रेषणं च

एतच्च वचनं श्रुत्वा सुग्रीवस्य सुभाषितम्।
प्रत्ययार्थं महातेजा रामो जग्राह कार्मुकम्॥ **4.12.1**॥ 517

स गृहीत्वा धनुर्घोरं शरमेकं च मानदः।
सालमुद्दिश्य चिक्षेप पूरयन् स रवैर्दिशः॥ **4.12.2**॥ 518

स विसृष्टो बलवता बाणः स्वर्णपरिष्कृतः।
भित्त्वा सालान् गिरिप्रस्थं सप्तभूमिं विवेश ह॥ **4.12.3**॥ 519

सायकस्तु मुहूर्तेन सालान् भित्त्वा महाजवः।
निष्पत्य च पुनस्तूर्णं तमेव प्रविवेश ह॥ **4.12.4**॥ 520

तान् दृष्ट्वा सप्त निर्भिन्नान् सालान् वानरपुङ्गवः।
रामस्य शरवेगेन विस्मयं परमं गतः॥ **4.12.5**॥ 521

स मूर्ध्ना न्यपतद् भूमौ प्रलम्बीकृतभूषणः।
सुग्रीवः परमप्रीतो राघवाय कृताञ्जलिः॥ **4.12.6**॥ 522

इदं चोवाच धर्मज्ञं कर्मणा तेन हर्षितः।
रामं सर्वास्त्रविदुषां श्रेष्ठं शूरमवस्थितम्॥ **4.12.7**॥ 523

सेन्द्रानपि सुरान् सर्वांस्त्वं बाणैः पुरुषर्षभ।
समर्थः समरे हन्तुं किं पुनर्वालिनं प्रभो॥ **4.12.8**॥ 524

येन सप्त महासाला गिरिर्भूमिश्च दारिताः।
बाणेनैकेन काकुत्स्थ स्थाता ते को रणाग्रतः॥ **4.12.9**॥ 525

अद्य मे विगतः शोकः प्रीतिरद्य परा मम।
सुहृदं त्वां समासाद्य महेन्द्रवरुणोपमम्॥ **4.12.10**॥ 526

तमद्यैव प्रियार्थं मे वैरिणं भ्रातृरूपिणम्।
वालिनं जहि काकुत्स्थ मया बद्धोऽयमञ्जलिः॥ **4.12.11**॥ 527

ततो रामः परिष्वज्य सुग्रीवं प्रियदर्शनम्।
प्रत्युवाच महाप्राज्ञो लक्ष्मणानुगतं वचः॥ **4.12.12**॥ 528

अस्माद्गच्छाम किष्किन्धां क्षिप्रं गच्छ त्वमग्रतः।
गत्वा चाह्वय सुग्रीव वालिनं भ्रातृगन्धिनम्॥ **4.12.13**॥ 529

सर्वे ते त्वरितं गत्वा किष्किन्धां वालिनः पुरीम्।
वृक्षैरात्मानमावृत्य ह्यतिष्ठन् गहने वने॥ **4.12.14**॥ 530

सुग्रीवोऽप्यनदद् घोरं वालिनो ह्वानकारणात्।
गाढं परिहितो वेगान्नादैर्भिन्दन्निवाम्बरम्॥ **4.12.15**॥ 531

तं श्रुत्वा निनदं भ्रातुः क्रुद्धो वाली महाबलः।
निष्पपात सुसंरब्धो भास्करोऽस्ततटादिव॥ **4.12.16**॥ 532

ततः सुतुमुलं युद्धं वालिसुग्रीवयोरभूत्।
गगने ग्रहयोर्घोरं बुधाङ्गारकयोरिव॥ **4.12.17**॥ 533

तलैरशनिकल्पैश्च वज्रकल्पैश्च मुष्टिभिः।
जघ्नतुः समरेऽन्योन्यं भ्रातरौ क्रोधमूर्च्छितौ॥ **4.12.18**॥ 534

ततो रामो धनुष्पाणिस्तावुभौ समुदैक्षत।
अन्योन्यसदृशौ वीरावुभौ देवाविवाश्विनौ॥ **4.12.19**॥ 535

यन्नावगच्छत् सुग्रीवं वालिनं वापि राघवः।
ततो न कृतवान् बुद्धिं मोक्तुमन्तकरं शरम्॥ **4.12.20**॥ 536

एतस्मिन्नन्तरे भग्नः सुग्रीवस्तेन वालिना।
अपश्यन् राघवं नाथमृष्यमूकं प्रदुद्रुवे॥ **4.12.21**॥ 537

क्लान्तो रुधिरसिक्ताङ्गः प्रहारैर्जर्जरीकृतः।
वालिनाभिद्रुतः क्रोधात् प्रविवेश महावनम्॥ **4.12.22**॥ 538

तं प्रविष्टं वनं दृष्ट्वा वाली शापभयात् ततः।
मुक्तो ह्यसि त्वमित्युक्त्वा स निवृत्तो महाबलः॥ **4.12.23**॥ 539

राघवोऽपि सह भ्रात्रा सह चैव हनूमता।
तदेव वनमागच्छत् सुग्रीवो यत्र वानरः॥ **4.12.24**॥ 540

तं समीक्ष्यागतं रामं सुग्रीवः सहलक्ष्मणम्।
ह्रीमान् दीनमुवाचेदं वसुधामवलोकयन्॥ **4.12.25**॥ 541

आह्वयस्वेति मामुक्त्वा दर्शयित्वा च विक्रमम्।
वैरिणा घातयित्वा च किमिदानीं त्वया कृतम्॥ **4.12.26**॥ 542

तामेव वेलां वक्तव्यं त्वया राघव तत्त्वतः।
वालिनं न निहन्मीति ततो नाहमितो व्रजे॥ **4.12.27**॥ 543

तस्य चैवं ब्रुवाणस्य सुग्रीवस्य महात्मनः।
करुणं दीनया वाचा राघवः पुनरब्रवीत्॥ **4.12.28**॥ 544

सुग्रीव श्रूयतां तात क्रोधश्च व्यपनीयताम्।
कारणं येन बाणोऽयं स मया न विसर्जितः॥ **4.12.29**॥ 545

अलङ्कारेण वेषेण प्रमाणेन गतेन च।
त्वं च सुग्रीव वाली च सदृशौ स्थः परस्परम्॥ **4.12.30**॥ 546

स्वरेण वर्चसा चैव प्रेक्षितेन च वानर।
विक्रमेण च वाक्यैश्च व्यक्तिं वां नोपलक्षये॥ **4.12.31**॥ 547

ततोऽहं रूपसादृश्यान्मोहितो वानरोत्तम।
नोत्सृजामि महावेगं शरं शत्रुनिबर्हणम्॥ **4.12.32**॥ 548

जीवितान्तकरं घोरं सादृश्यात् तु विशङ्कितः।
मूलघातो न नौ स्याद्धि द्वयोरिति कृतो मया॥ **4.12.33**॥ 549

त्वयि वीर विपन्ने हि अज्ञानाल्लाघवान्मया।
मौढ्यं च मम बाल्यं च ख्यापितं स्यात् कपीश्वर॥ **4.12.34**॥ 550

दत्ताभयवधो नाम पातकं महदद्भुतम्।
अहं च लक्ष्मणश्चैव सीता च वरवर्णिनी॥ **4.12.35**॥ 551

त्वदधीना वयं सर्वे वनेऽस्मिन् शरणं भवान्।
तस्माद् युध्यस्व भूयस्त्वं मा माशङ्कीश्च वानर॥ **4.12.36**॥ 552

एतन्मुहूर्ते तु मया पश्य वालिनमाहवे।
निरस्तमिषुणैकेन चेष्टमानं महीतले॥ **4.12.37**॥ 553

अभिज्ञानं कुरुष्व त्वमात्मनो वानरेश्वर।
येन त्वामभिजानीयां द्वन्द्वयुद्धमुपागतम्॥ **4.12.38**॥ 554

गजपुष्पीमिमां फुल्लामुत्पाट्य शुभलक्षणाम्।
कुरु लक्ष्मण कण्ठेऽस्य सुग्रीवस्य महात्मनः॥ **4.12.39**॥ 555

ततो गिरितटे जातामुत्पाट्य कुसुमायुताम्।
लक्ष्मणो गजपुष्पीं तां तस्य कण्ठे व्यसर्जयत्॥ **4.12.40**॥ 556

स तया शुशुभे श्रीमान् लतया कण्ठसक्तया।
मालयेव बलाकानां ससन्ध्य इव तोयदः॥ **4.12.41**॥ 557

विभ्राजमानो वपुषा रामवाक्यसमाहितः।
जगाम सह रामेण किष्किन्धां पुनराप सः॥ **4.12.42**॥ 558

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
किष्किन्धाकाण्डे द्वादशः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ त्रयोदशः सर्गः ॥

श्रीरामादीनां मार्गे वृक्षान् विविधजन्तून्ज्जलाशयांश्च सप्तजनाश्रमं च दूरतः पश्यतां पुनः किष्किन्धायां प्रवेशः

ऋष्यमूकात् स धर्मात्मा किष्किन्धां लक्ष्मणाग्रजः।
जगाम सह सुग्रीवो वालिविक्रमपालिताम्॥ **4.13.1**॥ 559

समुद्यम्य महच्चापं रामः काञ्चनभूषितम्।
शरांश्चादित्यसङ्काशान् गृहीत्वा रणसाधकान्॥ **4.13.2**॥ 560

अग्रतस्तु ययौ तस्य राघवस्य महात्मनः।
सुग्रीवः संहतग्रीवो लक्ष्मणश्च महाबलः॥ **4.13.3**॥ 561

पृष्ठतो हनुमान् वीरो नलो नीलश्च वीर्यवान्।
तारश्चैव महातेजा हरियूथपयूथपः॥ **4.13.4**॥ 562

ते वीक्षमाणा वृक्षांश्च पुष्पभारावलम्बिनः।
प्रसन्नाम्बुवहाश्चैव सरितः सागरङ्गमाः॥ **4.13.5**॥ 563

कन्दराणि च शैलांश्च निर्दराणि गुहास्तथा।
शिखराणि च मुख्यानि दरीश्च प्रियदर्शनाः॥ **4.13.6**॥ 564

वैदूर्यविमलैस्तोयैः पद्मैश्चाकोशकुड्मलैः।
शोभितान् सजलान् मार्गे तटाकांश्चावलोकयन्॥ **4.13.7**॥ 565

कारण्डैः सारसैर्हंसैर्वञ्जुलैर्जलकुक्कुटैः।
चक्रवाकैस्तथा चान्यैः शकुनैः प्रतिनादितान्॥ **4.13.8**॥ 566

मृदुशष्पाङ्कुराहारान्निर्भयान् वनगोचरान्।
चरतः सर्वतः पश्यन् स्थलीषु हरिणान् स्थितान्॥ **4.13.9**॥ 567

तटाकवैरिणश्चापि शुक्लदन्तविभूषितान्।
घोरानेकचरान् वन्यान् द्विरदान् कूलघातिनः॥ **4.13.10**॥ 568

मत्तान् गिरितटोत्कृष्टान् पर्वतानिव जङ्गमान्।
वानरान् द्विरदप्रख्यान् महीरेणुसमुक्षितान्॥ **4.13.11**॥ 569

वने वनचरांश्चान्यान् खेचरांश्च विहङ्गमान्।
पश्यन्तस्त्वरिता जग्मुः सुग्रीववशवर्तिनः॥ **4.13.12**॥ 570

तेषां तु गच्छतां तत्र त्वरितं रघुनन्दनः।
द्रुमषण्डवनं दृष्ट्वा रामः सुग्रीवमब्रवीत्॥ **4.13.13**॥ 571

एष मेघ इवाकाशे वृक्षषण्डः प्रकाशते।
मेघसङ्घातविपुलः पर्यन्तकदलीवृतः॥ **4.13.14**॥ 572

किमेतज्ज्ञातुमिच्छामि सखे कौतूहलं मम।
कौतूहलापनयनं कर्तुमिच्छाम्यहं त्वया॥ **4.13.15**॥ 573

तस्य तद्वचनं श्रुत्वा राघवस्य महात्मनः।
गच्छन्नेवाचचक्षेऽथ सुग्रीवस्तन्महद् वनम्॥ **4.13.16**॥ 574

एतद् राघव विस्तीर्णमाश्रमं श्रमनाशनम्।
उद्यानवनसम्पन्नं स्वादुमूलफलोदकम्॥ **4.13.17**॥ 575

अत्र सप्तजना नाम मुनयः संशितव्रताः।
सप्तैवासन्नधःशीर्षा नियतं जलशायिनः॥ **4.13.18**॥ 576

सप्तरात्रे कृताहारा वायुनाचलवासिनः।
दिवं वर्षशतैर्याताः सप्तभिः सकलेवराः॥ **4.13.19**॥ 577

तेषामेतत्प्रभावेण द्रुमप्राकारसंवृतम्।
आश्रमं सुदुराधर्षमपि सेन्द्रैः सुरासुरैः॥ **4.13.20**॥ 578

पक्षिणो वर्जयन्त्येतत् तथान्ये वनचारिणः।
विशन्ति मोहाद् येऽप्यत्र न निवर्तन्ति ते पुनः॥ **4.13.21**॥ 579

विभूषणरवाश्चात्र श्रूयन्ते सकलाक्षराः।
तूर्यगीतस्वनश्चापि गन्धो दिव्यश्च राघव॥ **4.13.22**॥ 580

त्रेताग्नयोऽपि दीप्यन्ते धूमो ह्येष प्रदृश्यते।
वेष्टयन्निव वृक्षाग्रान् कपोताङ्गारुणो घनः॥ **4.13.23**॥ 581

एते वृक्षाः प्रकाशन्ते धूमसंसक्तमस्तकाः।
मेघजालप्रतिच्छन्ना वैडूर्यगिरयो यथा॥ **4.13.24**॥ 582

कुरु प्रणामं धर्मात्मंस्तेषामुद्दिश्य राघव।
लक्ष्मणेन सह भ्रात्रा प्रयतः संहताञ्जलिः॥ **4.13.25**॥ 583

प्रणमन्ति हि ये तेषामृषीणां भावितात्मनाम्।
न तेषामशुभं किञ्चिच्छरीरे राम विद्यते॥ **4.13.26**॥ 584

ततो रामः सह भ्रात्रा लक्ष्मणेन कृताञ्जलिः।
समुद्दिश्य महात्मानस्तानृषीनभ्यवादयत्॥ **4.13.27**॥ 585

अभिवाद्य च धर्मात्मा रामो भ्राता च लक्ष्मणः।
सुग्रीवो वानराश्चैव जग्मुः संहृष्टमानसाः॥ **4.13.28**॥ 586

ते गत्वा दूरमध्वानं तस्मात् सप्तजनाश्रमात्।
ददृशुस्तां दुराधर्षां किष्किन्धां वालिपालिताम्॥ **4.13.29**॥ 587

ततस्तु रामानुजरामवानराः
प्रगृह्य शस्त्राण्युदितोग्रतेजसः।
पुरीं सुरेशात्मजवीर्यपालितां
वधाय शत्रोः पुनरागतास्त्विह ॥ 4.13.30 ॥ 588

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
किष्किन्धाकाण्डे त्रयोदशः सर्गः ॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ चतुर्दशः सर्गः ॥

वालिनो वधाय श्रीरामस्याश्वासनं प्राप्य सुग्रीवस्य घोरं गर्जनम्

सर्वे ते त्वरितं गत्वा किष्किन्धां वालिनः पुरीम्।
वृक्षैरात्मानमावृत्य व्यतिष्ठन् गहने वने ॥ **4.14.1** ॥ 589

विसार्य सर्वतो दृष्टिं कानने काननप्रियः।
सुग्रीवो विपुलग्रीवः क्रोधमाहारयद् भृशम् ॥ **4.14.2** ॥ 590

ततस्तु निनदं घोरं कृत्वा युद्धाय चाह्वयत्।
परिवारैः परिवृतो नादैर्भिन्दन्निवाम्बरम् ॥ **4.14.3** ॥ 591

गर्जन्निव महामेघो वायुवेगपुरःसरः।
अथ बालार्कसदृशो दृप्तसिंहगतिस्ततः ॥ **4.14.4** ॥ 592

दृष्ट्वा रामं क्रियादक्षं सुग्रीवो वाक्यमब्रवीत्।
हरिवागुरया व्याप्तां तप्तकाञ्चनतोरणाम् ॥ **4.14.5** ॥ 593

प्राप्ताः स्म ध्वजयन्त्राढ्यां किष्किन्धां वालिनः पुरीम्।
प्रतिज्ञा या कृता वीर त्वया वालिवधे पुरा ॥ **4.14.6** ॥ 594

सफलां कुरु तां क्षिप्रं लतां काल इवागतः।
एवमुक्तस्तु धर्मात्मा सुग्रीवेण स राघवः ॥ **4.14.7** ॥ 595

तमेवोवाच वचनं सुग्रीवं शत्रुसूदनः।
कृताभिज्ञानचिह्नस्त्वमनया गजसाह्वया॥ **4.14.8**॥ 596

लक्ष्मणेन समुत्पाट्य एषा कण्ठे कृता तव।
शोभसेऽप्यधिकं वीर लतया कण्ठसक्तया॥ **4.14.9**॥ 597

विपरीत इवाकाशे सूर्यो नक्षत्रमालया।
अद्य वालिसमुत्थं ते भयं वैरं च वानर॥ **4.14.10**॥ 598

एकेनाहं प्रमोक्ष्यामि बाणमोक्षेण संयुगे।
मम दर्शय सुग्रीव वैरिणं भ्रातृरूपिणम्॥ **4.14.11**॥ 599

वाली विनिहतो यावद्भने पांसुषु चेष्टते।
यदि दृष्टिपथं प्राप्तो जीवन् स विनिवर्तते॥ **4.14.12**॥ 600

ततो दोषेण मा गच्छेत् सद्यो गर्हेच्च मां भवान्।
प्रत्यक्षं सप्त ते साला मया बाणेन दारिताः॥ **4.14.13**॥ 601

तेनावेहि बलेनाद्य वालिनं निहतं रणे।
अनृतं नोक्तपूर्वं मे चिरं कृच्छ्रेऽपि तिष्ठता॥ **4.14.14**॥ 602

धर्मलोभपरीतेन न च वक्ष्ये कथञ्चन।
सफलां च करिष्यामि प्रतिज्ञां जहि सम्भ्रमम्॥ **4.14.15**॥ 603

प्रसूतं कलमक्षेत्रं वर्षेणेव शतक्रतुः।
तदाह्वाननिमित्तं च वालिनो हेममालिनः॥ **4.14.16**॥ 604

सुग्रीव कुरु तं शब्दं निष्पतेद् येन वानरः।
जितकाशी जयश्लाघी त्वया चाधर्षितः पुरात्॥ **4.14.17**॥ 605

निष्पतिष्यत्यसङ्गेन वाली स प्रियसंयुगः।
रिपूणां धर्षितं श्रुत्वा मर्षयन्ति न संयुगे॥ **4.14.18**॥ 606

जानन्तस्तु स्वकं वीर्यं स्त्रीसमक्षं विशेषतः।
स तु रामवचः श्रुत्वा सुग्रीवो हेमपिङ्गलः॥ **4.14.19**॥ 607

ननर्द क्रूरनादेन विनिर्भिन्दन्निवाम्बरम्।
तत्र शब्देन वित्रस्ता गावो यान्ति हतप्रभाः॥ **4.14.20**॥ 608

राजदोषपरामृष्टाः कुलस्त्रिय इवाकुलाः।
द्रवन्ति च मृगाः शीघ्रं भग्ना इव रणे हयाः।
पतन्ति च खगा भूमौ क्षीणपुण्या इव ग्रहाः॥ **4.14.21**॥ 609

ततः स जीमूतकृतप्रणादो
नादं ह्यमुञ्चत् त्वरया प्रतीतः।
सूर्यात्मजः शौर्यविवृद्धतेजाः
सरित्पतिर्वानिलचञ्चलोर्मिः॥ **4.14.22**॥ 610

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
किष्किन्धाकाण्डे चतुर्दशः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ पञ्चदशः सर्गः ॥

सुग्रीवस्य सिंहनादमाकर्ण्य वालिनो युद्धाय निर्गमनं तारया तमवरुद्ध्य सुग्रीवेण श्रीरामेण च सह मैत्रीं कर्तुं तस्य प्रबोधनं च

अथ तस्य निनादं तं सुग्रीवस्य महात्मनः।
शुश्रावान्तःपुरगतो वाली भ्रातुरमर्षणः॥ **4.15.1** ॥ 611

श्रुत्वा तु तस्य निनदं सर्वभूतप्रकम्पनम्।
मदश्चैकपदे नष्टः क्रोधश्चापादितो महान्॥ **4.15.2** ॥ 612

ततो रोषपरीताङ्गो वाली स कनकप्रभः।
उपरक्त इवादित्यः सद्यो निष्प्रभतां गतः॥ **4.15.3** ॥ 613

वाली दंष्ट्राकरालस्तु क्रोधाद् दीप्ताग्निलोचनः।
भात्युत्पतितपद्माभः समृणाल इव ह्रदः॥ **4.15.4** ॥ 614

शब्दं दुर्मर्षणं श्रुत्वा निष्पपात ततो हरिः।
वेगेन च पदन्यासैर्दारयन्निव मेदिनीम्॥ **4.15.5** ॥ 615

तं तु तारा परिष्वज्य स्नेहाद् दर्शितसौहृदा।
उवाच त्रस्तसम्भ्रान्ता हितोदर्कमिदं वचः॥ **4.15.6** ॥ 616

साधु क्रोधमिमं वीर नदीवेगमिवागतम्।
शयनादुत्थितः काल्यं त्यज भुक्तामिव स्रजम्॥ **4.15.7** ॥ 617

काल्यमेतेन सङ्ग्रामं करिष्यसि च वानर।
वीर ते शत्रुबाहुल्यं फल्गुता वा न विद्यते॥ **4.15.8**॥ 618

सहसा तव निष्क्रामो मम तावन्न रोचते।
श्रूयतामभिधास्यामि यन्निमित्तं निवार्यते॥ **4.15.9**॥ 619

पूर्वमापतितः क्रोधात् स त्वामाह्वयते युधि।
निष्पत्य च निरस्तस्ते हन्यमानो दिशो गतः॥ **4.15.10**॥ 620

त्वया तस्य निरस्तस्य पीडितस्य विशेषतः।
इहैत्य पुनराह्वानं शङ्कां जनयतीव मे॥ **4.15.11**॥ 621

दर्पश्च व्यवसायश्च यादृशस्तस्य नर्दतः।
निनादस्य च संरम्भो नैतदल्पं हि कारणम्॥ **4.15.12**॥ 622

नासहायमहं मन्ये सुग्रीवं तमिहागतम्।
अवष्टब्धसहायश्च यमाश्रित्यैष गर्जति॥ **4.15.13**॥ 623

प्रकृत्या निपुणश्चैव बुद्धिमांश्चैव वानरः।
नापरीक्षितवीर्येण सुग्रीवः सख्यमेष्यति॥ **4.15.14**॥ 624

पूर्वमेव मया वीर श्रुतं कथयतो वचः।
अङ्गदस्य कुमारस्य वक्ष्याम्यद्य हितं वचः॥ **4.15.15**॥ 625

अङ्गदस्तु कुमारोऽयं वनान्तमुपनिर्गतः।
प्रवृत्तिस्तेन कथिता चारैरासीन्निवेदिता॥ **4.15.16**॥ 626

अयोध्याधिपतेः पुत्रौ शूरौ समरदुर्जयौ।
इक्ष्वाकूणां कुले जातौ प्रथितौ रामलक्ष्मणौ॥ **4.15.17**॥ 627

सुग्रीवप्रियकामार्थं प्राप्तौ तत्र दुरासदौ।
स ते भ्रातुर्हि विख्यातः सहायो रणकर्मणि॥ **4.15.18**॥ 628

रामः परबलामर्दी युगान्ताग्निरिवोत्थितः।
निवासवृक्षः साधूनामापन्नानां परा गतिः॥ **4.15.19**॥ 629

आर्तानां संश्रयश्चैव यशसश्चैकभाजनम्।
ज्ञानविज्ञानसम्पन्नो निदेशे निरतः पितुः॥ **4.15.20**॥ 630

धातूनामिव शैलेन्द्रो गुणानामाकरो महान्।
तत् क्षमो न विरोधस्ते सह तेन महात्मना॥ **4.15.21**॥ 631

दुर्जयेनाप्रमेयेण रामेण रणकर्मसु।
शूर वक्ष्यामि ते किञ्चिन्न चेच्छाम्यभ्यसूयितुम्॥ **4.15.22**॥ 632

श्रूयतां क्रियतां चैव तव वक्ष्यामि यद्धितम्।
यौवराज्येन सुग्रीवं तूर्णं साध्वभिषेचय॥ **4.15.23**॥ 633

विग्रहं मा कृथा वीर भ्रात्रा राजन् यवीयसा।
अहं हि ते क्षमं मन्ये तेन रामेण सौहृदम्॥ **4.15.24**॥ 634

सुग्रीवेण च सम्प्रीतिं वैरमुत्सृज्य दूरतः।
लालनीयो हि ते भ्राता यवीयानेष वानरः॥ **4.15.25**॥ 635

तत्र वा सन्निहस्थो वा सर्वथा बन्धुरेव ते।
नहि तेन समं बन्धुं भुवि पश्यामि कञ्चन॥ **4.15.26**॥ 636

दानमानादिसत्कारैः कुरुष्व प्रत्यनन्तरम्।
वैरमेतत् समुत्सृज्य तव पार्श्वे स तिष्ठतु॥ **4.15.27**॥ 637

सुग्रीवो विपुलग्रीवो महाबन्धुर्मतस्तव।
भ्रातृसौहृदमालम्ब्य नान्या गतिरिहास्ति ते॥ **4.15.28**॥ 638

यदि ते मत्प्रियं कार्यं यदि चावैषि मां हिताम्।
याच्यमानः प्रियत्वेन साधु वाक्यं कुरुष्व मे॥ **4.15.29**॥ 639

प्रसीद पथ्यं शृणु जल्पितं हि मे
न रोषमेवानुविधातुमर्हसि।
क्षमो हि ते कोशलराजसूनुना
न विग्रहः शक्रसमानतेजसा॥ **4.15.30**॥ 640

तदा हि तारा हितमेव वाक्यं
तं वालिनं पथ्यमिदं बभाषे।
न रोचते तद् वचनं हि तस्य
कालाभिपन्नस्य विनाशकाले॥ **4.15.31**॥ 641

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
किष्किन्धाकाण्डे पञ्चदशः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ षोडशः सर्गः ॥

वालिना तारां निर्भर्त्स्य निवर्तनं सुग्रीवेण सह योधनं च श्रीरामेण बाणेन विद्धस्य तस्य पृथ्व्यां पतनं च

तामेवं ब्रुवतीं तारां ताराधिपनिभाननाम्।
वाली निर्भर्त्सयामास वचनं चेदमब्रवीत्॥ **4.16.1** ॥ 642

गर्जतोऽस्य सुसंरब्धं भ्रातुः शत्रोर्विशेषतः।
मर्षयिष्यामि केनापि कारणेन वरानने॥ **4.16.2** ॥ 643

अधर्षितानां शूराणां समरेष्वनिवर्तिनाम्।
धर्षणामर्षणं भीरु मरणादतिरिच्यते॥ **4.16.3** ॥ 644

सोढुं न च समर्थोऽहं युद्धकामस्य संयुगे।
सुग्रीवस्य च संरम्भं हीनग्रीवस्य गर्जितम्॥ **4.16.4** ॥ 645

न च कार्यो विषादस्ते राघवं प्रति मत्कृते।
धर्मज्ञश्च कृतज्ञश्च कथं पापं करिष्यति॥ **4.16.5** ॥ 646

निवर्तस्व सह स्त्रीभिः कथं भूयोऽनुगच्छसि।
सौहृदं दर्शितं तावन्मयि भक्तिस्त्वया कृता॥ **4.16.6** ॥ 647

प्रतियोत्स्याम्यहं गत्वा सुग्रीवं जहि सम्भ्रमम्।
दर्पं चास्य विनेष्यामि न च प्राणैर्वियोक्ष्यते॥ **4.16.7** ॥ 648

अहं ह्याजिस्थितस्यास्य करिष्यामि यदीप्सितम्।
वृक्षैर्मुष्टिप्रहारैश्च पीडितः प्रतियास्यति॥ **4.16.8**॥ 649

न मे गर्वितमायस्तं सहिष्यति दुरात्मवान्।
कृतं तारे सहायत्वं दर्शितं सौहृदं मयि॥ **4.16.9**॥ 650

शापितासि मम प्राणैर्निवर्तस्व जनेन च।
अलं जित्वा निवर्तिष्ये तमहं भ्रातरं रणे॥ **4.16.10**॥ 651

तं तु तारा परिष्वज्य वालिनं प्रियवादिनी।
चकार रुदती मन्दं दक्षिणा सा प्रदक्षिणम्॥ **4.16.11**॥ 652

ततः स्वस्त्ययनं कृत्वा मन्त्रविद् विजयैषिणी।
अन्तःपुरं सह स्त्रीभिः प्रविष्टा शोकमोहिता॥ **4.16.12**॥ 653

प्रविष्टायां तु तारायां सह स्त्रीभिः स्वमालयम्।
नगर्या निर्ययौ क्रुद्धो महासर्प इव श्वसन्॥ **4.16.13**॥ 654

स निःश्वस्य महारोषो वाली परमवेगवान्।
सर्वतश्चारयन् दृष्टिं शत्रुदर्शनकाङ्क्षया॥ **4.16.14**॥ 655

स ददर्श ततः श्रीमान् सुग्रीवं हेमपिङ्गलम्।
सुसंवीतमवष्टब्धं दीप्यमानमिवानलम्॥ **4.16.15**॥ 656

तं स दृष्ट्वा महाबाहुः सुग्रीवं पर्यवस्थितम्।
गाढं परिदधे वासो वाली परमकोपनः॥ **4.16.16**॥ 657

स वाली गाढसंवीतो मुष्टिमुद्यम्य वीर्यवान्।
सुग्रीवमेवाभिमुखो ययौ योद्धुं कृतक्षणः॥ **4.16.17**॥ 658

श्लिष्टं मुष्टिं समुद्यम्य संरब्धतरमागतः।
सुग्रीवोऽपि समुद्दिश्य वालिनं हेममालिनम्॥ **4.16.18**॥ 659

तं वाली क्रोधताम्राक्षः सुग्रीवं रणकोविदम्।
आपतन्तं महावेगमिदं वचनमब्रवीत्॥ **4.16.19**॥ 660

एष मुष्टिर्महान् बद्धो गाढः सुनियताङ्गुलिः।
मया वेगविमुक्तस्ते प्राणानादाय यास्यति॥ **4.16.20**॥ 661

एवमुक्तस्तु सुग्रीवः क्रुद्धो वालिनमब्रवीत्।
तव चैष हरन् प्राणान् मुष्टिः पततु मूर्धनि॥ **4.16.21**॥ 662

ताडितस्तेन तं क्रुद्धः समभिक्रम्य वेगतः।
अभवच्छोणितोद्गारी सापीड इव पर्वतः॥ **4.16.22**॥ 663

सुग्रीवेण तु निःशङ्कं सालमुत्पाट्य तेजसा।
गात्रेष्वभिहतो वाली वज्रेणेव महागिरिः॥ **4.16.23**॥ 664

स तु वृक्षेण निर्भग्नः सालताडनविह्वलः।
गुरुभारभराक्रान्ता नौः ससार्थेव सागरे॥ **4.16.24**॥ 665

तौ भीमबलविक्रान्तौ सुपर्णसमवेगितौ।
प्रवृद्धौ घोरवपुषौ चन्द्रसूर्याविवाम्बरे॥ **4.16.25**॥ 666

परस्परमभित्रघ्नौ छिद्रान्वेषणतत्परौ।
ततोऽवर्धत वाली तु बलवीर्यसमन्वितः॥ **4.16.26**॥ 667

सूर्यपुत्रो महावीर्यः सुग्रीवः परिहीयत।
वालिना भग्नदर्पस्तु सुग्रीवो मन्दविक्रमः॥ **4.16.27**॥ 668

वालिनं प्रति सामर्षो दर्शयामास राघवम्।
वृक्षैः सशाखैः शिखरैर्वज्रकोटिनिभैर्नखैः॥ **4.16.28**॥ 669

मुष्टिभिर्जानुभिः पद्भिर्बाहुभिश्च पुनः पुनः।
तयोर्युद्धमभूद्घोरं वृत्रवासवयोरिव॥ **4.16.29**॥ 670

तौ शोणिताक्तौ युध्येतां वानरौ वनचारिणौ।
मेघाविव महाशब्दैस्तर्जमानौ परस्परम्॥ **4.16.30**॥ 671

हीयमानमथापश्यत् सुग्रीवं वानरेश्वरम्।
प्रेक्षमाणं दिशश्चैव राघवः स मुहुर्मुहुः॥ **4.16.31**॥ 672

ततो रामो महातेजा आर्तं दृष्ट्वा हरीश्वरम्।
स शरं वीक्षते वीरो वालिनो वधकाङ्क्षया॥ **4.16.32**॥ 673

ततो धनुषि सन्धाय शरमाशीविषोपमम्।
पूरयामास तच्चापं कालचक्रमिवान्तकः॥ **4.16.33**॥ 674

तस्य ज्यातलघोषेण त्रस्ताः पत्ररथेश्वराः।
प्रदुद्रुवुर्मृगाश्चैव युगान्त इव मोहिताः॥ **4.16.34**॥ 675

मुक्तस्तु वज्रनिर्घोषः प्रदीप्ताशनिसन्निभः।
राघवेण महाबाणो वालिवक्षसि पातितः॥ **4.16.35**॥ 676

ततस्तेन महातेजा वीर्ययुक्तः कपीश्वरः।
वेगेनाभिहतो वाली निपपात महीतले॥ **4.16.36**॥ 677

इन्द्रध्वज इवोद्धूतः पौर्णमास्यां महीतले।
आश्वयुक्समये मासि गतश्रीको विचेतनः।
बाष्पसंरुद्धकण्ठस्तु वाली चार्तस्वरः शनैः॥ **4.16.37**॥ 678

नरोत्तमः कालयुगान्तकोपमं
शरोत्तमं काञ्चनरूप्यभूषितम्।
ससर्ज दीप्तं तममित्रमर्दनं
सधूममग्निं मुखतो यथा हरः॥ **4.16.38**॥ 679

अथोक्षितः शोणिततोयविस्रवैः
सुपुष्पिताशोक इवानिलोद्धतः।
विचेतनो वासवसूनुराहवे
प्रभ्रंशितेन्द्रध्वजवत् क्षितिं गतः॥ **4.16.39**॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
किष्किन्धाकाण्डे षोडशः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ सप्तदशः सर्गः ॥

वालिना श्रीरामस्य भर्त्सनम्

ततः शरेणाभिहतो रामेण रणकर्कशः।
पपात सहसा वाली निकृत्त इव पादपः॥ **4.17.1** ॥ 681

स भूमौ न्यस्तसर्वाङ्गस्तप्तकाञ्चनभूषणः।
अपतद् देवराजस्य मुक्तरश्मिरिव ध्वजः॥ **4.17.2** ॥ 682

अस्मिन् निपतिते भूमौ हर्यृक्षाणां गणेश्वरे।
नष्टचन्द्रमिव व्योम न व्यराजत मेदिनी॥ **4.17.3** ॥ 683

भूमौ निपतितस्यापि तस्य देहं महात्मनः।
न श्रीर्जहाति न प्राणा न तेजो न पराक्रमः॥ **4.17.4** ॥ 684

शक्रदत्ता वरा माला काञ्चनी रत्नभूषिता।
दधार हरिमुख्यस्य प्राणांस्तेजः श्रियं च सा॥ **4.17.5** ॥ 685

स तया मालया वीरो हैमया हरियूथपः।
सन्ध्यानुगतपर्यन्तः पयोधर इवाभवत्॥ **4.17.6** ॥ 686

तस्य माला च देहश्च मर्मघाती च यः शरः।
त्रिधेव रचिता लक्ष्मीः पतितस्यापि शोभते॥ **4.17.7** ॥ 687

तदस्त्रं तस्य वीरस्य स्वर्गमार्गप्रभावनम्।
रामबाणासनक्षिप्तमावहत् परमां गतिम्॥ **4.17.8**॥ 688

तं तथा पतितं सङ्ख्ये गतार्चिषमिवानलम्।
ययातिमिव पुण्यान्ते देवलोकादिह च्युतम्॥ **4.17.9**॥ 689

आदित्यमिव कालेन युगान्ते भुवि पातितम्।
महेन्द्रमिव दुर्धर्षमुपेन्द्रमिव दुःसहम्॥ **4.17.10**॥ 690

महेन्द्रपुत्रं पतितं वालिनं हेममालिनम्।
व्यूढोरस्कं महाबाहुं दीप्तास्यं हरिलोचनम्॥ **4.17.11**॥ 691

लक्ष्मणानुचरो रामो ददर्शोपससर्प च।
तं तथा पतितं वीरं गतार्चिषमिवानलम्॥ **4.17.12**॥ 692

बहुमान्य च तं वीरं वीक्षमाणं शनैरिव।
उपयातौ महावीर्यौ भ्रातरौ रामलक्ष्मणौ॥ **4.17.13**॥ 693

तं दृष्ट्वा राघवं वाली लक्ष्मणं च महाबलम्।
अब्रवीत् परुषं वाक्यं प्रश्रितं धर्मसंहितम्॥ **4.17.14**॥ 694

स भूमावल्पतेजोऽसुर्निहतो नष्टचेतनः।
अर्थसंहितया वाचा गर्वितं रणगर्वितम्॥ **4.17.15**॥ 695

त्वं नराधिपतेः पुत्रः प्रथितः प्रियदर्शनः।
पराङ्मुख वधं कृत्वा कोऽत्र प्राप्तस्त्वया गुणः।
यदहं युद्धसंरब्धस्त्वत्कृते निधनं गतः॥ **4.17.16**॥ 696

कुलीनः सत्त्वसम्पन्नस्तेजस्वी चरितव्रतः।
रामः करुणवेदी च प्रजानां च हिते रतः॥ **4.17.17**॥ 697

सानुक्रोशो महोत्साहः समयज्ञो दृढव्रतः।
इत्येतत् सर्वभूतानि कथयन्ति यशो भुवि॥ **4.17.18**॥ 698

दमः शमः क्षमा धर्मो धृतिः सत्यं पराक्रमः।
पार्थिवानां गुणा राजन् दण्डश्चाप्यपकारिषु॥ **4.17.19**॥ 699

तान् गुणान् सम्प्रधार्याहमग्र्यं चाभिजनं तव।
तारया प्रतिषिद्धः सन् सुग्रीवेण समागतः॥ **4.17.20**॥ 700

न मामन्येन संरब्धं प्रमत्तं वेद्धुमर्हसि।
इति मे बुद्धिरुत्पन्ना बभूवादर्शने तव॥ **4.17.21**॥ 701

स त्वां विनिहतात्मानं धर्मध्वजमधार्मिकम्।
जाने पापसमाचारं तृणैः कूपमिवावृतम्॥ **4.17.22**॥ 702

सतां वेषधरं पापं प्रच्छन्नमिव पावकम्।
नाहं त्वामभिजानामि धर्मच्छद्माभिसंवृतम्॥ **4.17.23**॥ 703

विषये वा पुरे वा ते यदा पापं करोम्यहम्।
न च त्वामवजानेऽहं कस्मात् तं हंस्यकिल्बिषम्॥ **4.17.24**॥ 704

फलमूलाशनं नित्यं वानरं वनगोचरम्।
मामिहाप्रतियुध्यन्तमन्येन च समागतम्॥ **4.17.25**॥ 705

त्वं नराधिपतेः पुत्रः प्रतीतः प्रियदर्शनः।
लिङ्गमप्यस्ति ते राजन् दृश्यते धर्मसंहितम्॥ **4.17.26**॥ 706

कः क्षत्रियकुले जातः श्रुतवान् नष्टसंशयः।
धर्मलिङ्गप्रतिच्छन्नः क्रूरं कर्म समाचरेत्॥ **4.17.27**॥ 707

त्वं राघवकुले जातो धर्मवानिति विश्रुतः।
अभव्यो भव्यरूपेण किमर्थं परिधावसे॥ **4.17.28**॥ 708

साम दानं क्षमा धर्मः सत्यं धृतिपराक्रमौ।
पार्थिवानां गुणा राजन् दण्डश्चाप्यपकारिषु॥ **4.17.29**॥ 709

वयं वनचरा राम मृगा मूलफलाशिनः।
एषा प्रकृतिरस्माकं पुरुषस्त्वं नरेश्वर॥ **4.17.30**॥ 710

भूमिर्हिरण्यं रूपं च विग्रहे कारणानि च।
तत्र कस्ते वने लोभो मदीयेषु फलेषु वा॥ **4.17.31**॥ 711

नयश्च विनयश्चोभौ निग्रहानुग्रहावपि।
राजवृत्तिरसङ्कीर्णा न नृपाः कामवृत्तयः॥ **4.17.32**॥ 712

त्वं तु कामप्रधानश्च कोपनश्चानवस्थितः।
राजवृत्तेषु सङ्कीर्णः शरासनपरायणः॥ **4.17.33**॥ 713

न तेऽस्त्यपचितिधर्मे नार्थे बुद्धिरवस्थिता।
इन्द्रियैः कामवृत्तः सन् कृष्यसे मनुजेश्वर॥ **4.17.34**॥ 714

हत्वा बाणेन काकुत्स्थ मामिहानपराधिनम्।
किं वक्ष्यसि सतां मध्ये कर्म कृत्वा जुगुप्सितम्॥ **4.17.35**॥ 715

राजहा ब्रह्महा गोघ्नश्चोरः प्राणिवधे रतः।
नास्तिकः परिवेत्ता च सर्वे निरयगामिनः॥ **4.17.36**॥ 716

सूचकश्च कदर्यश्च मित्रघ्नो गुरुतल्पगः।
लोकं पापात्मनामेते गच्छन्ते नात्र संशयः॥ **4.17.37**॥ 717

अधार्यं चर्म मे सद्भी रोमाण्यस्थि च वर्जितम्।
अभक्ष्याणि च मांसानि त्वद्विधैर्धर्मचारिभिः॥ **4.17.38**॥ 718

पञ्च पञ्चनखा भक्ष्या ब्रह्मक्षत्रेण राघव।
शल्यकः श्वाविधो गोधा शशः कूर्मश्च पञ्चमः॥ **4.17.39**॥ 719

चर्म चास्थि च मे राम न स्पृशन्ति मनीषिणः।
अभक्ष्याणि च मांसानि सोऽहं पञ्चनखो हतः॥ **4.17.40**॥ 720

तारया वाक्यमुक्तोऽहं सत्यं सर्वज्ञया हितम्।
तदतिक्रम्य मोहेन कालस्य वशमागतः॥ **4.17.41**॥ 721

त्वया नाथेन काकुत्स्थ न सनाथा वसुन्धरा।
प्रमदा शीलसम्पूर्णा पत्येव च विधर्मणा॥ **4.17.42**॥ 722

शठो नैकृतिकः क्षुद्रो मिथ्याप्रश्रितमानसः।
कथं दशरथेन त्वं जातः पापो महात्मना॥ **4.17.43**॥ 723

छिन्नचारित्र्यकक्ष्येण सतां धर्मातिवर्तिना।
त्यक्तधर्माङ्कुशेनाहं निहतो रामहस्तिना॥ **4.17.44**॥ 724

अशुभं चाप्ययुक्तं च सतां चैव विगर्हितम्।
वक्ष्यसे चेदृशं कृत्वा सद्भिः सह समागतः॥ **4.17.45**॥ 725

उदासीनेषु योऽस्मासु विक्रमोऽयं प्रकाशितः।
अपकारिषु ते राम नैवं पश्यामि विक्रमम्॥ **4.17.46**॥ 726

दृश्यमानस्तु युध्येथा मया युधि नृपात्मज।
अद्य वैवस्वतं देवं पश्येस्त्वं निहतो मया॥ **4.17.47**॥ 727

त्वयादृश्येन तु रणे निहतोऽहं दुरासदः।
प्रसुप्तः पन्नगेनैव नरः पापवशं गतः॥ **4.17.48**॥ 728

सुग्रीवप्रियकामेन यदहं निहतस्त्वया।
मामेव यदि पूर्वं त्वमेतदर्थमचोदयः।
मैथिलीमहमेकाह्ना तव चानीतवान् भवेः॥ **4.17.49**॥ 729

राक्षसं च दुरात्मानं तव भार्यापहारिणम्।
कण्ठे बद्ध्वा प्रदद्यां तेऽनिहतं रावणं रणे॥ **4.17.50**॥ 730

न्यस्तां सागरतोये वा पाताले वापि मैथिलीम्।
आनयेयं तवादेशाच्छ्वेतामश्वतरीमिव॥ **4.17.51**॥ 731

युक्तं यत्प्राप्नुयाद् राज्यं सुग्रीवः स्वर्गते मयि।
अयुक्तं यदधर्मेण त्वयाहं निहतो रणे॥ **4.17.52**॥ 732

काममेवंविधो लोकः कालेन विनियुज्यते।
क्षमं चेद्भवता प्राप्तमुत्तरं साधु चिन्त्यताम्॥ **4.17.53**॥ 733

इत्येवमुक्त्वा परिशुष्कवक्त्रः
शराभिघाताद् व्यथितो महात्मा।
समीक्ष्य रामं रविसन्निकाशं
तूष्णीं बभौ वानरराजसूनुः॥ **4.17.54**॥ 734

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
किष्किन्धाकाण्डे सप्तदशः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ अष्टादशः सर्गः ॥

वालिनो वचनस्योत्तरं ददता श्रीरामेण तस्मै दत्तस्य दण्डस्य यथौचित्यं सिद्ध्येत्तथा प्रतिपादनं स्वापराधक्षमामभ्यर्थयता निरुत्तरेण वालिनाङ्गदरक्षार्थं प्रार्थनाकरणं श्रीरामेण तस्मै सान्त्वनाप्रदानं च

इत्युक्तः प्रश्रितं वाक्यं धर्मार्थसहितं हितम्।
परुषं वालिना रामो निहतेन विचेतसा ॥ **4.18.1** ॥ 735

तं निष्प्रभमिवादित्यं मुक्ततोयमिवाम्बुदम्।
उक्तवाक्यं हरिश्रेष्ठमुपशान्तमिवानलम् ॥ **4.18.2** ॥ 736

धर्मार्थगुणसम्पन्नं हरीश्वरमनुत्तमम्।
अधिक्षिप्तस्तदा रामः पश्चाद् वालिनमब्रवीत् ॥ **4.18.3** ॥ 737

धर्ममर्थं च कामं च समयं चापि लौकिकम्।
अविज्ञाय कथं बाल्यान्मामिहाद्य विगर्हसे ॥ **4.18.4** ॥ 738

अपृष्ट्वा बुद्धिसम्पन्नान् वृद्धानाचार्यसम्मतान्।
सौम्य वानरचापल्यात् त्वं मां वक्तुमिहेच्छसि ॥ **4.18.5** ॥ 739

इक्ष्वाकूणामियं भूमिः सशैलवनकानना।
मृगपक्षिमनुष्याणां निग्रहानुग्रहेष्वपि ॥ **4.18.6** ॥ 740

तां पालयति धर्मात्मा भरतः सत्यवानृजुः।
धर्मकामार्थतत्त्वज्ञो निग्रहानुग्रहे रतः ॥ **4.18.7** ॥ 741

नयश्च विनयश्चोभौ यस्मिन् सत्यं च सुस्थितम्।
विक्रमश्च यथा दृष्टः स राजा देशकालवित्॥ **4.18.8**॥ 742

तस्य धर्मकृतादेशा वयमन्ये च पार्थिवाः।
चरामो वसुधां कृत्स्नां धर्मसन्तानमिच्छवः॥ **4.18.9**॥ 743

तस्मिन् नृपतिशार्दूले भरते धर्मवत्सले।
पालयत्यखिलां पृथ्वीं कश्चरेद् धर्मविप्रियम्॥ **4.18.10**॥ 744

ते वयं मार्गविभ्रष्टं स्वधर्मे परमे स्थिताः।
भरताज्ञां पुरस्कृत्य निगृह्णीमो यथाविधि॥ **4.18.11**॥ 745

त्वं तु सङ्क्लिष्टधर्मश्च कर्मणा च विगर्हितः।
कामतन्त्रप्रधानश्च न स्थितो राजवर्त्मनि॥ **4.18.12**॥ 746

ज्येष्ठो भ्राता पिता वापि यश्च विद्यां प्रयच्छति।
त्रयस्ते पितरो ज्ञेया धर्मे च पथि वर्तिनः॥ **4.18.13**॥ 747

यवीयानात्मनः पुत्रः शिष्यश्चापि गुणोदितः।
पुत्रवत्ते त्रयश्चिन्त्या धर्मश्चैवात्र कारणम्॥ **4.18.14**॥ 748

सूक्ष्मः परमदुर्ज्ञेयः सतां धर्मः प्लवङ्गम।
हृदिस्थः सर्वभूतानामात्मा वेद शुभाशुभम्॥ **4.18.15**॥ 749

चपलश्चपलैः सार्धं वानरैरकृतात्मभिः।
जात्यन्ध इव जात्यन्धैर्मन्त्रयन् प्रेक्षसे नु किम्॥ **4.18.16**॥ 750

अहं तु व्यक्ततामस्य वचनस्य ब्रवीमि ते।
नहि मां केवलं रोषात् त्वं विगर्हितुमर्हसि॥ **4.18.17**॥ 751

तदेतत् कारणं पश्य यदर्थं त्वं मया हतः।
भ्रातुर्वर्तसि भार्यायां त्यक्त्वा धर्मं सनातनम्॥ **4.18.18**॥ 752

अस्य त्वं धरमाणस्य सुग्रीवस्य महात्मनः।
रुमायां वर्तसे कामात् स्नुषायां पापकर्मकृत्॥ **4.18.19**॥ 753

तद् व्यतीतस्य ते धर्मात् कामवृत्तस्य वानर।
भ्रातृभार्याभिमर्शेऽस्मिन् दण्डोऽयं प्रतिपादितः॥ **4.18.20**॥ 754

नहि लोकविरुद्धस्य लोकवृत्तादपेयुषः।
दण्डादन्यत्र पश्यामि निग्रहं हरियूथप॥ **4.18.21**॥ 755

न च ते मर्षये पापं क्षत्रियोऽहं कुलोद्गतः।
औरसीं भगिनीं वापि भार्यां वाप्यनुजस्य यः॥ **4.18.22**॥ 756

प्रचरेत नरः कामात् तस्य दण्डो वधः स्मृतः।
भरतस्तु महीपालो वयं त्वादेशवर्तिनः॥ **4.18.23**॥ 757

त्वं च धर्मादतिक्रान्तः कथं शक्यमुपेक्षितुम्।
गुरुधर्मव्यतिक्रान्तं प्राज्ञो धर्मेण पालयन्॥ **4.18.24**॥ 758

भरतः कामयुक्तानां निग्रहे पर्यवस्थितः।
वयं तु भरतादेशावधिं कृत्वा हरीश्वर।
त्वद्विधान् भिन्नमर्यादान् निग्रहीतुं व्यवस्थिताः॥ **4.18.25**॥ 759

सुग्रीवेण च मे सख्यं लक्ष्मणेन यथा तथा।
दारराज्यनिमित्तं च निःश्रेयसकरः स मे॥ **4.18.26**॥ 760

प्रतिज्ञा च मया दत्ता तदा वानरसन्निधौ।
प्रतिज्ञा च कथं शक्या मद्विधेनानवेक्षितुम्॥ **4.18.27**॥ 761

तदेभिः कारणैः सर्वैर्महद्भिर्धर्मसंश्रितैः।
शासनं तव यद् युक्तं तद् भवाननुमन्यताम्॥ **4.18.28**॥ 762

सर्वथा धर्म इत्येव द्रष्टव्यस्तव निग्रहः।
वयस्यस्योपकर्तव्यं धर्ममेवानुपश्यता॥ **4.18.29**॥ 763

शक्यं त्वयापि तत्कार्यं धर्ममेवानुवर्तता।
श्रूयते मनुना गीतौ श्लोकौ चारित्रवत्सलौ।
गृहीतौ धर्मकुशलैस्तथा तच्चरितं मया॥ **4.18.30**॥ 764

राजभिर्धृतदण्डाश्च कृत्वा पापानि मानवाः।
निर्मलाः स्वर्गमायान्ति सन्तः सुकृतिनो यथा॥ **4.18.31**॥ 765

शासनाद् वापि मोक्षाद् वा स्तेनः पापात् प्रमुच्यते।
राजा त्वशासन् पापस्य तदवाप्नोति किल्बिषम्॥ **4.18.32**॥ 766

आर्येण मम मान्धात्रा व्यसनं घोरमीप्सितम्।
श्रमणेन कृते पापे यथा पापं कृतं त्वया॥ **4.18.33**॥ 767

अन्यैरपि कृतं पापं प्रमत्तैर्वसुधाधिपैः।
प्रायश्चित्तं च कुर्वन्ति तेन तच्छाम्यते रजः॥ **4.18.34**॥ 768

तदलं परितापेन धर्मतः परिकल्पितः।
वधो वानरशार्दूल न वयं स्ववशे स्थिताः॥ **4.18.35**॥ 769

शृणु चाप्यपरं भूयः कारणं हरिपुङ्गव।
तच्छ्रुत्वा हि महद् वीर न मन्युं कर्तुमर्हसि॥ **4.18.36**॥ 770

न मे तत्र मनस्तापो न मन्युर्हरिपुङ्गव।
वागुराभिश्च पाशैश्च कूटैश्च विविधैर्नराः॥ **4.18.37**॥ 771

प्रतिच्छन्नाश्च दृश्याश्च गृह्णन्ति सुबहून् मृगान्।
प्रधावितान् वा वित्रस्तान् विस्रब्धानतिविष्ठितान्॥ **4.18.38**॥ 772

प्रमत्तानप्रमत्तान् वा नरा मांसाशिनो भृशम्।
विध्यन्ति विमुखांश्चापि न च दोषोऽत्र विद्यते॥ **4.18.39**॥ 773

यान्ति राजर्षयश्चात्र मृगयां धर्मकोविदाः।
तस्मात् त्वं निहतो युद्धे मया बाणेन वानर।
अयुध्यन् प्रतियुध्यन् वा यस्माच्छाखामृगो ह्यसि॥ **4.18.40**॥ 774

दुर्लभस्य च धर्मस्य जीवितस्य शुभस्य च।
राजानो वानरश्रेष्ठ प्रदातारो न संशयः॥ **4.18.41**॥ 775

तान् न हिंस्यान्न चाक्रोशेन्नाक्षिपेन्नाप्रियं वदेत्।
देवा मानुषरूपेण चरन्त्येते महीतले॥ **4.18.42**॥ 776

त्वं तु धर्ममविज्ञाय केवलं रोषमास्थितः।
विदूषयसि मां धर्मे पितृपैतामहे स्थितम्॥ **4.18.43**॥ 777

एवमुक्तस्तु रामेण वाली प्रव्यथितो भृशम्।
न दोषं राघवे दध्यौ धर्मेऽधिगतनिश्चयः॥ **4.18.44**॥ 778

प्रत्युवाच ततो रामं प्राञ्जलिर्वानरेश्वरः।
यत् त्वमात्थ नरश्रेष्ठ तत् तथैव न संशयः॥ **4.18.45**॥ 779

प्रतिवक्तुं प्रकृष्टे हि नापकृष्टस्तु शक्नुयात्।
यदयुक्तं मया पूर्वं प्रमादाद् वाक्यमप्रियम्॥ **4.18.46**॥ 780

तत्रापि खलु मां दोषं कर्तुं नार्हसि राघव।
त्वं हि दृष्टार्थतत्त्वज्ञः प्रजानां च हिते रतः।
कार्यकारणसिद्धौ च प्रसन्ना बुद्धिरव्यया॥ **4.18.47**॥ 781

मामप्यवगतं धर्माद् व्यतिक्रान्तपुरस्कृतम्।
धर्मसंहितया वाचा धर्मज्ञ परिपालय॥ **4.18.48**॥ 782

बाष्पसंरुद्धकण्ठस्तु वाली सार्तरवः शनैः।
उवाच रामं सम्प्रेक्ष्य पङ्कलग्न इव द्विपः॥ **4.18.49**॥ 783

न चात्मानमहं शोचे न तारां नापि बान्धवान्।
यथा पुत्रं गुणज्येष्ठमङ्गदं कनकाङ्गदम्॥ **4.18.50**॥ 784

स ममादर्शनाद् दीनो बाल्यात् प्रभृति लालितः।
तटाक इव पीताम्बुरुपशोषं गमिष्यति॥ **4.18.51**॥ 785

बालश्चाकृतबुद्धिश्च एकपुत्रश्च मे प्रियः।
तारेयो राम भवता रक्षणीयो महाबलः॥ **4.18.52**॥ 786

सुग्रीवे चाङ्गदे चैव विधत्स्व मतिमुत्तमाम्।
त्वं हि गोप्ता च शास्ता च कार्याकार्यविधौ स्थितः॥ **4.18.53**॥ 787

या ते नरपते वृत्तिर्भरते लक्ष्मणे च या।
सुग्रीवे चाङ्गदे राजंस्तां चिन्तयितुमर्हसि॥ **4.18.54**॥ 788

मद्दोषकृतदोषां तां यथा तारां तपस्विनीम्।
सुग्रीवो नावमन्येत तथावस्थातुमर्हसि॥ **4.18.55**॥ 789

त्वया ह्यनुगृहीतेन शक्यं राज्यमुपासितुम्।
त्वद्वशे वर्तमानेन तव चित्तानुवर्तिना॥ **4.18.56**॥ 790

शक्यं दिवं चार्जयितुं वसुधां चापि शासितुम्।
त्वत्तोऽहं वधमाकाङ्क्षन् वार्यमाणोऽपि तारया॥ **4.18.57**॥ 791

सुग्रीवेण सह भ्रात्रा द्वन्द्वयुद्धमुपागतः।
इत्युक्त्वा वानरो रामं विरराम हरीश्वरः॥ **4.18.58**॥ 792

स तमाश्वासयद् रामो वालिनं व्यक्तदर्शनम्।
साधुसम्मतया वाचा धर्मतत्त्वार्थयुक्तया॥ **4.18.59**॥ 793

न सन्तापस्त्वया कार्य एतदर्थं प्लवङ्गम।
न वयं भवता चिन्त्या नाप्यात्मा हरिसत्तम।
वयं भवद्विशेषेण धर्मतः कृतनिश्चयाः॥ **4.18.60**॥ 794

दण्ड्ये यः पातयेद् दण्डं दण्ड्यो यश्चापि दण्ड्यते।
कार्यकारणसिद्धार्थावुभौ तौ नावसीदतः॥ **4.18.61**॥ 795

तद् भवान् दण्डसंयोगादस्माद् विगतकल्मषः।
गतः स्वां प्रकृतिं धार्म्यां दण्डदिष्टेन वर्त्मना॥ **4.18.62**॥ 796

त्यज शोकं च मोहं च भयं च हृदये स्थितम्।
त्वया विधानं हर्यग्र्य न शक्यमतिवर्तितुम्॥ **4.18.63**॥ 797

यथा त्वय्यङ्गदो नित्यं वर्तते वानरेश्वर।
तथा वर्तेत सुग्रीवे मयि चापि न संशयः॥ **4.18.64**॥ 798

स तस्य वाक्यं मधुरं महात्मनः
समाहितं धर्मपथानुवर्तितम्।
निशम्य रामस्य रणावमर्दिनो
वचः सुयुक्तं निजगाद वानरः॥ **4.18.65**॥ 799

शराभितप्तेन विचेतसा मया
प्रभाषितस्त्वं यदजानता विभो।
इदं महेन्द्रोपमभीमविक्रम
प्रसादितस्त्वं क्षम मे नरेश्वर॥ **4.18.66**॥ 800

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
किष्किन्धाकाण्डे अष्टादशः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ एकोनविंशः सर्गः ॥

पलायमानैर्वानरैः सह वार्तालापं कृत्वा साङ्गदायास्तारायाः वालिनः समीप आगमनं तस्य दुरवस्थामालोक्य तस्या रोदनं च

स वानरमहाराजः शयानः शरपीडितः।
प्रत्युक्तो हेतुमद्वाक्यैर्नोत्तरं प्रत्यपद्यत ॥ **4.19.1** ॥ 801

अश्मभिः परिभिन्नाङ्गः पादपैराहतो भृशम्।
रामबाणेन चाक्रान्तो जीवितान्ते मुमोह सः ॥ **4.19.2** ॥ 802

तं भार्या बाणमोक्षेण रामदत्तेन संयुगे।
हतं प्लवगशार्दूलं तारा शुश्राव वालिनम् ॥ **4.19.3** ॥ 803

सा सपुत्राप्रियं श्रुत्वा वधं भर्तुः सुदारुणम्।
निष्पपात भृशं तस्मादुद्विग्ना गिरिकन्दरात् ॥ **4.19.4** ॥ 804

ये त्वङ्गदपरीवारा वानरा हि महाबलाः।
ते सकार्मुकमालोक्य रामं त्रस्ताः प्रदुद्रुवुः ॥ **4.19.5** ॥ 805

सा ददर्श ततस्त्रस्तान् हरीनापततो द्रुतम्।
यूथादेव परिभ्रष्टान् मृगान् निहतयूथपान् ॥ **4.19.6** ॥ 806

तानुवाच समासाद्य दुःखितान् दुःखिता सती।
रामवित्रासितान् सर्वाननुबद्धानिवेषुभिः ॥ **4.19.7** ॥ 807

वानरा राजसिंहस्य यस्य यूयं पुरःसराः।
तं विहाय सुवित्रस्ताः कस्माद् द्रवत दुर्गताः॥ **4.19.8**॥ 808

राज्यहेतोः स चेद् भ्राता भ्रात्रा क्रूरेण पातितः।
रामेण प्रहितैर्दूरान्मार्गणैर्दूरपातिभिः॥ **4.19.9**॥ 809

कपिपत्न्या वचः श्रुत्वा कपयः कामरूपिणः।
प्राप्तकालमविश्लिष्टमूचुर्वचनमङ्गनाम्॥ **4.19.10**॥ 810

जीवपुत्रे निवर्तस्व पुत्रं रक्षस्व चाङ्गदम्।
अन्तको रामरूपेण हत्वा नयति वालिनम्॥ **4.19.11**॥ 811

क्षिप्तान् वृक्षान् समाविध्य विपुलाश्च तथा शिलाः।
वाली वज्रसमैर्बाणैर्वज्रेणेव निपातितः॥ **4.19.12**॥ 812

अभिभूतमिदं सर्वं विद्रुतं वानरं बलम्।
अस्मिन् प्लवगशार्दूले हते शक्रसमप्रभे॥ **4.19.13**॥ 813

रक्ष्यतां नगरी शूरैरङ्गदश्चाभिषिच्यताम्।
पदस्थं वालिनः पुत्रं भजिष्यन्ति प्लवङ्गमाः॥ **4.19.14**॥ 814

अथवारुचितं स्थानमिह ते रुचिरानने।
आविशन्ति च दुर्गाणि क्षिप्रमद्यैव वानराः॥ **4.19.15**॥ 815

अभार्याः सहभार्याश्च सन्त्यत्र वनचारिणः।
लुब्धेभ्यो विप्रलब्धेभ्यस्तेभ्यो नः सुमहद्भयम्॥ **4.19.16**॥ 816

अल्पान्तरगतानां तु श्रुत्वा वचनमङ्गना।
आत्मनः प्रतिरूपं सा बभाषे चारुहासिनी॥ **4.19.17**॥ 817

पुत्रेण मम किं कार्यं राज्येनापि किमात्मना।
कपिसिंहे महाभागे तस्मिन् भर्तरि नश्यति॥ **4.19.18**॥ 818

पादमूलं गमिष्यामि तस्यैवाहं महात्मनः।
योऽसौ रामप्रयुक्तेन शरेण विनिपातितः॥ **4.19.19**॥ 819

एवमुक्त्वा प्रदुद्राव रुदती शोकमूर्च्छिता।
शिरश्चोरश्च बाहुभ्यां दुःखेन समभिघ्नती॥ **4.19.20**॥ 820

सा व्रजन्ती ददर्शाथ पतिं निपतितं भुवि।
हन्तारं दानवेन्द्राणां समरेष्वनिवर्तिनाम्॥ **4.19.21**॥ 821

क्षेप्तारं पर्वतेन्द्राणां वज्राणामिव वासवम्।
महावातसमाविष्टं महामेघौघनिःस्वनम्॥ **4.19.22**॥ 822

शक्रतुल्यपराक्रान्तं वृष्ट्वेवोपरतं घनम्।
नर्दन्तं नर्दतां भीमं शूरं शूरेण पातितम्।
शार्दूलेनामिषस्यार्थे मृगराजमिवाहतम्॥ **4.19.23**॥ 823

अर्चितं सर्वलोकस्य सपताकं सवेदिकम्।
नागहेतोः सुपर्णेन चैत्यमुन्मथितं यथा॥ **4.19.24**॥ 824

अवष्टभ्यावतिष्ठन्तं ददर्श धनुरूर्जितम्।
रामं रामानुजं चैव भर्तुश्चैव तथानुजम्॥ **4.19.25**॥ 825

तानतीत्य समासाद्य भर्तारं निहतं रणे।
समीक्ष्य व्यथिता भूमौ सभ्रान्ता निपपात ह॥ **4.19.26**॥ 826

सुप्तेव पुनरुत्थाय आर्यपुत्रेति वादिनी।
रुरोद सा पतिं दृष्ट्वा संवीतं मृत्युदामभिः॥ **4.19.27**॥ 827

तामवेक्ष्य तु सुग्रीवः क्रोशन्तीं कुररीमिव।
विषादमगमत् कष्टं दृष्ट्वा चाङ्गदमागतम्॥ **4.19.28**॥ 828

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये किष्किन्धाकाण्डे एकोनविंशः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ विंशः सर्गः ॥

तारायाः विलापः

रामचापविसृष्टेन शरेणान्तकरेण तम्।
दृष्ट्वा विनिहतं भूमौ तारा ताराधिपानना ॥ **4.20.1** ॥ 829

सा समासाद्य भर्तारं पर्यष्वजत भामिनी।
इषुणाभिहतं दृष्ट्वा वालिनं कुञ्जरोपमम् ॥ **4.20.2** ॥ 830

वानरं पर्वतेन्द्राभं शोकसन्तप्तमानसा।
तारा तरुमिवोन्मूलं पर्यदेवयतातुरा ॥ **4.20.3** ॥ 831

रणे दारुणविक्रान्त प्रवीर प्लवतां वर।
किमिदानीं पुरोभागामद्य त्वं नाभिभाषसे ॥ **4.20.4** ॥ 832

उत्तिष्ठ हरिशार्दूल भजस्व शयनोत्तमम्।
नैवंविधाः शेरते हि भूमौ नृपतिसत्तमाः ॥ **4.20.5** ॥ 833

अतीव खलु ते कान्ता वसुधा वसुधाधिप।
गतासुरपि तां गात्रैर्मां विहाय निषेवसे ॥ **4.20.6** ॥ 834

व्यक्तमद्य त्वया वीर धर्मतः सम्प्रवर्तता।
किष्किन्धेव पुरी रम्या स्वर्गमार्गे विनिर्मिता ॥ **4.20.7** ॥ 835

यान्यस्माभिस्त्वया सार्धं वनेषु मधुगन्धिषु।
विहृतानि त्वया काले तेषामुपरमः कृतः॥ **4.20.8**॥ 836

निरानन्दा निराशाहं निमग्ना शोकसागरे।
त्वयि पञ्चत्वमापन्ने महायूथपयूथपे॥ **4.20.9**॥ 837

हृदयं सुस्थितं मह्यं दृष्ट्वा निपतितं भुवि।
यन्न शोकाभिसन्तप्तं स्फुटतेऽद्य सहस्रधा॥ **4.20.10**॥ 838

सुग्रीवस्य त्वया भार्या हृता स च विवासितः।
यत् तत् तस्य त्वया व्युष्टिः प्राप्तेयं प्लवगाधिप॥ **4.20.11**॥ 839

निःश्रेयसपरा मोहात् त्वया चाहं विगर्हिता।
यैषाब्रुवं हितं वाक्यं वानरेन्द्र हितैषिणी॥ **4.20.12**॥ 840

रूपयौवनदृप्तानां दक्षिणानां च मानद।
नूनमप्सरसामार्य चित्तानि प्रमथिष्यसि॥ **4.20.13**॥ 841

कालो निःसंशयो नूनं जीवितान्तकरस्तव।
बलाद् येनावपन्नोऽसि सुग्रीवस्यावशो वशम्॥ **4.20.14**॥ 842

अस्थाने वालिनं हत्वा युध्यमानं परेण च।
न सन्तप्यति काकुत्स्थः कृत्वा कर्म सुगर्हितम्॥ **4.20.15**॥ 843

वैधव्यं शोकसन्तापं कृपणाकृपणा सती।
अदुःखोपचिता पूर्वं वर्तयिष्याम्यनाथवत्॥ **4.20.16**॥ 844

लालितश्चाङ्गदो वीरः सुकुमारः सुखोचितः।
वत्स्यते कामवस्थां मे पितृव्ये क्रोधमूर्च्छिते॥ **4.20.17**॥ 845

कुरुष्व पितरं पुत्र सुदृष्टं धर्मवत्सलम्।
दुर्लभं दर्शनं तस्य तव वत्स भविष्यति॥ **4.20.18**॥ 846

समाश्वासय पुत्रं त्वं सन्देशं सन्दिशस्व मे।
मूर्ध्नि चैनं समाघ्राय प्रवासं प्रस्थितो ह्यसि॥ **4.20.19**॥ 847

रामेण हि महत् कर्म कृतं त्वामभिनिघ्नता।
आनृण्यं तु गतं तस्य सुग्रीवस्य प्रतिश्रवे॥ **4.20.20**॥ 848

सकामो भव सुग्रीव रुमां त्वं प्रतिपत्स्यसे।
भुङ्क्ष्व राज्यमनुद्विग्नः शस्तो भ्राता रिपुस्तव॥ **4.20.21**॥ 849

किं मामेवं प्रलपतीं प्रियां त्वं नाभिभाषसे।
इमाः पश्य वरा बह्व्यो भार्यास्ते वानरेश्वर॥ **4.20.22**॥ 850

तस्या विलपितं श्रुत्वा वानर्यः सर्वतश्च ताः।
परिगृह्याङ्गदं दीना दुःखार्ताः प्रतिचुक्रुशुः॥ **4.20.23**॥ 851

किमङ्गदं साङ्गदवीरबाहो
विहाय यातोऽसि चिरं प्रवासम्।
न युक्तमेवं गुणसन्निकृष्टं
विहाय पुत्रं प्रियचारुवेषम्॥ **4.20.24**॥ 852

यद्यप्रियं किञ्चिदसम्प्रधार्य
कृतं मया स्यात् तव दीर्घबाहो।
क्षमस्व मे तद्धरिवंशनाथ
व्रजामि मूर्ध्ना तव वीर पादौ॥ **4.20.25**॥ 853

तथा तु तारा करुणं रुदन्ती
भर्तुः समीपे सह वानरीभिः।
व्यवस्यत प्रायमनिन्द्यवर्णा
उपोपवेष्टुं भुवि यत्र वाली॥ **4.20.26**॥ 854

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये किष्किन्धाकाण्डे विंशः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ एकविंशः सर्गः ॥

हनुमता तारायाः प्रबोधनं तारा‌कर्तृकः पत्यनुगमननिश्चयश्च

ततो निपतितां तारां च्युतां तारामिवाम्बरात्।
शनैराश्वासयामास हनुमान् हरियूथपः॥ **4.21.1** ॥ 855

गुणदोषकृतं जन्तुः स्वकर्म फलहेतुकम्।
अव्यग्रस्तदवाप्नोति सर्वं प्रेत्य शुभाशुभम्॥ **4.21.2** ॥ 856

शोच्या शोचसि कं शोच्यं दीनं दीनानुकम्पसे।
कश्च कस्यानुशोच्योऽस्ति देहेऽस्मिन् बुद्बुदोपमे॥ **4.21.3** ॥ 857

अङ्गदस्तु कुमारोऽयं द्रष्टव्यो जीवपुत्रया।
आयत्यां च विधेयानि समर्थान्यस्य चिन्तय॥ **4.21.4** ॥ 858

जानास्यनियतामेवं भूतानामागतिं गतिम्।
तस्माच्छुभं हि कर्तव्यं पण्डिते नेह लौकिकम्॥ **4.21.5** ॥ 859

यस्मिन् हरिसहस्राणि शतानि नियुतानि च।
वर्तयन्ति कृताशानि सोऽयं दिष्टान्तमागतः॥ **4.21.6** ॥ 860

यदयं न्यायदृष्टार्थः सामदानक्षमापरः।
गतो धर्मजितां भूमिं नैनं शोचितुमर्हसि॥ **4.21.7** ॥ 861

सर्वे च हरिशार्दूलाः पुत्रश्चायं तवाङ्गदः।
हर्यृक्षपतिराज्यं च त्वत्सनाथमनिन्दिते॥ **4.21.8**॥ 862

ताविमौ शोकसन्तप्तौ शनैः प्रेरय भामिनि।
त्वया परिगृहीतोऽयमङ्गदः शास्तु मेदिनीम्॥ **4.21.9**॥ 863

सन्ततिश्च यथा दृष्टा कृत्यं यच्चापि साम्प्रतम्।
राज्ञस्तत् क्रियतां सर्वमेष कालस्य निश्चयः॥ **4.21.10**॥ 864

संस्कार्यो हरिराजस्तु अङ्गदश्चाभिषिच्यताम्।
सिंहासनगतं पुत्रं पश्यन्ती शान्तिमेष्यसि॥ **4.21.11**॥ 865

सा तस्य वचनं श्रुत्वा भर्तृव्यसनपीडिता।
अब्रवीदुत्तरं तारा हनूमन्तमवस्थितम्॥ **4.21.12**॥ 866

अङ्गदप्रतिरूपाणां पुत्राणामेकतः शतम्।
हतस्याप्यस्य वीरस्य गात्रसंश्लेषणं वरम्॥ **4.21.13**॥ 867

न चाहं हरिराज्यस्य प्रभवाम्यङ्गदस्य वा।
पितृव्यस्तस्य सुग्रीवः सर्वकार्येष्वनन्तरः॥ **4.21.14**॥ 868

नह्येषा बुद्धिरास्थेया हनूमन्नङ्गदं प्रति।
पिता हि बन्धुः पुत्रस्य न माता हरिसत्तम॥ **4.21.15**॥ 869

नहि मम हरिराजसंश्रयात्
क्षमतरमस्ति परत्र चेह वा।
अभिमुखहतवीरसेवितं
शयनमिदं मम सेवितुं क्षमम्॥ **4.21.16**॥ 870

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
किष्किन्धाकाण्डे एकविंशः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ द्वाविंशः सर्गः ॥

वालिना सुग्रीवाङ्गदौ प्रति मनसो वार्ता निवेद्य स्वप्राणानां परित्यागः

वीक्षमाणस्तु मन्दासुः सर्वतो मन्दमुच्छ्वसन्।
आदावेव तु सुग्रीवं ददर्शानुजमग्रतः॥ **4.22.1** ॥ 871

तं प्राप्तविजयं वाली सुग्रीवं प्लवगेश्वरम्।
आभाष्य व्यक्तया वाचा सस्नेहमिदमब्रवीत्॥ **4.22.2** ॥ 872

सुग्रीव दोषेण न मां गन्तुमर्हसि किल्बिषात्।
कृष्यमाणं भविष्येण बुद्धिमोहेन मां बलात्॥ **4.22.3** ॥ 873

युगपद् विहितं तात न मन्ये सुखमावयोः।
सौहार्दं भ्रातृयुक्तं हि तदिदं जातमन्यथा॥ **4.22.4** ॥ 874

प्रतिपद्य त्वमद्यैव राज्यमेषां वनौकसाम्।
मामप्यद्यैव गच्छन्तं विद्धि वैवस्वतक्षयम्॥ **4.22.5** ॥ 875

जीवितं च हि राज्यं च श्रियं च विपुलां तथा।
प्रजहाम्येष वै तूर्णमहं चागर्हितं यशः॥ **4.22.6** ॥ 876

अस्यां त्वहमवस्थायां वीर वक्ष्यामि यद् वचः।
यद्यप्यसुकरं राजन् कर्तुमेव त्वमर्हसि॥ **4.22.7** ॥ 877

सुखार्हं सुखसंवृद्धं बालमेनमबालिशम्।
बाष्पपूर्णमुखं पश्य भूमौ पतितमङ्गदम्॥ **4.22.8**॥ 878

मम प्राणैः प्रियतरं पुत्रं पुत्रमिवौरसम्।
मया हीनमहीनार्थं सर्वतः परिपालय॥ **4.22.9**॥ 879

त्वमप्यस्य पिता दाता परित्राता च सर्वशः।
भयेष्वभयदश्चैव यथाहं प्लवगेश्वर॥ **4.22.10**॥ 880

एष तारात्मजः श्रीमांस्त्वया तुल्यपराक्रमः।
रक्षसां च वधे तेषामग्रतस्ते भविष्यति॥ **4.22.11**॥ 881

अनुरूपाणि कर्माणि विक्रम्य बलवान् रणे।
करिष्यत्येष तारेयस्तेजस्वी तरुणोऽङ्गदः॥ **4.22.12**॥ 882

सुषेणदुहिता चेयमर्थसूक्ष्मविनिश्चये।
औत्पातिके च विविधे सर्वतः परिनिष्ठिता॥ **4.22.13**॥ 883

यदेषा साध्विति ब्रूयात् कार्यं तन्मुक्तसंशयम्।
नहि तारामतं किञ्चिदन्यथा परिवर्तते॥ **4.22.14**॥ 884

राघवस्य च ते कार्यं कर्तव्यमविशङ्कया।
स्यादधर्मो ह्यकरणे त्वां च हिंस्यादमानितः॥ **4.22.15**॥ 885

इमां च मालामाधत्स्व दिव्यां सुग्रीव काञ्चनीम्।
उदारा श्रीः स्थिता ह्यस्यां सम्प्रजह्यान्मृते मयि॥ **4.22.16**॥ 886

इत्येवमुक्तः सुग्रीवो वालिना भ्रातृसौहृदात्।
हर्षं त्यक्त्वा पुनर्दीनो ग्रहग्रस्त इवोडुराट्॥ **4.22.17**॥ 887

तद्वालिवचनाच्छान्तः कुर्वन् युक्तमतन्द्रितः।
जग्राह सोऽभ्यनुज्ञातो मालां तां चैव काञ्चनीम्॥ **4.22.18**॥ 888

तां मालां काञ्चनीं दत्त्वा दृष्ट्वा चैवात्मजं स्थितम्।
संसिद्धः प्रेत्यभावाय स्नेहादङ्गदमब्रवीत्॥ **4.22.19**॥ 889

देशकालौ भजस्वाद्य क्षममाणः प्रियाप्रिये।
सुखदुःखसहः काले सुग्रीववशगो भव॥ **4.22.20**॥ 890

यथा हि त्वं महाबाहो लालितः सततं मया।
न तथा वर्तमानं त्वां सुग्रीवो बहु मन्यते॥ **4.22.21**॥ 891

नास्यामित्रैर्गतं गच्छेर्मा शत्रुभिररिन्दम।
भर्तुरर्थपरो दान्तः सुग्रीववशगो भव॥ **4.22.22**॥ 892

न चातिप्रणयः कार्यः कर्तव्योऽप्रणयश्च ते।
उभयं हि महादोषं तस्मादन्तरदृग् भव॥ **4.22.23**॥ 893

इत्युक्त्वाथ विवृत्ताक्षः शरसम्पीडितो भृशम्।
विवृतैर्दशनैर्भीमैर्बभूवोत्क्रान्तजीवितः॥ **4.22.24**॥ 894

ततो विचुक्रुशुस्तत्र वानरा हतयूथपाः।
परिदेवयमानास्ते सर्वे प्लवगसत्तमाः॥ **4.22.25**॥ 895

किष्किन्धा ह्यद्य शून्या च स्वर्गते वानरेश्वरे।
उद्यानानि च शून्यानि पर्वताः काननानि च॥ **4.22.26**॥ 896

हते प्लवगशार्दूले निष्प्रभा वानराः कृताः।
यस्य वेगेन महता काननानि वनानि च॥ **4.22.27**॥ 897

पुष्पौघेणानुबद्ध्यन्ते करिष्यति तदद्य कः।
येन दत्तं महद् युद्धं गन्धर्वस्य महात्मनः॥ **4.22.28**॥ 898

गोलभस्य महाबाहोर्दश वर्षाणि पञ्च च।
नैव रात्रौ न दिवसे तद् युद्धमुपशाम्यति॥ **4.22.29**॥ 899

ततः षोडशमे वर्षे गोलभो विनिपातितः।
तं हत्वा दुर्विनीतं तु वाली दंष्ट्राकरालवान्।
सर्वाभयङ्करोऽस्माकं कथमेष निपातितः॥ **4.22.30**॥ 900

हते तु वीरे प्लवगाधिपे तदा
प्लवङ्गमास्तत्र न शर्म लेभिरे।
वनेचराः सिंहयुते महावने
यथा हि गावो निहते गवां पतौ॥ **4.22.31**॥ 901

ततस्तु तारा व्यसनार्णवप्लुता
मृतस्य भर्तुर्वदनं समीक्ष्य सा।
जगाम भूमिं परिरभ्य वालिनं
महाद्रुमं छिन्नमिवाश्रिता लता॥ **4.22.32**॥ 902

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
किष्किन्धाकाण्डे द्वाविंशः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ त्रयोविंशः सर्गः ॥

तारायाविलापः

ततः समुपजिघ्रन्ती कपिराजस्य तन्मुखम्।
पतिं लोकश्रुता तारा मृतं वचनमब्रवीत्॥ **4.23.1** ॥ 903

शेषे त्वं विषमे दुःखमकृत्वा वचनं मम।
उपलोपचिते वीर सुदुःखे वसुधातले॥ **4.23.2** ॥ 904

मत्तः प्रियतरा नूनं वानरेन्द्र मही तव।
शेषे हि तां परिष्वज्य मां च न प्रतिभाषसे॥ **4.23.3** ॥ 905

सुग्रीवस्य वशं प्राप्तो विधिरेष भवत्यहो।
सुग्रीव एव विक्रान्तो वीर साहसिकप्रिय॥ **4.23.4** ॥ 906

ऋक्षवानरमुख्यास्त्वां बलिनं पर्युपासते।
तेषां विलपितं कृच्छ्रमङ्गदस्य च शोचतः॥ **4.23.5** ॥ 907

मम चेमा गिरः श्रुत्वा किं त्वं न प्रतिबुध्यसे।
इदं तद् वीरशयनं तत्र शेषे हतो युधि॥ **4.23.6** ॥ 908

शायिता निहता यत्र त्वयैव रिपवः पुरा।
विशुद्धसत्त्वाभिजन प्रिययुद्ध मम प्रिय॥ **4.23.7** ॥ 909

मामनाथां विहायैकां गतस्त्वमसि मानद।
शूराय न प्रदातव्या कन्या खलु विपश्चिता॥ **4.23.8**॥ 910

शूरभार्यां हतां पश्य सद्यो मां विधवां कृताम्।
अवभग्नश्च मे मानो भग्ना मे शाश्वती गतिः॥ **4.23.9**॥ 911

अगाधे च निमग्नास्मि विपुले शोकसागरे।
अश्मसारमयं नूनमिदं मे हृदयं दृढम्॥ **4.23.10**॥ 912

भर्तारं निहतं दृष्ट्वा यन्नाद्य शतधा कृतम्।
सुहृच्चैव च भर्ता च प्रकृत्या च मम प्रियः॥ **4.23.11**॥ 913

प्रहारे च पराक्रान्तः शूरः पञ्चत्वमागतः।
पतिहीना तु या नारी कामं भवतु पुत्रिणी॥ **4.23.12**॥ 914

धनधान्यसमृद्धापि विधवेत्युच्यते जनैः।
स्वगात्रप्रभवे वीर शेषे रुधिरमण्डले॥ **4.23.13**॥ 915

कृमिरागपरिस्तोमे स्वकीये शयने यथा।
रेणुशोणितसंवीतं गात्रं तव समन्ततः॥ **4.23.14**॥ 916

परिरब्धुं न शक्नोमि भुजाभ्यां प्लवगर्षभ।
कृतकृत्योऽद्य सुग्रीवो वैरेऽस्मिन्नतिदारुणे॥ **4.23.15**॥ 917

यस्य रामविमुक्तेन हृतमेकेषुणा भयम्।
शरेण हृदि लग्नेन गात्रसंस्पर्शने तव॥ **4.23.16**॥ 918

वार्यामि त्वां निरीक्षन्ती त्वयि पञ्चत्वमागते।
उद्बबर्ह शरं नीलस्तस्य गात्रगतं तदा॥ **4.23.17**॥ 919

गिरिगह्वरसंलीनं दीप्तमाशीविषं यथा।
तस्य निष्कृष्यमाणस्य बाणस्यापि बभौ द्युतिः॥ **4.23.18**॥ 920

अस्तमस्तकसंरुद्धरश्मेर्दिनकरादिव।
पेतुः क्षतजधारास्तु व्रणेभ्यस्तस्य सर्वशः॥ **4.23.19**॥ 921

ताम्रगैरिकसम्पृक्ता धारा इव धराधरात्।
अवकीर्णं विमार्जन्ती भर्तारं रणरेणुना॥ **4.23.20**॥ 922

अस्त्रैर्नयनजैः शूरं सिषेचास्त्रसमाहतम्।
रुधिरोक्षितसर्वाङ्गं दृष्ट्वा विनिहतं पतिम्॥ **4.23.21**॥ 923

उवाच तारा पिङ्गाक्षं पुत्रमङ्गदमङ्गना।
अवस्थां पश्चिमां पश्य पितुः पुत्र सुदारुणाम्॥ **4.23.22**॥ 924

सम्प्रसक्तस्य वैरस्य गतोऽन्तः पापकर्मणा।
बालसूर्योज्ज्वलतनुं प्रयातं यमसादनम्॥ **4.23.23**॥ 925

अभिवादय राजानं पितरं पुत्र मानदम्।
एवमुक्तः समुत्थाय जग्राह चरणौ पितुः॥ **4.23.24**॥ 926

भुजाभ्यां पीनवृत्ताभ्यामङ्गदोऽहमिति ब्रुवन्।
अभिवादयमानं त्वामङ्गदं त्वं यथा पुरा॥ **4.23.25**॥ 927

दीर्घायुर्भव पुत्रेति किमर्थं नाभिभाषसे।
अहं पुत्रसहाया त्वामुपासे गतचेतनम्।
सिंहेन पातितं सद्यो गौः सवत्सेव गोवृषम्॥ **4.23.26**॥ 928

इष्ट्वा सङ्ग्रामयज्ञेन रामप्रहरणाभ्भसा।
तस्मिन्नवभृथे स्नातः कथं पत्न्या मया विना॥ **4.23.27**॥ 929

या दत्ता देवराजेन तव तुष्टेन संयुगे।
शातकौम्भीं प्रियां मालां तां ते पश्यामि नेह किम्॥ **4.23.28**॥ 930

राज्यश्रीर्न जहाति त्वां गतासुमपि मानद।
सूर्यस्यावर्तमानस्य शैलराजमिव प्रभा॥ **4.23.29**॥ 931

न मे वचः पथ्यमिदं त्वया कृतं
न चास्मि शक्ता हि निवारणे तव।
हता सपुत्रास्मि हतेन संयुगे
सह त्वया श्रीर्विजहाति मामपि॥ **4.23.30**॥ 932

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
किष्किन्धाकाण्डे त्रयोविंशः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ चतुर्विंशः सर्गः ॥

शोकमग्नेन सुग्रीवेण श्रीरामं प्रति स्वप्राणानां परित्यागायानुमतेः प्रार्थनं तारया श्रीरामं प्रति स्ववधाय प्रार्थनाकरणं श्रीरामेण तस्याः प्रबोधनं च

तामाशु वेगेन दुरासदेन
त्वभिप्लुतां शोकमहार्णवेन।
पश्यंस्तदा वाल्यनुजस्तरस्वी
भ्रातुर्वधेनाप्रतिमेन तेपे ॥ **4.24.1** ॥ 933

स बाष्पपूर्णेन मुखेन पश्यन्
क्षणेन निर्विण्णमना मनस्वी।
जगाम रामस्य शनैः समीपं
भृत्यैर्वृतः सम्परिदूयमानः ॥ **4.24.2** ॥ 934

स तं समासाद्य गृहीतचाप -
मुदात्तमाशीविषतुल्यबाणम्।
यशस्विनं लक्ष्मणलक्षिताङ्ग -
मवस्थितं राघवमित्युवाच ॥ **4.24.3** ॥ 935

यथा प्रतिज्ञातमिदं नरेन्द्र
कृतं त्वया दृष्टफलं च कर्म।
ममाद्य भोगेषु नरेन्द्रसूनो
मनो निवृत्तं हतजीवितेन ॥ **4.24.4** ॥ 936

अस्यां महिष्यां तु भृशं रुदत्यां
पुरेऽतिविक्रोशति दुःखतप्ते।
हते नृपे संशयितेऽङ्गदे च
न राम राज्ये रमते मनो मे॥ **4.24.5**॥ 937

क्रोधादमर्षादतिविप्रधर्षाद्
भ्रातुर्वधो मेऽनुमतः पुरस्तात्।
हते त्विदानीं हरियूथपेऽस्मिन्
सुतीक्ष्णमिक्ष्वाकुवर प्रतप्स्ये॥ **4.24.6**॥ 938

श्रेयोऽद्य मन्ये मम शैलमुख्ये
तस्मिन् हि वासश्चिरमृष्यमूके।
यथा तथा वर्तयतः स्ववृत्त्या
नेमं निहत्य त्रिदिवस्य लाभः॥ **4.24.7**॥ 939

न त्वा जिघांसामि चरेति यन्मा -
मयं महात्मा मतिमानुवाच।
तस्यैव तद् राम वचोऽनुरूप -
मिदं वचः कर्म च मेऽनुरूपम्॥ **4.24.8**॥ 940

भ्राता कथं नाम महागुणस्य
भ्रातुर्वधं राम विरोचयेत।
राज्यस्य दुःखस्य च वीर सारं
विचिन्तयन् कामपुरस्कृतोऽपि॥ **4.24.9**॥ 941

वधो हि मे मतो नासीत् स्वमाहात्म्यव्यतिक्रमात्।
ममासीद् बुद्धिदौरात्म्यात् प्राणहारी व्यतिक्रमः॥ **4.24.10**॥ 942

द्रुमशाखावभग्नोऽहं मुहूर्तं परिनिष्टनन्।
सान्त्वयित्वा त्वनेनोक्तो न पुनः कर्तुमर्हसि॥ **4.24.11**॥ 943

भ्रातृत्वमार्यभावश्च धर्मश्चानेन रक्षितः।
मया क्रोधश्च कामश्च कपित्वं च प्रदर्शितम्॥ **4.24.12**॥ 944

अचिन्तनीयं परिवर्जनीय -
मनीप्सनीयं स्वनवेक्षणीयम्।
प्राप्तोऽस्मि पाप्मानमिदं वयस्य
भ्रातुर्वधात् त्वाष्ट्रवधादिवेन्द्रः॥ **4.24.13**॥ 945

पाप्मानमिन्द्रस्य मही जलं च
वृक्षाश्च कामं जगृहुः स्त्रियश्च।
को नाम पाप्मानमिमं सहेत
शाखामृगस्य प्रतिपत्तुमिच्छेत्॥ **4.24.14**॥ 946

नार्हामि सम्मानमिमं प्रजानां
न यौवराज्यं कुत एव राज्यम्।
अधर्मयुक्तं कुलनाशयुक्त -
मेवंविधं राघव कर्म कृत्वा॥ **4.24.15**॥ 947

पापस्य कर्तास्मि विगर्हितस्य
क्षुद्रस्य लोकापकृतस्य लोके।
शोको महान् मामभिवर्ततेऽयं
वृष्टेर्यथा निम्नमिवाम्बुवेगः॥ **4.24.16**॥ 948

सोदर्यघातापरगात्रवालः
सन्तापहस्ताक्षिशिरोविषाणः।
एनोमयो मामभिहन्ति हस्ती
दृप्तो नदीकूलमिव प्रवृद्धः॥ **4.24.17**॥ 949

अंहो बतेदं नृवराविषह्यं
निवर्तते मे हृदि साधुवृत्तम्।

अग्नौ विवर्णं परितप्यमानं
किट्टं यथा राघव जातरूपम्॥ **4.24.18**॥ 950

महाबलानां हरियूथपाना -
मिदं कुलं राघव मन्निमित्तम्।
अस्याङ्गदस्यापि च शोकतापा -
दर्धस्थितप्राणमितीव मन्ये॥ **4.24.19**॥ 951

सुतः सुलभ्यः सुजनः सुवश्यः
कुतस्तु पुत्रः सदृशोऽङ्गदेन।
न चापि विद्येत स वीर देशो
यस्मिन् भवेत् सोदरसन्निकर्षः॥ **4.24.20**॥ 952

अद्याङ्गदो वीरवरो न जीवे -
ज्जीवेत माता परिपालनार्थम्।
विना तु पुत्रं परितापदीना
सा नैव जीवेदिति निश्चितं मे॥ **4.24.21**॥ 953

सोऽहं प्रवेक्ष्याम्यतिदीप्तमग्निं
भ्रात्रा च पुत्रेण च सख्यमिच्छन्।
इमे विचेष्यन्ति हरिप्रवीराः
सीतां निदेशे परिवर्तमानाः॥ **4.24.22**॥ 954

कृत्स्नं तु ते सेत्स्यति कार्यमेत -
न्मय्यप्यतीते मनुजेन्द्रपुत्र।
कुलस्य हन्तारमजीवनार्हं
रामानुजानीहि कृतागसं माम्॥ **4.24.23**॥ 955

इत्येवमार्तस्य रघुप्रवीरः
श्रुत्वा वचो वालिजघन्यजस्य।

सञ्जातबाष्पः परवीरहन्ता
रामो मुहूर्तं विमना बभूव ॥ **4.24.24** ॥ 956

तस्मिन् क्षणेऽभीक्ष्णमवेक्षमाणः
क्षितिक्षमावान् भुवनस्य गोप्ता।
रामो रुदन्तीं व्यसने निमग्नां
समुत्सुकः सोऽथ ददर्श ताराम् ॥ **4.24.25** ॥ 957

तां चारुनेत्रां कपिसिंहनाथां
पतिं समाश्लिष्य तदा शयानाम्।
उत्थापयामासुरदीनसत्त्वां
मन्त्रिप्रधानाः कपिराजपत्नीम् ॥ **4.24.26** ॥ 958

सा विस्फुरन्ती परिरभ्यमाणा
भर्तुः समीपादपनीयमाना।
ददर्श रामं शरचापपाणिं
स्वतेजसा सूर्यमिव ज्वलन्तम् ॥ **4.24.27** ॥ 959

सुसंवृतं पार्थिवलक्षणैश्च
तं चारुनेत्रं मृगशावनेत्रा।
अदृष्टपूर्वं पुरुषप्रधान -
मयं स काकुत्स्थ इति प्रजज्ञे ॥ **4.24.28** ॥ 960

तस्येन्द्रकल्पस्य दुरासदस्य
महानुभावस्य समीपमार्या।
आर्तातितूर्णं व्यसनं प्रपन्ना
जगाम तारा परिविह्वलन्ती ॥ **4.24.29** ॥ 961

तं सा समासाद्य विशुद्धसत्त्वं
शोकेन सम्भ्रान्तशरीरभावा।

मनस्विनी वाक्यमुवाच तारा
रामं रणोत्कर्षणलब्धलक्ष्यम्॥ **4.24.30**॥ 962

त्वमप्रमेयश्च दुरासदश्च
जितेन्द्रियश्चोत्तमधर्मकश्च।
अक्षीणकीर्तिश्च विचक्षणश्च
क्षितिक्षमावान् क्षतजोपमाक्षः॥ **4.24.31**॥ 963

त्वमात्तबाणासनबाणपाणि -
र्महाबलः संहननोपपन्नः।
मनुष्यदेहाभ्युदयं विहाय
दिव्येन देहाभ्युदयेन युक्तः॥ **4.24.32**॥ 964

येनैव बाणेन हतः प्रियो मे
तेनैव बाणेन हि मां जहीहि।
हता गमिष्यामि समीपमस्य
न मां विना वीर रमेत वाली॥ **4.24.33**॥ 965

स्वर्गेऽपि पद्मामलपत्रनेत्र
समेत्य सम्प्रेक्ष्य च मामपश्यन्।
न ह्येष उच्चावचताम्रचूडा
विचित्रवेषाप्सरसोऽभजिष्यत्॥ **4.24.34**॥ 966

स्वर्गेऽपि शोकं च विवर्णतां च
मया विना प्राप्स्यति वीर वाली।
रम्ये नगेन्द्रस्य तटावकाशे
विदेहकन्यारहितो यथा त्वम्॥ **4.24.35**॥ 967

त्वं वेत्थ तावद् वनितावीहीनः
प्राप्नोति दुःखं पुरुषः कुमारः।

तत् त्वं प्रजानञ्जहि मां न वाली
दुःखं ममादर्शनजं भजेत॥ **4.24.36**॥ 968

यद्यापि मन्येत भवान् महात्मा
स्त्रीघातदोषस्तु भवेन्न मह्यम्।
आत्मेयमस्येति हि मां जहि त्वं
न स्त्रीवधः स्यान्मनुजेन्द्रपुत्र॥ **4.24.37**॥ 969

शास्त्रप्रयोगाद् विविधाश्च वेदा -
दनन्यरूपाः पुरुषस्य दाराः।
दारप्रदानाद्धि न दानमन्यत्
प्रदृश्यते ज्ञानवतां हि लोके॥ **4.24.38**॥ 970

त्वं चापि मां तस्य मम प्रियस्य
प्रदास्यसे धर्ममवेक्ष्य वीर।
अनेन दानेन न लप्स्यसे त्व -
मधर्मयोगं मम वीर घातात्॥ **4.24.39**॥ 971

आर्तामनाथामपनीयमाना -
मेवङ्गतां नार्हसि मामहन्तुम्।
अहं हि मातङ्गविलासगामिना
प्लवङ्गमानामृषभेण धीमता।
विना वरार्होत्तमहेममालिना
चिरं न शक्ष्यामि नरेन्द्र जीवितुम्॥ **4.24.40**॥ 972

इत्येवमुक्तस्तु विभुर्महात्मा
तारां समाश्वास्य हितं बभाषे।
मा वीरभार्ये विमतिं कुरुष्व
लोको हि सर्वो विहितो विधात्रा॥ **4.24.41**॥ 973

तं चैव सर्वं सुखदुःखयोगं
लोकोऽब्रवीत् तेन कृतं विधात्रा।
त्रयोऽपि लोका विहितं विधानं
नातिक्रमन्ते वशगा हि तस्य॥ **4.24.42**॥ 974

प्रीतिं परां प्राप्स्यसि तां तथैव
पुत्रश्च ते प्राप्स्यति यौवराज्यम्।
धात्रा विधानं विहितं तथैव
न शूरपत्न्यः परिदेवयन्ति॥ **4.24.43**॥ 975

आश्वासिता तेन महात्मना तु
प्रभावयुक्तेन परन्तपेन।
सा वीरपत्नी ध्वनता मुखेन
सुवेषरूपा विरराम तारा॥ **4.24.44**॥ 976

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
किष्किन्धाकाण्डे चतुर्विंशः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ पञ्चविंशः सर्गः ॥

सलक्ष्मणेन श्रीरामेण सुग्रीवस्य तारायाः अङ्गदस्य च प्रबोधनं वालिनो दाहसंस्कारार्थं प्रेरणं च तदनु ताराप्रभृतिभिः सह सर्वैर्वानरैर्वालिनः शवस्य श्मशानभूमौ नयनमङ्गदेन तस्य दाहसंस्कारस्य सम्पादनं तदर्थं जलाञ्जलीनां दानं च

स सुग्रीवं च तारां च साङ्गदां सहलक्ष्मणः।
समानशोकः काकुत्स्थः सान्त्वयन्निदमब्रवीत्॥ **4.25.1**॥ 977

न शोकपरितापेन श्रेयसा युज्यते मृतः।
यदत्रानन्तरं कार्यं तत् समाधातुमर्हथ॥ **4.25.2**॥ 978

लोकवृत्तमनुष्ठेयं कृतं वो बाष्पमोक्षणम्।
न कालादुत्तरं किञ्चित् कर्मशक्यमुपासितुम्॥ **4.25.3**॥ 979

नियतिः कारणं लोके नियतिः कर्मसाधनम्।
नियतिः सर्वभूतानां नियोगेष्विह कारणम्॥ **4.25.4**॥ 980

न कर्ता कस्यचित् कश्चिन्नियोगे नापि चेश्वरः।
स्वभावे वर्तते लोकस्तस्य कालः परायणम्॥ **4.25.5**॥ 981

न कालः कालमत्येति न कालः परिहीयते।
स्वभावं च समासाद्य न कश्चिदतिवर्तते॥ **4.25.6**॥ 982

न कालस्यास्ति बन्धुत्वं न हेतुर्न पराक्रमः।
न मित्रज्ञातिसम्बन्धः कारणं नात्मनो वशः॥ **4.25.7**॥ 983

किं तु कालपरीणामो द्रष्टव्यः साधु पश्यता।
धर्मश्चार्थश्च कामश्च कालक्रमसमाहिताः॥ **4.25.8**॥ 984

इतः स्वां प्रकृतिं वाली गतः प्राप्तः क्रियाफलम्।
सामदानार्थसंयोगैः पवित्रं प्लवगेश्वरः॥ **4.25.9**॥ 985

स्वधर्मस्य च संयोगाजितस्तेन महात्मना।
स्वर्गः परिगृहीतश्च प्राणानपरिरक्षता॥ **4.25.10**॥ 986

एषा वै नियतिः श्रेष्ठा यां गतो हरियूथपः।
तदलं परितापेन प्राप्तकालमुपास्यताम्॥ **4.25.11**॥ 987

वचनान्ते तु रामस्य लक्ष्मणः परवीरहा।
अवदत् प्रश्रितं वाक्यं सुग्रीवं गतचेतसम्॥ **4.25.12**॥ 988

कुरु त्वमस्य सुग्रीव प्रेतकार्यमनन्तरम्।
ताराङ्गदाभ्यां सहितो वालिनो दहनं प्रति॥ **4.25.13**॥ 989

समाज्ञापय काष्ठानि शुष्काणि च बहूनि च।
चन्दनानि च दिव्यानि वालिसंस्कारकारणात्॥ **4.25.14**॥ 990

समाश्वासय दीनं त्वमङ्गदं दीनचेतसम्।
मा भूर्बालिशबुद्धिस्त्वं त्वदधीनमिदं पुरम्॥ **4.25.15**॥ 991

अङ्गदस्त्वानयेन्माल्यं वस्त्राणि विविधानि च।
घृतं तैलमथो गन्धान् यच्चात्र समनन्तरम्॥ **4.25.16**॥ 992

त्वं तार शिबिकां शीघ्रमादायागच्छसम्भ्रमात्।
त्वरा गुणवती युक्ता ह्यस्मिन् काले विशेषतः॥ **4.25.17**॥ 993

सज्जीभवन्तु प्लवगाः शिबिकावाहनोचिताः।
समर्था बलिनश्चैव निर्हरिष्यन्ति वालिनम्॥ **4.25.18**॥ 994

एवमुक्त्वा तु सुग्रीवं सुमित्रानन्दवर्धनः।
तस्थौ भ्रातृसमीपस्थो लक्ष्मणः परवीरहा॥ **4.25.19**॥ 995

लक्ष्मणस्य वचः श्रुत्वा तारः सभ्रान्तमानसः।
प्रविवेश गुहां शीघ्रं शिबिकासक्तमानसः॥ **4.25.20**॥ 996

आदाय शिबिकां तारः स तु पर्यापतत् पुनः।
वानरैरुह्यमानां तां शूरैरुद्वहनोचितैः॥ **4.25.21**॥ 997

दिव्यां भद्रासनयुतां शिबिकां स्यन्दनोपमाम्।
पक्षिकर्मभिराचित्रां द्रुमकर्मविभूषिताम्॥ **4.25.22**॥ 998

आचितां चित्रपत्तीभिः सुनिविष्टां समन्ततः।
विमानमिव सिद्धानां जालवातायनायुताम्॥ **4.25.23**॥ 999

सुनियुक्तां विशालां च सुकृतां शिल्पिभिः कृताम्।
दारुपर्वतकोपेतां चारुकर्मपरिष्कृताम्॥ **4.25.24**॥ 1000

वराभरणहारैश्च चित्रमाल्योपशोभिताम्।
गुहागहनसञ्छन्नां रक्तचन्दनभूषिताम्॥ **4.25.25**॥ 1001

पुष्पौघैः समभिच्छन्नां पद्ममालाभिरेव च।
तरुणादित्यवर्णाभिर्भ्राजमानाभिरावृताम्॥ **4.25.26**॥ 1002

ईदृशीं शिबिकां दृष्ट्वा रामो लक्ष्मणमब्रवीत्।
क्षिप्रं विनीयतां वाली प्रेतकार्यं विधीयताम्॥ **4.25.27**॥ 1003

ततो वालिनमुद्यम्य सुग्रीवः शिबिकां तदा।
आरोपयत विक्रोशन्नङ्गदेन सहैव तु॥ **4.25.28**॥ 1004

आरोग्य शिबिकां चैव वालिनं गतजीवितम्।
अलङ्कारैश्च विविधैर्माल्यैर्वस्त्रैश्च भूषितम्॥ **4.25.29**॥ 1005

आज्ञापयत् तदा राजा सुग्रीवः प्लवगेश्वरः।
और्ध्वदेहिकमार्यस्य क्रियतामनुकूलतः॥ **4.25.30**॥ 1006

विश्राणयन्तो रत्नानि विविधानि बहूनि च।
अग्रतः प्लवगा यान्तु शिबिका तदनन्तरम्॥ **4.25.31**॥ 1007

राज्ञामृद्धिविशेषा हि दृश्यन्ते भुवि यादृशाः।
तादृशैरिह कुर्वन्तु वानरा भर्तृसत्क्रियाम्॥ **4.25.32**॥ 1008

तादृशं वालिनः क्षिप्रं प्राकुर्वन्नौर्ध्वदेहिकम्।
अङ्गदं परिरभ्याशु तारप्रभृतयस्तथा॥ **4.25.33**॥ 1009

क्रोशन्तः प्रययुः सर्वे वानरा हतबान्धवाः।
ततः प्रणिहिताः सर्वा वानर्योऽस्य वशानुगाः॥ **4.25.34**॥ 1010

चुक्रुशुर्वीरवीरेति भूयः क्रोशन्ति ताः प्रियम्।
ताराप्रभृतयः सर्वा वानर्यो हतबान्धवाः॥ **4.25.35**॥ 1011

अनुजग्मुश्च भर्तारं क्रोशन्त्यः करुणस्वनाः।
तासां रुदितशब्देन वानरीणां वनान्तरे॥ **4.25.36**॥ 1012

वनानि गिरयश्चैव विक्रोशन्तीव सर्वतः।
पुलिने गिरिनद्यास्तु विविक्ते जलसंवृते॥ **4.25.37**॥ 1013

चितां चक्रुः सुबहवो वानरा वनचारिणः।
अवरोप्य ततः स्कन्धाच्छिबिकां वानरोत्तमाः॥ **4.25.38**॥ 1014

तस्थुरेकान्तमाश्रित्य सर्वे शोकपरायणाः।
ततस्तारा पतिं दृष्ट्वा शिबिकातलशायिनम्॥ **4.25.39**॥ 1015

आरोप्याङ्के शिरस्तस्य विललाप सुदुःखिता।
हा वानरमहाराज हा नाथ मम वत्सल॥ **4.25.40**॥ 1016

हा महार्ह महाबाहो हा मम प्रिय पश्य माम्।
जनं न पश्यसीमं त्वं कस्माच्छोकाभिपीडितम्॥ **4.25.41**॥ 1017

प्रहृष्टमिह ते वक्त्रं गतासोरपि मानद।
अस्तार्कसमवर्णं च दृश्यते जीवतो यथा॥ **4.25.42**॥ 1018

एष त्वां रामरूपेण कालः कर्षति वानर।
येन स्म विधवाः सर्वाः कृता एकेषुणा रणे॥ **4.25.43**॥ 1019

इमास्तास्तव राजेन्द्र वानर्योऽप्लवगास्तव।
पादैर्विकृष्टमध्वानमागताः किं न बुध्यसे॥ **4.25.44**॥ 1020

तवेष्टा ननु चैवेमा भार्याश्चन्द्रनिभाननाः।
इदानीं नेक्षसे कस्मात् सुग्रीवं प्लवगेश्वर॥ **4.25.45**॥ 1021

एते हि सचिवा राजंस्तारप्रभृतयस्तव।
पुरवासिजनश्चायं परिवार्य विषीदति॥ **4.25.46**॥ 1022

विसर्जयैनान् सचिवान् यथापुरमरिन्दम।
ततः क्रीडामहे सर्वा वनेषु मदनोत्कटाः॥ **4.25.47**॥ 1023

एवं विलपतीं तारां पतिशोकपरीवृताम्।
उत्थापयन्ति स्म तदा वानर्यः शोककर्शिताः॥ **4.25.48**॥ 1024

सुग्रीवेण ततः सार्धं सोऽङ्गदः पितरं रुदन्।
चितामारोपयामास शोकेनाभिप्लुतेन्द्रियः॥ **4.25.49**॥ 1025

ततोऽग्निं विधिवद् दत्त्वा सोऽपसव्यं चकार ह।
पितरं दीर्घमध्वानं प्रस्थितं व्याकुलेन्द्रियः॥ **4.25.50**॥ 1026

संस्कृत्य वालिनं तं तु विधिवत् प्लवगर्षभाः।
आजग्मुरुदकं कर्तुं नदीं शुभजलां शिवाम्॥ **4.25.51**॥ 1027

ततस्ते सहितास्तत्र ह्यङ्गदं स्थाप्य चाग्रतः।
सुग्रीवतारासहिताः सिषिचुर्वानरा जलम्॥ **4.25.52**॥ 1028

सुग्रीवेणेव दीनेन दीनो भूत्वा महाबलः।
समानशोकः काकुत्स्थः प्रेतकार्याण्यकारयत्॥ **4.25.53**॥ 1029

ततोऽथ तं वालिनमग्र्यपौरुषं
प्रकाशमिक्ष्वाकुवरेषुणा हतम्।
प्रदीप्य दीप्ताग्निसमौजसं तदा
सलक्ष्मणं राममुपेयिवान् हरिः॥ **4.25.54**॥ 1030

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
किष्किन्धाकाण्डे पञ्चविंशः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ षड्विंशः सर्गः ॥

हनुमता सुग्रीवस्याभिषेकाय श्रीरामं प्रति किष्किन्धां गन्तुं प्रार्थनं श्रीरामेण तत्र गमनं विनैवानुमतिप्रदानं तदनु सुग्रीवाङ्गदयोरभिषेकः

ततः शोकाभिसन्तप्तं सुग्रीवं क्लिन्नवाससम्।
शाखामृगमहामात्राः परिवार्योपतस्थिरे ॥ **4.26.1** ॥ 1031

अभिगम्य महाबाहुं राममक्लिष्टकारिणम्।
स्थिताः प्राञ्जलयः सर्वे पितामहमिवर्षयः ॥ **4.26.2** ॥ 1032

ततः काञ्चनशैलाभस्तरुणार्ककनिभाननः।
अब्रवीत् प्राञ्जलिर्वाक्यं हनूमान् मारुतात्मजः ॥ **4.26.3** ॥ 1033

भवत्प्रसादात् काकुत्स्थ पितृपैतामहं महत्।
वानराणां सुदंष्ट्राणां सम्पन्नबलशालिनाम् ॥ **4.26.4** ॥ 1034

महात्मनां सुदुष्प्रापं प्राप्तं राज्यमिदं प्रभो।
भवता समनुज्ञातः प्रविश्य नगरं शुभम् ॥ **4.26.5** ॥ 1035

संविधास्यति कार्याणि सर्वाणि ससुहृद्गणः।
स्नातोऽयं विविधैर्गन्धैरौषधैश्च यथाविधि ॥ **4.26.6** ॥ 1036

अर्चयिष्यति माल्यैश्च रत्नैश्च त्वां विशेषतः।
इमां गिरिगुहां रम्यामभिगन्तुं त्वमर्हसि ॥ **4.26.7** ॥ 1037

कुरुष्व स्वामिसम्बन्धं वानरान् सम्प्रहर्षय।
एवमुक्तो हनुमता राघवः परवीरहा॥ **4.26.8**॥ 1038

प्रत्युवाच हनूमन्तं बुद्धिमान् वाक्यकोविदः।
चतुर्दश समाः सौम्य ग्रामं वा यदि वा पुरम्॥ **4.26.9**॥ 1039

न प्रवेक्ष्यामि हनुमन् पितुर्निर्देशपालकः।
सुसमृद्धां गुहां दिव्यां सुग्रीवो वानरर्षभः॥ **4.26.10**॥ 1040

प्रविष्टो विधिवद् वीरः क्षिप्रं राज्येऽभिषिच्यताम्।
एवमुक्त्वा हनूमन्तं रामः सुग्रीवमब्रवीत्॥ **4.26.11**॥ 1041

वृत्तज्ञो वृत्तसम्पन्नमुदारबलविक्रमम्।
इममप्यङ्गदं वीरं यौवराज्येऽभिषेचय॥ **4.26.12**॥ 1042

ज्येष्ठस्य हि सुतो ज्येष्ठः सदृशो विक्रमेण च।
अङ्गदोऽयमदीनात्मा यौवराज्यस्य भाजनम्॥ **4.26.13**॥ 1043

पूर्वोऽयं वार्षिको मासः श्रावणः सलिलागमः।
प्रवृत्ताः सौम्य चत्वारो मासा वार्षिक संज्ञिताः॥ **4.26.14**॥ 1044

नायमुद्योगसमयः प्रविश त्वं पुरीं शुभाम्।
अस्मिन् वत्स्याम्यहं सौम्य पर्वते सहलक्ष्मणः॥ **4.26.15**॥ 1045

इयं गिरिगुहा रम्या विशाला युक्तमारुता।
प्रभूतसलिला सौम्य प्रभूतकमलोत्पला॥ **4.26.16**॥ 1046

कार्तिके समनुप्राप्ते त्वं रावणवधे यत।
एष नः समयः सौम्य प्रविश त्वं स्वमालयम्॥ **4.26.17**॥ 1047

अभिषिञ्चस्व राज्ये च सुहृदः सम्प्रहर्षय।
इति रामाभ्यनुज्ञातः सुग्रीवो वानरर्षभः॥ **4.26.18**॥ 1048

प्रविवेश पुरीं रम्यां किष्किन्धां वालिपालिताम्।
तं वानरसहस्राणि प्रविष्टं वानरेश्वरम्॥ **4.26.19**॥ 1049

अभिवार्य प्रविष्टानि सर्वतः प्लवगेश्वरम्।
ततः प्रकृतयः सर्वा दृष्ट्वा हरिगणेश्वरम्॥ **4.26.20**॥ 1050

प्रणम्य मूर्ध्ना पतिता वसुधायां समाहिताः।
सुग्रीवः प्रकृतीः सर्वाः सम्भाष्योत्थाप्य वीर्यवान्॥ **4.26.21**॥ 1051

भ्रातुरन्तःपुरं सौम्यं प्रविवेश महाबलः।
प्रविष्टं भीमविक्रान्तं सुग्रीवं वानरर्षभम्॥ **4.26.22**॥ 1052

अभ्यषिञ्चन्त सुहृदः सहस्राक्षमिवामराः।
तस्य पाण्डुरमाजह्रुश्छत्रं हेमपरिष्कृतम्॥ **4.26.23**॥ 1053

शुक्ले च वालव्यजने हेमदण्डे यशस्करे।
तथा रत्नानि सर्वाणि सर्वबीजौषधानि च॥ **4.26.24**॥ 1054

सक्षीराणां च वृक्षाणां प्ररोहान् कुसुमानि च।
शुक्लानि चैव वस्त्राणि श्वेतं चैवानुलेपनम्॥ **4.26.25**॥ 1055

सुगन्धीनि च माल्यानि स्थलजान्यम्बुजानि च।
चन्दनानि च दिव्यानि गन्धांश्च विविधान् बहून्॥ **4.26.26**॥ 1056

अक्षतं जातरूपं च प्रियङ्गुं मधुसर्पिषी।
दधि चर्म च वैयाघ्रं परार्ध्ये चाप्युपानहौ॥ **4.26.27**॥ 1057

समालम्भनमादाय गोरोचनं मनःशिलाम्।
आजग्मुस्तत्र मुदिता वराः कन्याश्च षोडश॥ **4.26.28**॥ 1058

ततस्ते वानरश्रेष्ठमभिषेक्तुं यथाविधि।
रत्नैर्वस्त्रैश्च भक्ष्यैश्च तोषयित्वा द्विजर्षभान्॥ **4.26.29**॥ 1059

ततः कुशपरिस्तीर्णं समिद्धं जातवेदसम्।
मन्त्रपूतेन हविषा हुत्वा मन्त्रविदो जनाः॥ **4.26.30**॥ 1060

ततो हेमप्रतिष्ठाने वरास्तरणसंवृते।
प्रासादशिखरे रम्ये चित्रमाल्योपशोभिते॥ **4.26.31**॥ 1061

प्राङ्मुखं विधिवन्मन्त्रैः स्थापयित्वा वरासने।
नदीनदेभ्यः संहृत्य तीर्थेभ्यश्च समन्ततः॥ **4.26.32**॥ 1062

आहृत्य च समुद्रेभ्यः सर्वेभ्यो वानरर्षभाः।
अपः कनककुम्भेषु निधाय विमलं जलम्॥ **4.26.33**॥ 1063

शुभैर्ऋषभशृङ्गैश्च कलशैश्चैव काञ्चनैः।
शास्त्रदृष्टेन विधिना महर्षिविहितेन च॥ **4.26.34**॥ 1064

गजो गवाक्षो गवयः शरभो गन्धमादनः।
मैन्दश्च द्विविदश्चैव हनूमाञ्जाम्बवांस्तथा॥ **4.26.35**॥ 1065

अभ्यषिञ्चत सुग्रीवं प्रसन्नेन सुगन्धिना।
सलिलेन सहस्राक्षं वसवो वासवं यथा॥ **4.26.36**॥ 1066

अभिषिक्ते तु सुग्रीवे सर्वे वानरपुङ्गवाः।
प्रचुक्रुशुर्महात्मानो हृष्टाः शतसहस्रशः॥ **4.26.37**॥ 1067

रामस्य तु वचः कुर्वन् सुग्रीवो वानरेश्वरः।
अङ्गदं सम्परिष्वज्य यौवराज्येऽभ्यषेचयत्॥ **4.26.38**॥ 1068

अङ्गदे चाभिषिक्ते तु सानुक्रोशाः प्लवङ्गमाः।
साधु साध्विति सुग्रीवं महात्मानो ह्यपूजयन्॥ **4.26.39**॥ 1069

रामं चैव महात्मानं लक्ष्मणं च पुनः पुनः।
प्रीताश्च तुष्टुवुः सर्वे तादृशे तत्र वर्तिनि॥ **4.26.40**॥ 1070

हृष्टपुष्टजनाकीर्णा पताकाध्वजशोभिता।
बभूव नगरी रम्या किष्किन्धा गिरिगह्वरे॥ **4.26.41**॥ 1071

निवेद्य रामाय तदा महात्मने
महाभिषेकं कपिवाहिनीपतिः।
रुमां च भार्यामुपलभ्य वीर्यवा
नवाप राज्यं त्रिदशाधिपो यथा॥ **4.26.42**॥ 1072

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
किष्किन्धाकाण्डे षड्विंशः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ सप्तविंशः सर्गः ॥

प्रस्रवणगिरौ श्रीरामलक्ष्मणयोर्मिथः संलापः

अभिषिक्ते तु सुग्रीवे प्रविष्टे वानरे गुहाम्।
आजगाम सह भ्रात्रा रामः प्रस्रवणं गिरिम्॥ **4.27.1**॥ 1073

शार्दूलमृगसङ्घुष्टं सिंहैर्भीमरवैर्वृतम्।
नानागुल्मलतागूढं बहुपादपसङ्कुलम्॥ **4.27.2**॥ 1074

ऋक्षवानरगोपुच्छैर्मार्जारैश्च निषेवितम्।
मेघराशिनिभं शैलं नित्यं शुचिकरं शिवम्॥ **4.27.3**॥ 1075

तस्य शैलस्य शिखरे महतीमायतां गुहाम्।
प्रत्यगृह्णीत वासार्थं रामः सौमित्रिणा सह॥ **4.27.4**॥ 1076

कृत्वा च समयं रामः सुग्रीवेण सहानघः।
कालयुक्तं महद्वाक्यमुवाच रघुनन्दनः॥ **4.27.5**॥ 1077

विनीतं भ्रातरं भ्राता लक्ष्मणं लक्ष्मिवर्धनम्।
इयं गिरिगुहा रम्या विशाला युक्तमारुता॥ **4.27.6**॥ 1078

अस्यां वत्स्याम सौमित्रे वर्षरात्रमरिन्दम।
गिरिशृङ्गमिदं रम्यमुत्तमं पार्थिवात्मज॥ **4.27.7**॥ 1079

श्वेताभिः कृष्णताम्राभिः शिलाभिरुपशोभितम्।
नानाधातुसमाकीर्णं नदीदर्दुरसंयुतम्॥ **4.27.8**॥ 1080

विविधैर्वृक्षषण्डैश्च चारुचित्रलतायुतम्।
नानाविहगसङ्घुष्टं मयूरवरनादितम्॥ **4.27.9**॥ 1081

मालतीकुन्दगुल्मैश्च सिन्दुवारैः शिरीषकैः।
कदम्बार्जुनसर्जैश्च पुष्पितैरुपशोभितम्॥ **4.27.10**॥ 1082

इयं च नलिनी रम्या फुल्लपङ्कजमण्डिता।
नातिदूरे गुहाया नौ भविष्यति नृपात्मज॥ **4.27.11**॥ 1083

प्रागुदक्प्रवणे देशे गुहा साधु भविष्यति।
पश्चाच्चैवोन्नता सौम्य निवातेयं भविष्यति॥ **4.27.12**॥ 1084

गुहाद्वारे च सौमित्रे शिला समतला शिवा।
कृष्णा चैवायता चैव भिन्नाञ्जनचयोपमा॥ **4.27.13**॥ 1085

गिरिशृङ्गमिदं तात पश्य चोत्तरतः शुभम्।
भिन्नाञ्जनचयाकारमभ्भोधरमिवोदितम्॥ **4.27.14**॥ 1086

दक्षिणस्यामपि दिशि स्थितं श्वेतमिवाम्बरम्।
कैलासशिखरप्रख्यं नानाधातुविराजितम्॥ **4.27.15**॥ 1087

प्राचीनवाहिनीं चैव नदीं भृशमकर्दमाम्।
गुहायाः परतः पश्य त्रिकूटे जाह्नवीमिव॥ **4.27.16**॥ 1088

चन्दनैस्तिलकैः सालैस्तमालैरतिमुक्तकैः।
पद्मकैः सरलैश्चैव अशोकैश्चैव शोभिताम्॥ **4.27.17**॥ 1089

वानीरैस्तिमिदैश्चैव बकुलैः केतकैरपि।
हिन्तालैस्तिनिशैर्नीपैर्वेतसैः कृतमालकैः॥ **4.27.18**॥ 1090

तीरजैः शोभिता भाति नानारूपैस्ततस्ततः।
वसनाभरणोपेता प्रमदेवाभ्यलङ्कृता॥ **4.27.19**॥ 1091

शतशः पक्षिसङ्घैश्च नानानादविनादिता।
एकैकमनुरक्तैश्च चक्रवाकैरलङ्कृता॥ **4.27.20**॥ 1092

पुलिनैरतिरम्यैश्च हंससारससेविता।
प्रहसन्त्येव भात्येषा नानारत्नसमन्विता॥ **4.27.21**॥ 1093

क्वचिन्नीलोत्पलैश्छन्ना भातिरक्तोत्पलैः क्वचित्।
क्वचिदाभाति शुक्लैश्च दिव्यैः कुमुदकुड्मलैः॥ **4.27.22**॥ 1094

पारिप्लवशतैर्जुष्टा बर्हिक्रौञ्चविनादिता।
रमणीया नदी सौम्य मुनिसङ्घनिषेविता॥ **4.27.23**॥ 1095

पश्य चन्दनवृक्षाणां पङ्क्तीः सुरुचिरा इव।
ककुभानां च दृश्यन्ते मनसैवोदिताः समम्॥ **4.27.24**॥ 1096

अहो सुरमणीयोऽयं देशः शत्रुनिषूदन।
दृढं रंस्याव सौमित्रे साध्वत्र निवसावहे॥ **4.27.25**॥ 1097

इतश्च नातिदूरे सा किष्किन्धा चित्रकानना।
सुग्रीवस्य पुरी रम्या भविष्यति नृपात्मज॥ **4.27.26**॥ 1098

गीतवादित्रनिर्घोषः श्रूयते जयतां वर।
नदतां वानराणां च मृदङ्गाडम्बरैः सह॥ **4.27.27**॥ 1099

लब्ध्वा भार्यां कपिवरः प्राप्य राज्यं सुहृद्वृतः।
ध्रुवं नन्दति सुग्रीवः सम्प्राप्य महतीं श्रियम्॥ **4.27.28**॥ 1100

इत्युक्त्वा न्यवसत् तत्र राघवः सहलक्ष्मणः।
बहुदृश्यदरीकुञ्जे तस्मिन् प्रस्रवणे गिरौ॥ **4.27.29**॥ 1101

सुसुखे हि बहुद्रव्ये तस्मिन् हि धरणीधरे।
वसतस्तस्य रामस्य रतिरल्पापि नाभवत्॥ **4.27.30**॥ 1102

हृतां हि भार्यां स्मरतः प्राणेभ्योऽपि गरीयसीम्।
उदयाभ्युदितं दृष्ट्वा शशाङ्कं च विशेषतः॥ **4.27.31**॥ 1103

आविवेश न तं निद्रा निशासु शयनं गतम्।
तत्समुत्थेन शोकेन बाष्पोपहतचेतनम्॥ **4.27.32**॥ 1104

तं शोचमानं काकुत्स्थं नित्यं शोकपरायणम्।
तुल्यदुःखोऽब्रवीद्भ्राता लक्ष्मणोऽनुनयं वचः॥ **4.27.33**॥ 1105

अलं वीर व्यथां गत्वा न त्वं शोचितुमर्हसि।
शोचतो ह्यवसीदन्ति सर्वार्था विदितं हि ते॥ **4.27.34**॥ 1106

भवान् क्रियापरो लोके भवान् देवपरायणः।
आस्तिको धर्मशीलश्च व्यवसायी च राघव॥ **4.27.35**॥ 1107

न ह्यव्यवसितः शत्रुं राक्षसं तं विशेषतः।
समर्थस्त्वं रणे हन्तुं विक्रमे जिह्मकारिणम्॥ **4.27.36**॥ 1108

समुन्मूलय शोकं त्वं व्यवसायं स्थिरीकुरु।
ततः सपरिवारं तं राक्षसं हन्तुमर्हसि॥ **4.27.37**॥ 1109

पृथिवीमपि काकुत्स्थ ससागरवनाचलाम्।
परिवर्तयितुं शक्तः किं पुनस्तं हि रावणम्॥ **4.27.38**॥ 1110

शरत्कालं प्रतीक्षस्व प्रावृट्कालोऽयमागतः।
ततः सराष्ट्रं सगणं रावणं तं वधिष्यसि॥ **4.27.39**॥ 1111

अहं तु खलु ते वीर्यं प्रसुप्तं प्रतिबोधये।
दीप्तैराहुतिभिः काले भस्मच्छन्नमिवानलम्॥ **4.27.40**॥ 1112

लक्ष्मणस्य हि तद् वाक्यं प्रतिपूज्य हितं शुभम्।
राघवः सुहृदं स्निग्धमिदं वचनमब्रवीत्॥ **4.27.41**॥ 1113

वाच्यं यदनुरक्तेन स्निग्धेनं च हितेन च।
सत्यविक्रमयुक्तेन तदुक्तं लक्ष्मण त्वया॥ **4.27.42**॥ 1114

एष शोकः परित्यक्तः सर्वकार्यावसादकः।
विक्रमेष्वप्रतिहतं तेजः प्रोत्साहयाम्यहम्॥ **4.27.43**॥ 1115

शरत्कालं प्रतीक्षिष्ये स्थितोऽस्मि वचने तव।
सुग्रीवस्य नदीनां च प्रसादमनुपालयन्॥ **4.27.44**॥ 1116

उपकारेण वीरस्तु प्रतिकारेण युज्यते।
अकृतज्ञोऽप्रतिकृतो हन्ति सत्त्ववतां मनः॥ **4.27.45**॥ 1117

तदेव युक्तं प्रणिधाय लक्ष्मणः
कृताञ्जलिस्तत् प्रतिपूज्य भाषितम्।
उवाच रामं स्वभिरामदर्शनं
प्रदर्शयन् दर्शनमात्मनः शुभम्॥ **4.27.46**॥ 1118

यथोक्तमेतत् तव सर्वमीप्सितं
नरेन्द्र कर्ता नचिरात् तु वानरः।
शरत्प्रतीक्षः क्षमतामिमं भवान्
जलप्रपातं रिपुनिग्रहे धृतः॥ **4.27.47**॥ 1119

नियम्य कोपं परिपाल्यतां शरत्
क्षमस्व मासांश्चतुरो मया सह।
वसाचलेऽस्मिन् मृगराजसेविते
संवर्तयञ्शत्रुवधे समुद्यमम्॥ **4.27.48**॥ 1120

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये किष्किन्धाकाण्डे सप्तविंशः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ अष्टाविंशः सर्गः ॥

श्रीरामेण वर्षर्तोवर्णनम्

स तदा वालिनं हत्वा सुग्रीवमभिषिच्य च।
वसन् माल्यवतः पृष्ठे रामो लक्ष्मणमब्रवीत्॥ **4.28.1** ॥ 1121

अयं स कालः सम्प्राप्तः समयोऽद्य जलागमः।
सम्पश्य त्वं नभो मेघैः संवृतं गिरिसन्निभैः॥ **4.28.2** ॥ 1122

नवमासधृतं गर्भ भास्करस्य गभस्तिभिः।
पीत्वा रसं समुद्राणां द्यौः प्रसूते रसायनम्॥ **4.28.3** ॥ 1123

शक्यमम्बरमारुह्य मेघसोपानपङ्क्तिभिः।
कुटजार्जुनमालाभिरलङ्कर्तुं दिवाकरः॥ **4.28.4** ॥ 1124

सन्ध्यारागोत्थितैस्ताम्रैरन्तेष्वपि च पाण्डुभिः।
स्निग्धैरभ्रपटच्छेदैर्बद्धव्रणमिवाम्बरम्॥ **4.28.5** ॥ 1125

मन्दमारुतिनिःश्वासं सन्ध्याचन्दनरञ्जितम्।
आपाण्डुजलदं भाति कामातुरमिवाम्बरम्॥ **4.28.6** ॥ 1126

एषा घर्मपरिक्लिष्टा नववारिपरिप्लुता।
सीतेव शोकसन्तप्ता मही बाष्पं विमुञ्चति॥ **4.28.7** ॥ 1127

मेघोदरविनिर्मुक्ताः कर्पूरदलशीतलाः।
शक्यमञ्जलिभिः पातुं वाताः केतकगन्धिनः॥ **4.28.8**॥ 1128

एष फुल्लार्जुनः शैलः केतकैरभिवासितः।
सुग्रीव इव शान्तारिर्धाराभिरभिषिच्यते॥ **4.28.9**॥ 1129

मेघकृष्णाजिनधरा धारायज्ञोपवीतिनः।
मारुतापूरितगुहाः प्राधीता इव पर्वताः॥ **4.28.10**॥ 1130

कशाभिरिव हैमीभिर्विद्युद्भिरभिताडितम्।
अन्तःस्तनितनिर्घोषं सवेदनमिवाम्बरम्॥ **4.28.11**॥ 1131

नीलमेघाश्रिता विद्युत् स्फुरन्ती प्रतिभाति मे।
स्फुरन्ती रावणस्याङ्के वैदेहीव तपस्विनी॥ **4.28.12**॥ 1132

इमास्ता मन्मथवतां हिताः प्रतिहता दिशः।
अनुलिप्ता इव घनैर्नष्टग्रहनिशाकराः॥ **4.28.13**॥ 1133

क्वचिद् बाष्पाभिसंरुद्धान् वर्षागमसमुत्सुकान्।
कुटजान् पश्य सौमित्रे पुष्पितान् गिरिसानुषु।
मम शोकाभिभूतस्य कामसन्दीपनान् स्थितान्॥ **4.28.14**॥ 1134

रजः प्रशान्तं सहिमोऽद्य वायु -
निंदाघदोषप्रसराः प्रशान्ताः।
स्थिता हि यात्रा वसुधाधिपानां
प्रवासिनो यान्ति नराः स्वदेशान्॥ **4.28.15**॥ 1135

सम्प्रस्थिता मानसवासलुब्धाः
प्रियान्विताः सम्प्रति चक्रवाकाः।
अभीक्ष्णवर्षोदकविक्षतेषु
यानानि मार्गेषु न सम्पतन्ति॥ **4.28.16**॥ 1136

क्वचित् प्रकाशं क्वचिदप्रकाशं
नभः प्रकीर्णाम्बुधरं विभाति।
क्वचित्क्वचित् पर्वतसन्निरुद्धं
रूपं यथा शान्तमहार्णवस्य॥ **4.28.17**॥ 1137

व्यामिश्रितं सर्जकदम्बपुष्पै -
र्नवं जलं पर्वतधातुताम्रम्।
मयूरकेकाभिरनुप्रयातं
शैलापगाः शीघ्रतरं वहन्ति॥ **4.28.18**॥ 1138

रसाकुलं षट्पदसन्निकाशं
प्रभुज्यते जम्बुफलं प्रकामम्।
अनेकवर्णं पवनावधूतं
भूमौ पतत्याम्रफलं विपक्वम्॥ **4.28.19**॥ 1139

विद्युत्पताकाः सबलाकमालाः
शैलेन्द्रकूटाकृतिसन्निकाशाः।
गर्जन्ति मेघाः समुदीर्णनादा
मत्ता गजेन्द्रा इव संयुगस्थाः॥ **4.28.20**॥ 1140

वर्षोदकाप्यायितशाद्वलानि
प्रवृत्तनृत्तोत्सवबर्हिणानि।
वनानि निर्वृष्टबलाहकानि
पश्यापराह्णेष्वधिकं विभान्ति॥ **4.28.21**॥ 1141

समुद्वहन्तः सलिलातिभारं
बलाकिनो वारिधरा नदन्तः।
महत्सु शृङ्गेषु महीधराणां
विश्रम्य विश्रम्य पुनः प्रयान्ति॥ **4.28.22**॥ 1142

मेघाभिकामा परिसम्पतन्ती
सम्मोदिता भाति बलाकपङ्क्तिः।
वातावधूता वरपौण्डरीकी
लम्बेव माला रुचिराम्बरस्य॥ **4.28.23**॥ 1143

बालेन्द्रगोपान्तरचित्रितेन
विभाति भूमिर्नवशाद्वलेन।
गात्रानुपृक्तेन शुकप्रभेण
नारीव लाक्षोक्षितकम्बलेन॥ **4.28.24**॥ 1144

निद्रा शनैः केशवमभ्युपैति
द्रुतं नदी सागरमभ्युपैति।
हृष्टा बलाका घनमभ्युपैति
कान्ता सकामा प्रियमभ्युपैति॥ **4.28.25**॥ 1145

जाता वनान्ताः शिखिसुप्रनृत्ता
जाताः कदम्बाः सकदम्बशाखाः।
जाता वृषा गोषु समानकामा
जाता मही सस्यवनाभिरामा॥ **4.28.26**॥ 1146

वहन्ति वर्षन्ति नदन्ति भान्ति
ध्यायन्ति नृत्यन्ति समाश्वसन्ति।
नद्यो घना मत्तगजा वनान्ताः
प्रियाविहीनाः शिखिनः प्लवङ्गमाः॥ **4.28.27**॥ 1147

प्रहर्षिताः केतकिपुष्पगन्ध -
माघ्राय मत्ता वननिर्झरेषु।
प्रपातशब्दाकुलिता गजेन्द्राः
सार्धं मयूरैः समदा नदन्ति॥ **4.28.28**॥ 1148

धारानिपातैरभिहन्यमानाः
कदम्बशाखासु विलम्बमानाः।
क्षणार्जितं पुष्परसावगाढं
शनैर्मदं षड्चरणास्त्यजन्ति॥ **4.28.29**॥ 1149

अङ्गारचूर्णोत्करसन्निकाशैः
फलैः सुपर्याप्तरसैः समृद्धैः।
जम्बूद्रुमाणां प्रविभान्ति शाखा
निपीयमाना इव षड्चदौघैः॥ **4.28.30**॥ 1150

तडित्पताकाभिरलङ्कृताना -
मुदीर्णगम्भीरमहारवाणाम्।
विभान्ति रूपाणि बलाहकानां
रणोत्सुकानामिव वारणानाम्॥ **4.28.31**॥ 1151

मार्गानुगः शैलवनानुसारी
सम्प्रस्थितो मेघरवं निशम्य।
युद्धाभिकामः प्रतिनादशङ्की
मत्तो गजेन्द्रः प्रतिसन्निवृत्तः॥ **4.28.32**॥ 1152

क्वचित् प्रगीता इव षड्चदौघैः
क्वचित् प्रनृत्ता इव नीलकण्ठैः।
क्वचित् प्रमत्ता इव वारणेन्द्रै -
र्विभान्त्यनेकाश्रयिणो वनान्ताः॥ **4.28.33**॥ 1153

कदम्बसर्जार्जुनकन्दलाढ्या
वनान्तभूमिर्मधुवारिपूर्णा।
मयूरमत्ताभिरुतप्रनृत्तै -
रापानभूमिप्रतिमा विभाति॥ **4.28.34**॥ 1154

मुक्तासमाभं सलिलं पतद् वै
सुनिर्मलं पत्रपुटेषु लग्नम्।
हृष्टा विवर्णच्छदना विहङ्गाः
सुरेन्द्रदत्तं तृषिताः पिबन्ति॥ **4.28.35**॥ 1155

षड्वादतन्त्रीमधुराभिधानं
प्लवङ्गमोदीरितकण्ठतालम्।
आविष्कृतं मेघमृदङ्गनादै -
र्वनेषु सङ्गीतमिव प्रवृत्तम्॥ **4.28.36**॥ 1156

क्वचित् प्रनृत्तैः क्वचिदुन्नदद्भिः
क्वचिच्च वृक्षाग्रनिषण्णकायैः।
व्यालम्बबर्हाभरणैर्मयूरै -
र्वनेषु सङ्गीतमिव प्रवृत्तम्॥ **4.28.37**॥ 1157

स्वनैर्घनानां प्लवगाः प्रबुद्धा
विहाय निद्रां चिरसन्निरुद्धाम्।
अनेकरूपाकृतिवर्णनादा
नवाम्बुधाराभिहता नदन्ति॥ **4.28.38**॥ 1158

नद्यः समुद्वाहितचक्रवाका -
स्तटानि शीर्णान्यपवाहयित्वा।
दृप्ता नवप्रावृतपूर्णभोगा -
दृतं स्वभर्तारमुपोपयान्ति॥ **4.28.39**॥ 1159

नीलेषु नीला नववारिपूर्णा
मेघेषु मेघाः प्रतिभान्ति सक्ताः।
दवाग्निदग्धेषु दवाग्निदग्धाः
शैलेषु शैला इव बद्धमूलाः॥ **4.28.40**॥ 1160

प्रमत्तसन्नादितबर्हिणानि
सशक्रगोपाकुलशाद्वलानि।
चरन्ति नीपार्जुनवासितानि
गजाः सुरम्याणि वनान्तराणि॥ **4.28.41**॥ 1161

नवाम्बुधाराहतकेसराणि
द्रुतं परित्यज्य सरोरुहाणि।
कदम्बपुष्पाणि सकेसराणि
नवानि हृष्टा भ्रमराः पिबन्ति॥ **4.28.42**॥ 1162

मत्ता गजेन्द्रा मुदिता गवेन्द्रा
वनेषु विक्रान्ततरा मृगेन्द्राः।
रम्या नगेन्द्रा निभृता नरेन्द्राः
प्रक्रीडितो वारिधरैः सुरेन्द्रः॥ **4.28.43**॥ 1163

मेघाः समुद्भूतसमुद्रनादा
महाजलौघैर्गगनावलम्बाः।
नदीस्तटाकानि सरांसि वापी -
र्महीं च कृत्स्नामपवाहयन्ति॥ **4.28.44**॥ 1164

वर्षप्रवेगा विपुलाः पतन्ति
प्रवान्ति वाताः समुदीर्णवेगाः।
प्रणष्टकूलाः प्रवहन्ति शीघ्रं
नद्यो जलं विप्रतिपन्नमार्गाः॥ **4.28.45**॥ 1165

नरैर्नरेन्द्रा इव पर्वतेन्द्राः
सुरेन्द्रदत्तैः पवनोपनीतैः।
घनाम्बुकुम्भैरभिषिच्यमाना
रूपं श्रियं स्वामिव दर्शयन्ति॥ **4.28.46**॥ 1166

घनोपगूढं गगनं न तारा
न भास्करो दर्शनमभ्युपैति।
नवैर्जलौघैर्धरणी वितृप्ता
तमोविलिप्ता न दिशः प्रकाशाः॥ **4.28.47**॥ 1167

महान्ति कूटानि महीधराणां
धाराविधौतान्यधिकं विभान्ति।
महाप्रमाणैर्विपुलैः प्रपातै -
र्मुक्ताकलापैरिव लम्बमानैः॥ **4.28.48**॥ 1168

शैलोपलप्रस्खलमानवेगाः
शैलोत्तमानां विपुलाः प्रपाताः।
गुहासु सन्नादितबर्हिणासु
हारा विकीर्यन्त इवावभान्ति॥ **4.28.49**॥ 1169

शीघ्रप्रवेगा विपुलाः प्रपाता
निर्धौतशृङ्गोपतला गिरीणाम्।
मुक्ताकलापप्रतिमाः पतन्तो
महागुहोत्सङ्गतलैर्ध्रियन्ते॥ **4.28.50**॥ 1170

सुरतामर्दविच्छिन्नाः स्वर्गस्त्रीहारमौक्तिकाः।
पतन्ति चातुला दिक्षु तोयधाराः समन्ततः॥ **4.28.51**॥ 1171

विलीयमानैर्विहगैर्निमीलद्भिश्च पङ्कजैः।
विकसन्त्या च मालत्या गतोऽस्तं ज्ञायते रविः॥ **4.28.52**॥ 1172

वृत्ता यात्रा नरेन्द्राणां सेना पथ्येव वर्तते।
वैराणि चैव मार्गाश्च सलिलेन समीकृताः॥ **4.28.53**॥ 1173

मासि प्रौष्ठपदे ब्रह्म ब्राह्मणानां विवक्षताम्।
अयमध्यायसमयः सामगानामुपस्थितः॥ **4.28.54**॥ 1174

विवृत्तकर्मायतनो नूनं सञ्चितसञ्चयः।
आषाढीमभ्युपगतो भरतः कोसलाधिपः॥ **4.28.55**॥ 1175

नूनमापूर्यमाणायाः सरय्वा वर्धते रयः।
मां समीक्ष्य समायान्तमयोध्याया इव स्वनः॥ **4.28.56**॥ 1176

इमाः स्फीतगुणा वर्षाः सुग्रीवः सुखमश्नुते।
विजितारिः सदारश्च राज्ये महति च स्थितः॥ **4.28.57**॥ 1177

अहं तु हृतदारश्च राज्याच्च महतश्च्युतः।
नदीकूलमिव क्लिन्नमवसीदामि लक्ष्मण॥ **4.28.58**॥ 1178

शोकश्च मम विस्तीर्णो वर्षाश्च भृशदुर्गमाः।
रावणश्च महाञ्छत्रुरपारः प्रतिभाति मे॥ **4.28.59**॥ 1179

अयात्रां चैव दृष्ट्वेमां मार्गांश्च भृशदुर्गमान्।
प्रणते चैव सुग्रीवे न मया किञ्चिदीरितम्॥ **4.28.60**॥ 1180

अपि चापि परिक्लिष्टं चिराद् दारैः समागतम्।
आत्मकार्यगरीयस्त्वाद् वक्तुं नेच्छामि वानरम्॥ **4.28.61**॥ 1181

स्वयमेव हि विश्रम्य ज्ञात्वा कालमुपागतम्।
उपकारं च सुग्रीवो वेत्स्यते नात्र संशयः॥ **4.28.62**॥ 1182

तस्मात् कालप्रतीक्षोऽहं स्थितोऽस्मि शुभलक्षण।
सुग्रीवस्य नदीनां च प्रसादमभिकाङ्क्षयन्॥ **4.28.63**॥ 1183

उपकारेण वीरो हि प्रतीकारेण युज्यते।
अकृतज्ञोऽप्रतिकृतो हन्ति सत्त्ववतां मनः॥ **4.28.64**॥ 1184

अथैवमुक्तः प्रणिधाय लक्ष्मणः
कृताञ्जलिस्तत् प्रतिपूज्य भाषितम्।
उवाच रामं स्वभिरामदर्शनं
प्रदर्शयन् दर्शनमात्मनः शुभम्॥ **4.28.65**॥ 1185

यदुक्तमेतत् तव सर्वमीप्सितं
नरेन्द्र कर्ता नचिराद्धरीश्वरः।
शरत्प्रतीक्षः क्षमतामिमं भवाञ्
जलप्रपातं रिपुनिग्रहे धृतः॥ **4.28.66**॥ 1186

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
किष्किन्धाकाण्डे अष्टाविंशः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ एकोनत्रिंशः सर्गः ॥

हनुमता बोधितेन सुग्रीवेण नीलं प्रति वानरसैनिकानामेकत्रकरणायादेशदानम्

समीक्ष्य विमलं व्योम गतविद्युद्बलाहकम्।
सारसाकुलसङ्घुष्टं रम्यज्योत्स्नानुलेपनम्॥ **4.29.1** ॥ 1187

समृद्धार्थं च सुग्रीवं मन्दधर्मार्थसङ्ग्रहम्।
अत्यर्थं चासतां मार्गमेकान्तगतमानसम्॥ **4.29.2** ॥ 1188

निवृत्तकार्यं सिद्धार्थं प्रमदाभिरतं सदा।
प्राप्तवन्तमभिप्रेतान् सर्वानेव मनोरथान्॥ **4.29.3** ॥ 1189

स्वां च पत्नीमभिप्रेतां तारां चापि समीप्सिताम्।
विहरन्तमहोरात्रं कृतार्थं विगतज्वरम्॥ **4.29.4** ॥ 1190

क्रीडन्तमिव देवेशं गन्धर्वाप्सरसां गणैः।
मन्त्रिषु न्यस्तकार्यं च मन्त्रिणामनवेक्षकम्॥ **4.29.5** ॥ 1191

उच्छिन्नराज्यसन्देहं कामवृत्तमिव स्थितम्।
निश्चितार्थोऽर्थतत्त्वज्ञः कालधर्मविशेषवित्॥ **4.29.6** ॥ 1192

प्रसाद्य वाक्यैर्विविधैर्हेतुमद्भिर्मनोरमैः।
वाक्यविद् वाक्यतत्त्वज्ञं हरीशं मारुतात्मजः॥ **4.29.7** ॥ 1193

हितं तथ्यं च पथ्यं च सामधर्मार्थनीतिमत्।
प्रणयप्रीतिसंयुक्तं विश्वासकृतनिश्चयम्॥ **4.29.8**॥ 1194

हरीश्वरमुपागम्य हनूमान् वाक्यमब्रवीत्।
राज्यं प्राप्तं यशश्चैव कौली श्रीरभिवर्धिता॥ **4.29.9**॥ 1195

मित्राणां सङ्ग्रहः शेषस्तद् भवान् कर्तुमर्हति।
यो हि मित्रेषु कालज्ञः सततं साधु वर्तते॥ **4.29.10**॥ 1196

तस्य राज्यं च कीर्तिश्च प्रतापश्चापि वर्धते।
यस्य कोशश्च दण्डश्च मित्राण्यात्मा च भूमिप।
समान्येतानि सर्वाणि स राज्यं महदश्नुते॥ **4.29.11**॥ 1197

तद् भवान् वृत्तसम्पन्नः स्थितःपथि निरत्यये।
मित्रार्थमभिनीतार्थं यथावत् कर्तुमर्हति॥ **4.29.12**॥ 1198

सन्त्यज्य सर्वकर्माणि मित्रार्थे यो न वर्तते।
सभ्रमाद् विकृतोत्साहः सोऽनर्थेनावरुध्यते॥ **4.29.13**॥ 1199

यो हि कालव्यतीतेषु मित्रकार्येषु वर्तते।
स कृत्वा महतोऽप्यर्थान्न मित्रार्थेन युज्यते॥ **4.29.14**॥ 1200

तदिदं मित्रकार्यं नः कालातीतमरिन्दम।
क्रियतां राघवस्यैतद् वैदेह्याः परिमार्गणम्॥ **4.29.15**॥ 1201

न च कालमतीतं ते निवेदयति कालवित्।
त्वरमाणोऽपि स प्राज्ञस्तव राजन् वशानुगः॥ **4.29.16**॥ 1202

कुलस्य हेतुः स्फीतस्य दीर्घबन्धुश्च राघवः।
अप्रमेयप्रभावश्च स्वयं चाप्रतिमो गुणैः॥ **4.29.17**॥ 1203

तस्य त्वं कुरु वै कार्य पूर्वं तेन कृतं तव।
हरीश्वर कपिश्रेष्ठानाज्ञापयितुमर्हसि॥ **4.29.18**॥ 1204

नहि तावद् भवेत् कालो व्यतीतश्चोदनादृते।
चोदितस्य हि कार्यस्य भवेत् कालव्यतिक्रमः॥ **4.29.19**॥ 1205

अकर्तुरपि कार्यस्य भवान् कर्ता हरीश्वर।
किं पुनः प्रतिकर्तुस्ते राज्येन च वधेन च॥ **4.29.20**॥ 1206

शक्तिमानतिविक्रान्तो वानरर्क्षगणेश्वर।
कर्तुं दाशरथेः प्रीतिमाज्ञायां किं नु सज्जसे॥ **4.29.21**॥ 1207

कामं खलु शरैः शक्तः सुरासुरमहोरगान्।
वशे दाशरथिः कर्तुं त्वत्प्रतिज्ञामवेक्षते॥ **4.29.22**॥ 1208

प्राणत्यागाविशङ्केन कृतं तेन महत् प्रियम्।
तस्य मार्गाम वैदेहीं पृथिव्यामपि चाम्बरे॥ **4.29.23**॥ 1209

देवदानवगन्धर्वा असुराः समरुद्गणाः।
न च यक्षा भयं तस्य कुर्युः किमिव राक्षसाः॥ **4.29.24**॥ 1210

तदेवं शक्तियुक्तस्य पूर्वं प्रतिकृतस्तथा।
रामस्यार्हसि पिङ्गेश कर्तुं सर्वात्मना प्रियम्॥ **4.29.25**॥ 1211

नाधस्तादवनौ नाप्सु गतिर्नोपरि चाम्बरे।
कस्यचित् सज्जतेऽस्माकं कपीश्वर तवाज्ञया॥ **4.29.26**॥ 1212

तदाज्ञापय कः किं ते कुतो वापि व्यवस्यतु।
हरयो ह्यप्रधृष्यास्ते सन्ति कोट्यग्रतोऽनघ॥ **4.29.27**॥ 1213

तस्य तद् वचनं श्रुत्वा काले साधु निरूपितम्।
सुग्रीवः सत्त्वसम्पन्नश्चकार मतिमुत्तमाम्॥ **4.29.28**॥ 1214

सन्दिदेशातिमतिमान् नीलं नित्यकृतोद्यमम्।
दिक्षु सर्वासु सर्वेषां सैन्यानामुपसङ्ग्रहे॥ **4.29.29**॥ 1215

यथा सेना समग्रा मे यूथपालाश्च सर्वशः।
समागच्छन्त्यसङ्क्लेन सेनाग्र्येण तथा कुरु॥ **4.29.30**॥ 1216

ये त्वन्तपालाः प्लवगाः शीघ्रगा व्यवसायिनः।
समानयन्तु ते शीघ्रं त्वरिताः शासनान्मम।
स्वयं चानन्तरं कार्यं भवानेवानुपश्यतु॥ **4.29.31**॥ 1217

त्रिपञ्चरात्रादूर्ध्वं यः प्राप्नुयादिह वानरः।
तस्य प्राणान्तिको दण्डो नात्र कार्याविचारणा॥ **4.29.32**॥ 1218

हरींश्च वृद्धानुपयातु साङ्गदो
भवान् ममाज्ञामधिकृत्य निश्चितम्।
इति व्यवस्थां हरिपुङ्गवेश्वरो
विधाय वेश्म प्रविवेश वीर्यवान्॥ **4.29.33**॥ 1219

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
किष्किन्धाकाण्डे एकोनत्रिंशः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ त्रिंशः सर्गः ॥

शरद्वर्णनं श्रीरामेण लक्ष्मणाय सुग्रीवपार्श्वं गन्तुमादेशदानम्

गृहं प्रविष्टे सुग्रीवे विमुक्ते गगने घनैः।
वर्षरात्रे स्थितो रामः कामशोकाभिपीडितः॥ **4.30.1** ॥ 1220

पाण्डुरं गगनं दृष्ट्वा विमलं चन्द्रमण्डलम्।
शारदीं रजनीं चैव दृष्ट्वा ज्योत्स्नानुलेपनाम्॥ **4.30.2** ॥ 1221

कामवृत्तं च सुग्रीवं नष्टां च जनकात्मजाम्।
दृष्ट्वा कालमतीतं च मुमोह परमातुरः॥ **4.30.3** ॥ 1222

स तु संज्ञामुपागम्य मुहूर्तान्मतिमान् नृपः।
मनः स्थामपि वैदेहीं चिन्तयामास राघवः॥ **4.30.4** ॥ 1223

दृष्ट्वा च विमलं व्योम गतविद्युद्बलाहकम्।
सारसारावसङ्घुष्टं विललापार्तया गिरा॥ **4.30.5** ॥ 1224

आसीनः पर्वतस्याग्रे हेमधातुविभूषिते।
शारदं गगनं दृष्ट्वा जगाम मनसा प्रियाम्॥ **4.30.6** ॥ 1225

सारसारावसन्नादैः सारसारावनादिनी।
याऽऽश्रमे रमते बाला साद्य मे रमते कथम्॥ **4.30.7** ॥ 1226

पुष्पितांश्चासनान् दृष्ट्वा काञ्चनानिव निर्मलान्।
कथं सा रमते बाला पश्यन्ती मामपश्यती॥ **4.30.8**॥ 1227

या पुरा कलहंसानां कलेन कलभाषिणी।
बुध्यते चारुसर्वाङ्गी साद्य मे रमते कथम्॥ **4.30.9**॥ 1228

निःस्वनं चक्रवाकानां निशम्य सहचारिणाम्।
पुण्डरीकविशालाक्षी कथमेषा भविष्यति॥ **4.30.10**॥ 1229

सरांसि सरितो वापीः काननानि वनानि च।
तां विना मृगशावाक्षीं चरन्नाद्य सुखं लभे॥ **4.30.11**॥ 1230

अपि तां मद्वियोगाच्च सौकुमार्याच्च भामिनीम्।
सुदूरं पीडयेत् कामः शरद्गुणनिरन्तरः॥ **4.30.12**॥ 1231

एवमादि नरश्रेष्ठो विललाप नृपात्मजः।
विहङ्ग इव सारङ्गः सलिलं त्रिदशेश्वरात्॥ **4.30.13**॥ 1232

ततश्चञ्चूर्य रम्येषु फलार्थी गिरिसानुषु।
ददर्श पर्युपावृत्तो लक्ष्मीवान् लक्ष्मणोऽग्रजम्॥ **4.30.14**॥ 1233

स चिन्तया दुस्सहया परीतं
विसंज्ञमेकं विजने मनस्वी।
भ्रातुर्विषादात् त्वरितोऽतिदीनः
समीक्ष्य सौमित्रिरुवाच दीनम्॥ **4.30.15**॥ 1234

किमार्य कामस्य वशङ्गतेन
किमात्मपौरुष्यपराभवेन।
अयं ह्रिया संह्रियते समाधिः
किमत्र योगेन निवर्तते न॥ **4.30.16**॥ 1235

क्रियाभियोगं मनसः प्रसादं
समाधियोगानुगतं च कालम्।
सहायसामर्थ्यमदीनसत्त्वः
स्वकर्महेतुं च कुरुष्व तात॥ **4.30.17**॥ 1236

न जानकी मानववंशनाथ
त्वया सनाथा सुलभा परेण।
न चाग्निचूडां ज्वलितामुपेत्य
न दह्यते वीर वरार्ह कश्चित्॥ **4.30.18**॥ 1237

सलक्षणं लक्ष्मणमप्रधृष्यं
स्वभावजं वाक्यमुवाच रामः।
हितं च पथ्यं च नयप्रसक्तं
ससामधर्मार्थसमाहितं च॥ **4.30.19**॥ 1238

निस्संशयं कार्यमवेक्षितव्यं
क्रियाविशेषोऽप्यनुवर्तितव्यः।
न तु प्रवृद्धस्य दुरासदस्य
कुमार वीर्यस्य फलं च चिन्त्यम्॥ **4.30.20**॥ 1239

अथ पद्मपलाशाक्षीं मैथिलीमनुचिन्तयन्।
उवाच लक्ष्मणं रामो मुखेन परिशुष्यता॥ **4.30.21**॥ 1240

तर्पयित्वा सहस्राक्षः सलिलेन वसुन्धराम्।
निर्वर्तयित्वा सस्यानि कृतकर्मा व्यवस्थितः॥ **4.30.22**॥ 1241

दीर्घगम्भीरनिर्घोषाः शैलद्रुमपुरोगमाः।
विसृज्य सलिलं मेघाः परिशान्ता नृपात्मज॥ **4.30.23**॥ 1242

नीलोत्पलदलश्यामाः श्यामीकृत्वा दिशो दश।
विमदा इव मातङ्गाः शान्तवेगाः पयोधराः॥ **4.30.24**॥ 1243

जलगर्भा महावेगाः कुटजार्जुनगन्धिनः।
चरित्वा विरताः सौम्य वृष्टिवाताः समुद्यताः॥ **4.30.25**॥ 1244

घनानां वारणानां च मयूराणां च लक्ष्मण।
नादः प्रस्रवणानां च प्रशान्तः सहसानघ॥ **4.30.26**॥ 1245

अभिवृष्टा महामेघैर्निर्मलाश्चित्रसानवः।
अनुलिप्ता इवाभान्ति गिरयश्चन्द्ररश्मिभिः॥ **4.30.27**॥ 1246

शाखासु सप्तच्छदपादपानां
प्रभासु तारार्कनिशाकराणाम्।
लीलासु चैवोत्तमवारणानां
श्रियं विभज्याद्य शरत्प्रवृत्ता॥ **4.30.28**॥ 1247

सम्प्रत्यनेकाश्रयचित्रशोभा
लक्ष्मीः शरत्कालगुणोपपन्ना।
सूर्याग्रहस्तप्रतिबोधितेषु
पद्माकरेष्वभ्यधिकं विभाति॥ **4.30.29**॥ 1248

सप्तच्छदानां कुसुमोपगन्धी
षट्पादवृन्दैरनुगीयमानः।
मत्तद्विपानां पवनानुसारी
दर्पं विनेष्यन्नधिकं विभाति॥ **4.30.30**॥ 1249

अभ्यागतैश्चारुविशालपक्षैः
स्मरप्रियैः पद्मरजोऽवकीर्णैः।

महानदीनां पुलिनोपयातैः
क्रीडन्ति हंसाः सह चक्रवाकैः ॥ **4.30.31** ॥ 1250

मदप्रगल्भेषु च वारणेषु
गवां समूहेषु च दर्पितेषु।
प्रसन्नतोयासु च निम्नगासु
विभाति लक्ष्मीर्बहुधा विभक्ता ॥ **4.30.32** ॥ 1251

नभः समीक्ष्याम्बुधरैर्विमुक्तं
विमुक्तबर्हाभरणा वनेषु।
प्रियास्वरक्ता विनिवृत्तशोभा
गतोत्सवा ध्यानपरा मयूराः ॥ **4.30.33** ॥ 1252

मनोज्ञगन्धैः प्रियकैरनल्पैः
पुष्पातिभारावनताग्रशाखैः।
सुवर्णगौरैर्नयनाभिरामै -
रुद्योतितानीव वनान्तराणि ॥ **4.30.34** ॥ 1253

प्रियान्वितानां नलिनीप्रियाणां
वने प्रियाणां कुसुमोद्गतानाम्।
मदोत्कटानां मदलालसानां
गजोत्तमानां गतयोऽद्य मन्दाः ॥ **4.30.35** ॥ 1254

व्यक्तं नभः शस्त्रविधौतवर्णं
कृशप्रवाहानि नदीजलानि।
कह्लारशीताः पवनाः प्रवान्ति
तमो विमुक्ताश्च दिशः प्रकाशाः ॥ **4.30.36** ॥ 1255

सूर्यातपक्रामणनष्टपङ्का
भूमिश्चिरोद्धाटितसान्द्ररेणुः।
अन्योन्यवैरेण समायुताना -
मुद्योगकालोऽद्य नराधिपानाम्॥ **4.30.37**॥ 1256

शरद्गुणाप्यायितरूपशोभाः
प्रहर्षिताः पांसुसमुत्थिताङ्गाः।
मदोत्कटाः सम्प्रति युद्धलुब्धा
वृषा गवां मध्यगता नदन्ति॥ **4.30.38**॥ 1257

समन्मथा तीव्रतरानुरागा
कुलान्विता मन्दगतिः करेणुः।
मदान्वितं सम्परिवार्य यान्तं
वनेषु भर्तारमनुप्रयाति॥ **4.30.39**॥ 1258

त्यक्त्वा वराण्यात्मविभूषितानि
बर्हाणि तीरोपगता नदीनाम्।
निर्भर्त्स्यमाना इव सारसौघैः
प्रयान्ति दीना विमना मयूराः॥ **4.30.40**॥ 1259

वित्रास्य कारण्डवचक्रवाकान्
महारवैर्भिन्नकटा गजेन्द्राः।
सरस्सुबद्धाम्बुजभूषणेषु
विक्षोभ्य विक्षोभ्य जलं पिबन्ति॥ **4.30.41**॥ 1260

व्यपेतपङ्कासु सवालुकासु
प्रसन्नतोयासु सगोकुलासु।
ससारसारावविनादितासु
नदीषु हंसा निपतन्ति हृष्टाः॥ **4.30.42**॥ 1261

नदीघनप्रस्रवणोदकाना -
मतिप्रवृद्धानिलबर्हिणानाम्।
प्लवङ्गमानां च गतोत्सवानां
ध्रुवं रवाः सम्प्रति सम्प्रणष्टाः॥ **4.30.43**॥ 1262

अनेकवर्णाः सुविनष्टकाया
नवोदितेष्वम्बुधरेषु नष्टाः।
क्षुधार्दिता घोरविषा बिलेभ्य -
श्चिरोषिता विप्रसरन्ति सर्पाः॥ **4.30.44**॥ 1263

चञ्चच्चन्द्रकरस्पर्शहर्षोन्मीलिततारका।
अहो रागवती सन्ध्या जहाति स्वयमम्बरम्॥ **4.30.45**॥ 1264

रात्रिः शशाङ्कोदितसौम्यवक्त्रा
तारागणोन्मीलितचारुनेत्रा।
ज्योत्स्नांशुकप्रावरणा विभाति
नारीव शुक्लांशुकसंवृताङ्गी॥ **4.30.46**॥ 1265

विपक्वशालिप्रसवानि भुक्त्वा
प्रहर्षिता सारसचारुपङ्क्तिः।
नभः समाक्रामति शीघ्रवेगा
वातावधूता ग्रथितेव माला॥ **4.30.47**॥ 1266

सुप्तैकहंसं कुमुदैरुपेतं
महाह्रदस्थं सलिलं विभाति।
घनैर्विमुक्तं निशि पूर्णचन्द्रं
तारागणाकीर्णमिवान्तरिक्षम्॥ **4.30.48**॥ 1267

प्रकीर्णहंसाकुलमेखलानां
प्रबुद्धपद्मोत्पलमालिनीनाम्।
वाप्युत्तमानामधिकाद्य लक्ष्मी -
र्वराङ्गनानामिव भूषितानाम्॥ **4.30.49**॥ 1268

वेणुस्वरव्यञ्जिततूर्यमिश्रः
प्रत्यूषकालेऽनिलसम्प्रवृत्तः।
सम्मूर्छितो गर्गरगोवृषाणा -
मन्योन्यमापूरयतीव शब्दः॥ **4.30.50**॥ 1269

नवैर्नदीनां कुसुमप्रहासै
र्व्याधूयमानैर्मृदुमारुतेन।
धौतामलक्षौमपटप्रकाशैः
कूलानि काशैरुपशोभितानि॥ **4.30.51**॥ 1270

वनप्रचण्डा मधुपानशौण्डाः
प्रियान्विताः षट्चरणाः प्रहृष्टाः।
वनेषु मत्ताः पवनानुयात्रां
कुर्वन्ति पद्मासनरेणुगौराः॥ **4.30.52**॥ 1271

जलं प्रसन्नं कुसुमप्रहासं
क्रौञ्चस्वनं शालिवनं विपक्वम्।
मृदुश्च वायुर्विमलश्च चन्द्रः
शंसन्ति वर्षव्यपनीतकालम्॥ **4.30.53**॥ 1272

मीनोपसन्दर्शितमेखलानां
नदीवधूनां गतयोऽद्य मन्दाः।
कान्तोपभुक्तालसगामिनीनां
प्रभातकालेष्विव कामिनीनाम्॥ **4.30.54**॥ 1273

सचक्रवाकानि सशैवलानि
काशैर्दुकूलैरिव संवृतानि।
सपत्ररेखाणि सरोचनानि
वधूमुखानीव नदीमुखानि॥ **4.30.55**॥ 1274

प्रफुल्लबाणासनचित्रितेषु
प्रहृष्टषड्पादनिकूजितेषु।
गृहीतचापोद्यतदण्डचण्डः
प्रचण्डचापोऽद्य वनेषु कामः॥ **4.30.56**॥ 1275

लोकं सुवृष्ट्या परितोषयित्वा
नदीस्तटाकानि च पूरयित्वा।
निष्पन्नसस्यां वसुधां च कृत्वा
त्यक्त्वा नभस्तोयधराः प्रणष्टाः॥ **4.30.57**॥ 1276

दर्शयन्ति शरन्नद्यः पुलिनानि शनैः शनैः।
नवसङ्गमसव्रीडा जघनानीव योषितः॥ **4.30.58**॥ 1277

प्रसन्नसलिलाः सौम्य कुरराभिविनादिताः।
चक्रवाकगणाकीर्णा विभान्ति सलिलाशयाः॥ **4.30.59**॥ 1278

अन्योन्यबद्धवैराणां जिगीषूणां नृपात्मज।
उद्योगसमयः सौम्य पार्थिवानामुपस्थितः॥ **4.30.60**॥ 1279

इयं सा प्रथमा यात्रा पार्थिवानां नृपात्मज।
न च पश्यामि सुग्रीवमुद्योगं च तथाविधम्॥ **4.30.61**॥ 1280

असनाः सप्तपर्णाश्च कोविदाराश्च पुष्पिताः।
दृश्यन्ते बन्धुजीवाश्च श्यामाश्च गिरिसानुषु॥ **4.30.62**॥ 1281

हंससारसचक्राद्यैः कुररैश्च समन्ततः।
पुलिनान्यवकीर्णानि नदीनां पश्य लक्ष्मण॥ **4.30.63**॥ 1282

चत्वारो वार्षिका मासा गता वर्षशतोपमाः।
मम शोकाभितप्तस्य तथा सीतामपश्यतः॥ **4.30.64**॥ 1283

चक्रवाकीव भर्तारं पृष्ठतोऽनुगता वनम्।
विषमं दण्डकारण्यमुद्यानमिव चाङ्गना॥ **4.30.65**॥ 1284

प्रियाविहीने दुःखार्ते हृतराज्ये विवासिते।
कृपां न कुरुते राजा सुग्रीवो मयि लक्ष्मण॥ **4.30.66**॥ 1285

अनाथो हृतराज्योऽहं रावणेन च धर्षितः।
दीनो दूरगृहः कामी मां चैव शरणं गतः॥ **4.30.67**॥ 1286

इत्येतैः कारणैः सौम्य सुग्रीवस्य दुरात्मनः।
अहं वानरराजस्य परिभूतः परन्तपः॥ **4.30.68**॥ 1287

स कालं परिसङ्ख्याय सीतायाः परिमार्गणे।
कृतार्थः समयं कृत्वा दुर्मतिर्नावबुध्यते॥ **4.30.69**॥ 1288

स किष्किन्धां प्रविश्य त्वं ब्रूहि वानरपुङ्गवम्।
मूर्खं ग्राम्यसुखे सक्तं सुग्रीवं वचनान्मम॥ **4.30.70**॥ 1289

अर्थिनामुपपन्नानां पूर्वं चाप्युपकारिणाम्।
आशां संश्रुत्य यो हन्ति स लोके पुरुषाधमः॥ **4.30.71**॥ 1290

शुभं वा यदि वा पापं यो हि वाक्यमुदीरितम्।
सत्येन परिगृह्णाति स वीरः पुरुषोत्तमः॥ **4.30.72**॥ 1291

कृतार्था ह्यकृतार्थानां मित्राणां न भवन्ति ये।
तान् मृतानपि क्रव्यादाः कृतघ्नान् नोपभुञ्जते॥ **4.30.73**॥ 1292

नूनं काञ्चनपृष्ठस्य विकृष्टस्य मया रणे।
द्रष्टुमिच्छसि चापस्य रूपं विद्युद्गणोपमम्॥ **4.30.74**॥ 1293

घोरं ज्यातलनिर्घोषं क्रुद्धस्य मम संयुगे।
निर्घोषमिव वज्रस्य पुनः संश्रोतुमिच्छसि॥ **4.30.75**॥ 1294

काममेवङ्गतेऽप्यस्य परिज्ञाते पराक्रमे।
त्वत्सहायस्य मे वीर न चिन्ता स्यान्नृपात्मज॥ **4.30.76**॥ 1295

यदर्थमयमारम्भः कृतः परपुरञ्जय।
समयं नाभिजानाति कृतार्थः प्लवगेश्वरः॥ **4.30.77**॥ 1296

वर्षाः समयकालं तु प्रतिज्ञाय हरीश्वरः।
व्यतीतांश्चतुरो मासान् विहरन् नावबुध्यते॥ **4.30.78**॥ 1297

सामात्यपरिषत्क्रीडन् पानमेवोपसेवते।
शोकदीनेषु नास्मासु सुग्रीवः कुरुते दयाम्॥ **4.30.79**॥ 1298

उच्यतां गच्छ सुग्रीवस्त्वया वीर महाबल।
मम रोषस्य यद्रूपं ब्रूयाश्चैनमिदं वचः॥ **4.30.80**॥ 1299

न स सङ्कुचितः पन्था येन वाली हतो गतः।
समये तिष्ठ सुग्रीव मा वालिपथमन्वगाः॥ **4.30.81**॥ 1300

एक एव रणे वाली शरेण निहतो मया।
त्वां तु सत्यादतिक्रान्तं हनिष्यामि सबान्धवम्॥ **4.30.82**॥ 1301

यदेवं विहिते कार्ये यद्धितं पुरुषर्षभ।
तत् तद् ब्रूहि नरश्रेष्ठ त्वर कालव्यतिक्रमः॥ **4.30.83**॥ 1302

कुरुष्व सत्यं मम वानरेश्वर
प्रतिश्रुतं धर्ममवेक्ष्य शाश्वतम्।

मा वालिनं प्रेतगतो यमक्षये
त्वमद्य पश्येर्मम चोदितः शरैः ॥ 4.30.84 ॥ 1303

स पूर्वजं तीव्रविवृद्धकोपं
लालप्यमानं प्रसमीक्ष्य दीनम्।
चकार तीव्रां मतिमुग्रतेजा
हरीश्वरे मानववंशनाथः ॥ 4.30.85 ॥ 1304

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
किष्किन्धाकाण्डे त्रिंशः सर्गः ॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ एकत्रिंशः सर्गः ॥

सुग्रीवं प्रति लक्ष्मणस्य कोपः, श्रीरामेण तस्य सान्त्वनं किष्किन्धाद्वारमुपेत्य लक्ष्मणेन सुग्रीवपार्श्वेऽङ्गदस्य प्रेषणं वानराणां भयं प्लक्षप्रभावाभ्यां सुग्रीवाय कर्तव्यस्योपदेशश्च

स कामिनं दीनमदीनसत्त्वं
शोकाभिपन्नं समुदीर्णकोपम्।
नरेन्द्रसूनुर्नरदेवपुत्रं
रामानुजः पूर्वजमित्युवाच ॥ **4.31.1** ॥ 1305

न वानरः स्थास्यति साधुवृत्ते
न मन्यते कर्मफलानुषङ्गान्।
न भोक्ष्यते वानरराज्यलक्ष्मीं
तथा हि नातिक्रमतेऽस्य बुद्धिः ॥ **4.31.2** ॥ 1306

मतिक्षयाद् ग्राम्यसुखेषु सक्त -
स्तव प्रसादात् प्रतिकारबुद्धिः।
हतोऽग्रजं पश्यतु वीर तस्य
न राज्यमेवं विगुणस्य देयम् ॥ **4.31.3** ॥ 1307

न धारये कोपमुदीर्णवेगं
निहन्मि सुग्रीवमसत्यमद्य।

हरिप्रवीरैः सह वालिपुत्रो
नरेन्द्रपुत्र्या विचयं करोतु॥ **4.31.4**॥ 1308

तमात्तबाणासनमुत्पतन्तं
निवेदितार्थं रणचण्डकोपम्।
उवाच रामः परवीरहन्ता
स्ववीक्षितं सानुनयं च वाक्यम्॥ **4.31.5**॥ 1309

नहि वै त्वद्विधो लोके पापमेवं समाचरेत्।
कोपमार्येण यो हन्ति स वीरः पुरुषोत्तमः॥ **4.31.6**॥ 1310

नेदमत्र त्वया ग्राह्यं साधुवृत्तेन लक्ष्मण।
तां प्रीतिमनुवर्तस्व पूर्ववृत्तं च सङ्गतम्॥ **4.31.7**॥ 1311

सामोपहितया वाचा रुक्षाणि परिवर्जयन्।
वक्तुमर्हसि सुग्रीवं व्यतीतं कालपर्यये॥ **4.31.8**॥ 1312

सोऽग्रजेनानुशिष्टार्थो यथावत् पुरुषर्षभः।
प्रविवेश पुरी वीरो लक्ष्मणः परवीरहा॥ **4.31.9**॥ 1313

ततः शुभमतिः प्राज्ञो भ्रातुः प्रियहिते रतः।
लक्ष्मणः प्रतिसंरब्धो जगाम भवनं कपेः॥ **4.31.10**॥ 1314

शक्रबाणासनप्रख्यं धनुः कालान्तकोपमम्।
प्रगृह्य गिरिशृङ्गाभं मन्दरः सानुमानिव॥ **4.31.11**॥ 1315

यथोक्तकारी वचनमुत्तरं चैव सोत्तरम्।
बृहस्पतिसमो बुद्ध्या मत्वा रामानुजस्तदा॥ **4.31.12**॥ 1316

कामक्रोधसमुत्थेन भ्रातुः क्रोधाग्निना वृतः।
प्रभञ्जन इवाप्रीतः प्रययौ लक्ष्मणस्ततः॥ **4.31.13**॥ 1317

सालतालाश्वकर्णांश्च तरसा पातयन् बलात्।
पर्यस्यन् गिरिकूटानि द्रुमानन्यांश्च वेगितः॥ **4.31.14**॥ 1318

शिलाश्च शकलीकुर्वन् पद्भ्यां गज इवाशुगः।
दूरमेकपदं त्यक्त्वा ययौ कार्यवशाद् द्रुतम्॥ **4.31.15**॥ 1319

तामपश्यद् बलाकीर्णां हरिराजमहापुरीम्।
दुर्गामिक्ष्वाकुशार्दूलः किष्किन्धां गिरिसङ्कटे॥ **4.31.16**॥ 1320

रोषात् प्रस्फुरमाणोष्ठः सुग्रीवं प्रति लक्ष्मणः।
ददर्श वानरान् भीमान् किष्किन्धायां बहिश्चरान्॥ **4.31.17**॥ 1321

तं दृष्ट्वा वानराः सर्वे लक्ष्मणं पुरुषर्षभम्।
शैलशृङ्गाणि शतशः प्रवृद्धांश्च महीरुहान्।
जगृहुः कुञ्जरप्रख्या वानराः पर्वतान्तरे॥ **4.31.18**॥ 1322

तान् गृहीतप्रहरणान् सर्वान् दृष्ट्वा तु लक्ष्मणः।
बभूव द्विगुणं क्रुद्धो बह्विन्धन इवानलः॥ **4.31.19**॥ 1323

तं ते भयपरीताङ्गा क्षुब्धं दृष्ट्वा प्लवङ्गमाः।
कालमृत्युयुगान्ताभं शतशो विद्रुता दिशः॥ **4.31.20**॥ 1324

ततः सुग्रीवभवनं प्रविश्य हरिपुङ्गवाः।
क्रोधमागमनं चैव लक्ष्मणस्य न्यवेदयन्॥ **4.31.21**॥ 1325

तारया सहितः कामी सक्तः कपिवृषस्तदा।
न तेषां कपिसिंहानां शुश्राव वचनं तदा॥ **4.31.22**॥ 1326

ततः सचिवसन्दिष्टा हरयो रोमहर्षणाः।
गिरिकुञ्जरमेघाभा नगरान्निर्ययुस्तदा॥ **4.31.23**॥ 1327

नखदंष्ट्रायुधाः सर्वे वीरा विकृतदर्शनाः।
सर्वे शार्दूलदंष्ट्राश्च सर्वे विवृतदर्शनाः॥ **4.31.24**॥ 1328

दशनागबलाः केचित् केचिद् दशगुणोत्तराः।
केचिन्नागसहस्रस्य बभूवुस्तुल्यवर्चसः॥ **4.31.25**॥ 1329

ततस्तैः कपिभिर्व्याप्तां द्रुमहस्तैर्महाबलैः।
अपश्यल्लक्ष्मणः क्रुद्धः किष्किन्धां तां दुरासदाम्॥ **4.31.26**॥ 1330

ततस्ते हरयः सर्वे प्राकारपरिखान्तरात्।
निष्क्रम्योदग्रसत्त्वास्तु तस्थुराविष्कृतं तदा॥ **4.31.27**॥ 1331

सुग्रीवस्य प्रमादं च पूर्वजस्यार्थमात्मवान्।
दृष्ट्वा क्रोधवशं वीरः पुनरेव जगाम सः॥ **4.31.28**॥ 1332

स दीर्घोष्णमहोच्छ्वासः कोपसंरक्तलोचनः।
बभूव नरशार्दूलः सधूम इव पावकः॥ **4.31.29**॥ 1333

बाणशल्यस्फुरज्जिह्वः सायकासनभोगवान्।
स्वतेजोविषसम्भूतः पञ्चास्य इव पन्नगः॥ **4.31.30**॥ 1334

तं दीप्तमिव कालाग्निं नागेन्द्रमिव कोपितम्।
समासाद्याङ्गदस्त्रासाद् विषादमगमत् परम्॥ **4.31.31**॥ 1335

सोऽङ्गदं रोषताम्राक्षः सन्दिदेश महायशाः।
सुग्रीवः कथ्यतां वत्स ममागमनमित्युत॥ **4.31.32**॥ 1336

एष रामानुजः प्राप्तस्त्वत्सकाशमरिन्दम।
भ्रातुर्व्यसनसन्तप्तो द्वारि तिष्ठति लक्ष्मणः॥ **4.31.33**॥ 1337

तस्य वाक्यं यदि रुचिः क्रियतां साधु वानर।
इत्युक्त्वा शीघ्रमागच्छ वत्स वाक्यमरिन्दम॥ **4.31.34**॥ 1338

लक्ष्मणस्य वचः श्रुत्वा शोकाविष्टोऽङ्गदोऽब्रवीत्।
पितुः समीपमागम्य सौमित्रिरयमागतः॥ **4.31.35**॥ 1339

अथाङ्गदस्तस्य सुतीव्रवाचा
सभ्भ्रान्तभावः परिदीनवक्त्रः।
निर्गत्य पूर्वं नृपतेस्तरस्वी
ततो रुमायाश्चरणौ ववन्दे॥ **4.31.36**॥ 1340

सङ्गृह्य पादौ पितुरुग्रतेजा
जग्राह मातुः पुनरेव पादौ।
पादौ रुमायाश्च निपीडयित्वा
निवेदयामास ततस्तदर्थम्॥ **4.31.37**॥ 1341

स निद्राक्लान्तसंवीतो वानरो न विबुद्धवान्।
बभूव मदमत्तश्च मदनेन च मोहितः॥ **4.31.38**॥ 1342

ततः किलकिलां चक्रुर्लक्ष्मणं प्रेक्ष्य वानराः।
प्रसादयन्तस्तं क्रुद्धं भयमोहितचेतसः॥ **4.31.39**॥ 1343

ते महौघनिभं दृष्ट्वा वज्राशनिसमस्वनम्।
सिंहनादं समं चक्रुर्लक्ष्मणस्य समीपतः॥ **4.31.40**॥ 1344

तेन शब्देन महता प्रत्यबुध्यत वानरः।
मदविह्वलताम्राक्षो व्याकुलः स्रग्विभूषणः॥ **4.31.41**॥ 1345

अथाङ्गदवचः श्रुत्वा तेनैव च समागतौ।
मन्त्रिणौ वानरेन्द्रस्य सम्मतोदारदर्शनौ॥ **4.31.42**॥ 1346

प्लक्षश्चैव प्रभावश्च मन्त्रिणावर्थधर्मयोः।
वक्तुमुच्चावचं प्राप्तं लक्ष्मणं तौ शशंसतुः॥ **4.31.43**॥ 1347

प्रसादयित्वा सुग्रीवं वचनैः सार्थनिश्चितैः।
आसीनं पर्युपासीनौ यथा शक्रं मरुत्पतिम्॥ **4.31.44**॥ 1348

सत्यसन्धौ महाभागौ भ्रातरौ रामलक्ष्मणौ।
मनुष्यभावं सम्प्राप्तौ राज्यार्हौ राज्यदायिनौ॥ **4.31.45**॥ 1349

तयोरेको धनुष्पाणिर्द्वारि तिष्ठति लक्ष्मणः।
यस्य भीताः प्रवेपन्तो नादान् मुञ्चन्ति वानराः॥ **4.31.46**॥ 1350

स एष राघवभ्राता लक्ष्मणो वाक्यसारथिः।
व्यवसायरथः प्राप्तस्तस्य रामस्य शासनात्॥ **4.31.47**॥ 1351

अयं च तनयो राजंस्तारायां दयितोऽङ्गदः।
लक्ष्मणेन सकाशं ते प्रेषितस्त्वरयानघ॥ **4.31.48**॥ 1352

सोऽयं रोषपरीताक्षो द्वारि तिष्ठति वीर्यवान्।
वानरान् वानरपते चक्षुषा निर्दहन्निव॥ **4.31.49**॥ 1353

तस्य मूर्ध्ना प्रणामं त्वं सपुत्रः सहबान्धवः।
गच्छ शीघ्रं महाराज रोषो ह्यद्योपशाम्यताम्॥ **4.31.50**॥ 1354

यथा हि रामो धर्मात्मा तत्कुरुष्व समाहितः।
राजंस्तिष्ठ स्वसमये भव सत्यप्रतिश्रवः॥ **4.31.51**॥ 1355

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
किष्किन्धाकाण्डे एकत्रिंशः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ द्वात्रिंशः सर्गः ॥

हनुमता चिन्ताकुलस्य सुग्रीवस्य प्रबोधनम्

अङ्गदस्य वचः श्रुत्वा सुग्रीवः सचिवैः सह।
लक्ष्मणं कुपितं श्रुत्वा मुमोचासनमात्मवान्॥ **4.32.1** ॥ 1356

स च तानब्रवीद् वाक्यं निश्चित्य गुरुलाघवम्।
मन्त्रज्ञान् मन्त्रकुशलो मन्त्रेषु परिनिष्ठितः॥ **4.32.2** ॥ 1357

न मे दुर्व्याहृतं किञ्चिन्नापि मे दुरनुष्ठितम्।
लक्ष्मणो राघवभ्राता क्रुद्धः किमिति चिन्तये॥ **4.32.3** ॥ 1358

असुहृद्भिर्ममामित्रैर्नित्यमन्तरदर्शिभिः।
मम दोषानसम्भूताञ्श्रावितो राघवानुजः॥ **4.32.4** ॥ 1359

अत्र तावद् यथाबुद्धिः सर्वैरेव यथाविधि।
भावस्य निश्चयस्तावद् विज्ञेयो निपुणं शनैः॥ **4.32.5** ॥ 1360

न खल्वस्ति मम त्रासो लक्ष्मणान्नापि राघवात्।
मित्रं स्वस्थानकुपितं जनयत्येव सम्भ्रमम्॥ **4.32.6** ॥ 1361

सर्वथा सुकरं मित्रं दुष्करं प्रतिपालनम्।
अनित्यत्वात् तु चित्तानां प्रीतिरल्पेऽपि भिद्यते॥ **4.32.7** ॥ 1362

अतोनिमित्तं त्रस्तोऽहं रामेण तु महात्मना।
यन्ममोपकृतं शक्यं प्रतिकर्तुं न तन्मया॥ **4.32.8**॥ 1363

सुग्रीवेणैवमुक्ते तु हनूमान् हरिपुङ्गवः।
उवाच स्वेन तर्केण मध्ये वानरमन्त्रिणाम्॥ **4.32.9**॥ 1364

सर्वथा नैतदाश्चर्यं यत् त्वं हरिगणेश्वर।
न विस्मरसि सुस्निग्धमुपकारं कृतं शुभम्॥ **4.32.10**॥ 1365

राघवेण तु वीरेण भयमुत्सृज्य दूरतः।
त्वत्प्रियार्थं हतो वाली शक्रतुल्यपराक्रमः॥ **4.32.11**॥ 1366

सर्वथा प्रणयात् क्रुद्धो राघवो नात्र संशयः।
भ्रातरं सम्प्रहितवान् लक्ष्मणं लक्ष्मिवर्धनम्॥ **4.32.12**॥ 1367

त्वं प्रमत्तो न जानीषे कालं कालविदां वर।
फुल्लसप्तच्छदश्यामा प्रवृत्ता तु शरच्छुभा॥ **4.32.13**॥ 1368

निर्मलग्रहनक्षत्रा द्यौः प्रणष्टबलाहका।
प्रसन्नाश्च दिशः सर्वाः सरितश्च सरांसि च॥ **4.32.14**॥ 1369

प्राप्तमुद्योगकालं तु नावैषि हरिपुङ्गव।
त्वं प्रमत्त इति व्यक्तं लक्ष्मणोऽयमिहागतः॥ **4.32.15**॥ 1370

आर्तस्य हृतदारस्य परुषं पुरुषान्तरात्।
वचनं मर्षणीयं ते राघवस्य महात्मनः॥ **4.32.16**॥ 1371

कृतापराधस्य हि ते नान्यत् पश्याम्यहं क्षमम्।
अन्तरेणाञ्जलिं बद्ध्वा लक्ष्मणस्य प्रसादनात्॥ **4.32.17**॥ 1372

नियुक्तैर्मन्त्रिभिर्वाच्यो ह्यवश्यं पार्थिवो हितम्।
इत एव भयं त्यक्त्वा ब्रवीम्यवधृतं वचः॥ **4.32.18**॥ 1373

अभिक्रुद्धः समर्थो हि चापमुद्यम्य राघवः।
सदेवासुरगन्धर्वं वशे स्थापयितुं जगत्॥ **4.32.19**॥ 1374

न स क्षमः कोपयितुं यः प्रसाद्यः पुनर्भवेत्।
पूर्वोपकारं स्मरता कृतज्ञेन विशेषतः॥ **4.32.20**॥ 1375

तस्य मूर्ध्ना प्रणम्य त्वं सपुत्रः ससुहृज्जनः।
राजंस्तिष्ठ स्वसमये भर्तुर्भार्येव तद्वशे॥ **4.32.21**॥ 1376

न रामरामानुजशासनं त्वया
कपीन्द्रयुक्तं मनसाप्यपोहितुम्।
मनो हि ते ज्ञास्यति मानुषं बलं
सराघवस्यास्य सुरेन्द्रवर्चसः॥ **4.32.22**॥ 1377

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
किष्किन्धाकाण्डे द्वात्रिंशः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ त्रयस्त्रिंशः सर्गः ॥

किष्किन्धासुषमां पश्यतो लक्ष्मणस्य सुग्रीवसदने प्रवेशः प्रविश्य च तेन सरोषं धनुषो विष्फारणं भीतेन सुग्रीवेण तस्य रोषशमनाय तारायाः प्रेषणं तारया प्रबोध्य तस्यान्तःपुर आनयनम्

अथ प्रतिसमादिष्टो लक्ष्मणः परवीरहा।
प्रविवेश गुहां रम्यां किष्किन्धां रामशासनात्॥ **4.33.1**॥ 1378

द्वारस्था हरयस्तत्र महाकाया महाबलाः।
बभूवुर्लक्ष्मणं दृष्ट्वा सर्वे प्राञ्जलयः स्थिताः॥ **4.33.2**॥ 1379

निःश्वसन्तं तु तं दृष्ट्वा क्रुद्धं दशरथात्मजम्।
बभूवुर्हरयस्त्रस्ता न चैनं पर्यवारयन्॥ **4.33.3**॥ 1380

स तां रत्नमयीं दिव्यां श्रीमान् पुष्पितकाननाम्।
रम्यां रत्नसमाकीर्णां ददर्श महतीं गुहाम्॥ **4.33.4**॥ 1381

हर्म्यप्रासादसम्बाधां नानारत्नोपशोभिताम्।
सर्वकामफलैर्वृक्षैः पुष्पितैरुपशोभिताम्॥ **4.33.5**॥ 1382

देवगन्धर्वपुत्रैश्च वानरैः कामरूपिभिः।
दिव्यमाल्याम्बरधरैः शोभितां प्रियदर्शनैः॥ **4.33.6**॥ 1383

चन्दनागुरुपद्मानां गन्धैः सुरभिगन्धिताम्।
मैरेयाणां मधूनां च सम्मोदितमहापथाम्॥ **4.33.7**॥ 1384

विन्ध्यमेरुगिरिप्रख्यैः प्रासादैर्नैकभूमिभिः।
ददर्श गिरिनद्यश्च विमलास्तत्र राघवः॥ **4.33.8**॥ 1385

अङ्गदस्य गृहं रम्यं मैन्दस्य द्विविदस्य च।
गवयस्य गवाक्षस्य गजस्य शरभस्य च॥ **4.33.9**॥ 1386

विद्युन्मालेश्च सम्पातेः सूर्याक्षस्य हनूमतः।
वीरबाहोः सुबाहोश्च नलस्य च महात्मनः॥ **4.33.10**॥ 1387

कुमुदस्य सुषेणस्य तारजाम्बवतोस्तथा।
दधिवक्त्रस्य नीलस्य सुपाटलसुनेत्रयोः॥ **4.33.11**॥ 1388

एतेषां कपिमुख्यानां राजमार्गे महात्मनाम्।
ददर्श गृहमुख्यानि महासाराणि लक्ष्मणः॥ **4.33.12**॥ 1389

पाण्डुराभ्रप्रकाशानि गन्धमाल्ययुतानि च।
प्रभूतधनधान्यानि स्त्रीरत्नैः शोभितानि च॥ **4.33.13**॥ 1390

पाण्डुरेण तु शैलेन परिक्षिप्तं दुरासदम्।
वानरेन्द्रगृहं रम्यं महेन्द्रसदनोपमम्॥ **4.33.14**॥ 1391

शुक्लैः प्रासादशिखरैः कैलासशिखरोपमैः।
सर्वकामफलैर्वृक्षैः पुष्पितैरुपशोभितम्॥ **4.33.15**॥ 1392

महेन्द्रदत्तैः श्रीमद्भिर्नीलजीमूतसन्निभैः।
दिव्यपुष्पफलैर्वृक्षैः शीतच्छायैर्मनोरमैः॥ **4.33.16**॥ 1393

हरिभिः संवृतद्वारं बलिभिः शस्त्रपाणिभिः।
दिव्यमाल्यावृतं शुभ्रं तप्तकाञ्चनतोरणम्॥ **4.33.17**॥ 1394

सुग्रीवस्य गृहं रम्यं प्रविवेश महाबलः।
अवार्यमाणः सौमित्रिर्महाभ्रमिव भास्करः॥ **4.33.18**॥ 1395

स सप्त कक्ष्या धर्मात्मा यानासनसमावृताः।
ददर्श सुमहद्गुप्तं ददर्शान्तःपुरं महत्॥ **4.33.19**॥ 1396

हैमराजतपर्यङ्कैर्बहुभिश्च वरासनैः।
महार्हास्तरणोपेतैस्तत्र तत्र समावृतम्॥ **4.33.20**॥ 1397

प्रविशन्नेव सततं शुश्राव मधुरस्वनम्।
तन्त्रीगीतसमाकीर्णं समतालपदाक्षरम्॥ **4.33.21**॥ 1398

बह्वीश्च विविधाकारा रूपयौवनगर्विताः।
स्त्रियः सुग्रीवभवने ददर्श स महाबलः॥ **4.33.22**॥ 1399

दृष्ट्वाभिजनसम्पन्नास्तत्र माल्यकृतस्रजः।
वरमाल्यकृतव्यग्रा भूषणोत्तमभूषिताः॥ **4.33.23**॥ 1400

नातृप्तान् नाति चाव्यग्रान् नानुदात्तपरिच्छदान्।
सुग्रीवानुचरांश्चापि लक्षयामास लक्ष्मणः॥ **4.33.24**॥ 1401

कूजितं नूपुराणां च काञ्चीनां निःस्वनं तथा।
स निशम्य ततः श्रीमान् सौमित्रिर्लज्जितोऽभवत्॥ **4.33.25**॥ 1402

रोषवेगप्रकुपितः श्रुत्वा चाभरणस्वनम्।
चकार ज्यास्वनं वीरो दिशः शब्देन पूरयन्॥ **4.33.26**॥ 1403

चारित्रेण महाबाहुरपकृष्टः स लक्ष्मणः।
तस्थावेकान्तमाश्रित्य रामकोपसमन्वितः॥ **4.33.27**॥ 1404

तेन चापस्वनेनाथ सुग्रीवः प्लवगाधिपः।
विज्ञायागमनं त्रस्तः स चचाल वरासनात्॥ **4.33.28**॥ 1405

अङ्गदेन यथा मह्यं पुरस्तात् प्रतिवेदितम्।
सुव्यक्तमेष सम्प्राप्तः सौमित्रिर्भ्रातृवत्सलः॥ **4.33.29**॥ 1406

अङ्गदेन समाख्यातो ज्यास्वनेन च वानरः।
बुबुधे लक्ष्मणं प्राप्तं मुखं चास्य व्यशुष्यत॥ **4.33.30**॥ 1407

ततस्तारां हरिश्रेष्ठः सुग्रीवः प्रियदर्शनाम्।
उवाच हितमव्यग्रस्त्रासससम्भ्रान्तमानसः॥ **4.33.31**॥ 1408

किं नु रुक्कारणं सुभ्रु प्रकृत्या मृदुमानसः।
सरोष इव सम्प्राप्तो येनायं राघवानुजः॥ **4.33.32**॥ 1409

किं पश्यसि कुमारस्य रोषस्थानमनिन्दिते।
न खल्वकारणे कोपमाहरेन्नरपुङ्गवः॥ **4.33.33**॥ 1410

यद्यस्य कृतमस्माभिर्बुध्यसे किञ्चिदप्रियम्।
तद्बुद्ध्या सम्प्रधार्याशु क्षिप्रमेवाभिधीयताम्॥ **4.33.34**॥ 1411

अथवा स्वयमेवैनं द्रष्टुमर्हसि भामिनि।
वचनैः सान्त्वयुक्तैश्च प्रसादयितुमर्हसि॥ **4.33.35**॥ 1412

त्वद्दर्शने विशुद्धात्मा न स्म कोपं करिष्यति।
नहि स्त्रीषु महात्मानः क्वचित् कुर्वन्ति दारुणम्॥ **4.33.36**॥ 1413

त्वया सान्त्वैरुपक्रान्तं प्रसन्नेन्द्रियमानसम्।
ततः कमलपत्राक्षं द्रक्ष्याम्यहमरिन्दमम्॥ **4.33.37**॥ 1414

सा प्रस्खलन्ती मदविह्वलाक्षी
प्रलम्बकाञ्चीगुणहेमसूत्रा।
सलक्षणा लक्ष्मणसन्निधानं
जगाम तारा नमिताङ्गयष्टिः॥ **4.33.38**॥ 1415

स तां समीक्ष्यैव हरीशपत्नीं
तस्थावुदासीनतया महात्मा।

अवाङ्मुखोऽभून्मनुजेन्द्रपुत्रः
स्त्रीसन्निकर्षाद् विनिवृत्तकोपः ॥ **4.33.39** ॥ 1416

सा पानयोगाच्च निवृत्तलज्जा
दृष्टिप्रसादाच्च नरेन्द्रसूनोः।
उवाच तारा प्रणयप्रगल्भं
वाक्यं महार्थं परिसान्त्वरूपम् ॥ **4.33.40** ॥ 1417

किं कोपमूलं मनुजेन्द्रपुत्र
कस्ते न सन्तिष्ठति वाङ्निदेशे।
कः शुष्कवृक्षं वनमापतन्तं
दावाग्निमासीदति निर्विशङ्कः ॥ **4.33.41** ॥ 1418

स तस्या वचनं श्रुत्वा सान्त्वपूर्वमशङ्कितः।
भूयः प्रणयदृष्टार्थं लक्ष्मणो वाक्यमब्रवीत् ॥ **4.33.42** ॥ 1419

किमयं कामवृत्तस्ते लुप्तधर्मार्थसङ्ग्रहः।
भर्ता भर्तृहिते युक्ते न चैनमवबुध्यसे ॥ **4.33.43** ॥ 1420

न चिन्तयति राज्यार्थं सोऽस्माञ्शोकपरायणान्।
सामात्यपरिषत् तारे काममेवोपसेवते ॥ **4.33.44** ॥ 1421

स मासांश्चतुरः कृत्वा प्रमाणं प्लवगेश्वरः।
व्यतीतांस्तान् मदोदग्रो विहरन् नावबुध्यते ॥ **4.33.45** ॥ 1422

नहि धर्मार्थसिद्ध्यर्थं पानमेवं प्रशस्यते।
पानादर्थश्च कामश्च धर्मश्च परिहीयते ॥ **4.33.46** ॥ 1423

धर्मलोपो महांस्तावत् कृते ह्यप्रतिकुर्वतः।
अर्थलोपश्च मित्रस्य नाशे गुणवतो महान् ॥ **4.33.47** ॥ 1424

मित्रं ह्यर्थगुणश्रेष्ठं सत्यधर्मपरायणम्।
तद्द्वयं तु परित्यक्तं न तु धर्मे व्यवस्थितम्॥ **4.33.48**॥ 1425

तदेवं प्रस्तुते कार्ये कार्यमस्माभिरुत्तरम्।
तत् कार्यं कार्यतत्त्वज्ञे त्वमुदाहर्तुमर्हसि॥ **4.33.49**॥ 1426

सा तस्य धर्मार्थसमाधियुक्तं
निशम्य वाक्यं मधुरस्वभावम्।
तारा गतार्थे मनुजेन्द्रकार्ये
विश्वासयुक्तं तमुवाच भूयः॥ **4.33.50**॥ 1427

न कोपकालः क्षितिपालपुत्र
न चापि कोपः स्वजने विधेयः।
त्वदर्थकामस्य जनस्य तस्य
प्रमादमप्यर्हसि वीर सोढुम्॥ **4.33.51**॥ 1428

कोपं कथं नाम गुणप्रकृष्टः
कुमार कुर्यादपकृष्टसत्त्वे।
कस्त्वद्विधः कोपवशं हि गच्छेत्
सत्त्वावरुद्धस्तपसः प्रसूतिः॥ **4.33.52**॥ 1429

जानामि कोपं हरिवीरबन्धो -
र्जानामि कार्यस्य च कालसङ्गम्।
जानामि कार्यं त्वयि यत्कृतं न -
स्तच्चापि जानामि यदत्र कार्यम्॥ **4.33.53**॥ 1430

तच्चापि जानामि तथाविषह्यं
बलं नरश्रेष्ठ शरीरजस्य।
जानामि यस्मिंश्च जनेऽवबद्धं
कामेन सुग्रीवमसक्तमद्य॥ **4.33.54**॥ 1431

न कामतन्त्रे तव बुद्धिरस्ति
त्वं वै यथा मन्युवशं प्रपन्नः।
न देशकालौ हि यथार्थधर्मा -
ववेक्षते कामरतिर्मनुष्यः॥ **4.33.55**॥ 1432

तं कामवृत्तं मम सन्निकृष्टं
कामाभियोगाच्च विमुक्तलज्जम्।
क्षमस्व तावत् परवीरहन्त -
स्त्वद्भ्रातरं वानरवंशनाथम्॥ **4.33.56**॥ 1433

महर्षयो धर्मतपोऽभिरामाः
कामानुकामाः प्रतिबद्धमोहाः।
अयं प्रकृत्या चपलः कपिस्तु
कथं न सज्जेत सुखेषु राजा॥ **4.33.57**॥ 1434

इत्येवमुक्त्वा वचनं महार्थं
सा वानरी लक्ष्मणमप्रमेयम्।
पुनः सखेदं मदविह्वलाक्षी
भर्तुर्हितं वाक्यमिदं बभाषे॥ **4.33.58**॥ 1435

उद्योगस्तु चिराज्ञप्तः सुग्रीवेण नरोत्तम।
कामस्यापि विधेयेन तवार्थप्रतिसाधने॥ **4.33.59**॥ 1436

आगता हि महावीर्या हरयः कामरूपिणः।
कोटीः शतसहस्राणि नानानगनिवासिनः॥ **4.33.60**॥ 1437

तदागच्छ महाबाहो चारित्रं रक्षितं त्वया।
अच्छलं मित्रभावेन सतां दारावलोकनम्॥ **4.33.61**॥ 1438

तारया चाभ्यनुज्ञातस्त्वरया वापि चोदितः।
प्रविवेश महाबाहुरभ्यन्तरमरिंदमः॥ **4.33.62**॥ 1439

ततः सुग्रीवमासीनं काञ्चने परमासने।
महार्हास्तरणोपेते ददर्शादित्यसन्निभम्॥ **4.33.63**॥ 1440

दिव्याभरणचित्राङ्गं दिव्यरूपं यशस्विनम्।
दिव्यमाल्याम्बरधरं महेन्द्रमिव दुर्जयम्॥ **4.33.64**॥ 1441

दिव्याभरणमाल्याभिः प्रमदाभिः समावृतम्।
संरब्धतररक्ताक्षो बभूवान्तकसन्निभः॥ **4.33.65**॥ 1442

रुमां तु वीरः परिरभ्य गाढं
वरासनस्थो वरहेमवर्णः।
ददर्श सौमित्रिमदीनसत्त्वं
विशालनेत्रः स विशालनेत्रम्॥ **4.33.66**॥ 1443

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
किष्किन्धाकाण्डे त्रयस्त्रिंशः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ चतुस्त्रिंशः सर्गः ॥

सुग्रीवस्य लक्ष्मणसमीपे गमनं लक्ष्मणेन तस्य भर्त्सनं च

तमप्रतिहतं क्रुद्धं प्रविष्टं पुरुषर्षभम्।
सुग्रीवो लक्ष्मणं दृष्ट्वा बभूव व्यथितेन्द्रियः॥ **4.34.1** ॥ 1444

क्रुद्धं निःश्वसमानं तं प्रदीप्तमिव तेजसा।
भ्रातुर्व्यसनसन्तप्तं दृष्ट्वा दशरथात्मजम्॥ **4.34.2** ॥ 1445

उत्पपात हरिश्रेष्ठो हित्वा सौवर्णमासनम्।
महान् महेन्द्रस्य यथा स्वलङ्कृत इव ध्वजः॥ **4.34.3** ॥ 1446

उत्पतन्तमनूत्पेतू रुमाप्रभृतयः स्त्रियः।
सुग्रीवं गगने पूर्णं चन्द्रं तारागणा इव॥ **4.34.4** ॥ 1447

संरक्तनयनः श्रीमान् सञ्चचार कृताञ्जलिः।
बभूवावस्थितस्तत्र कल्पवृक्षो महानिव॥ **4.34.5** ॥ 1448

रुमाद्वितीयं सुग्रीवं नारीमध्यगतं स्थितम्।
अब्रवील्लक्ष्मणः क्रुद्धः सतारं शशिनं यथा॥ **4.34.6** ॥ 1449

सत्त्वाभिजनसम्पन्नः सानुक्रोशो जितेन्द्रियः।
कृतज्ञः सत्यवादी च राजा लोके महीयते॥ **4.34.7** ॥ 1450

यस्तु राजा स्थितोऽधर्मे मित्राणामुपकारिणाम्।
मिथ्या प्रतिज्ञां कुरुते को नृशंसतरस्ततः॥ **4.34.8**॥ 1451

शतमश्वानृते हन्ति सहस्रं तु गवानृते।
आत्मानं स्वजनं हन्ति पुरुषः पुरुषानृते॥ **4.34.9**॥ 1452

पूर्वं कृतार्थो मित्राणां न तत्प्रतिकरोति यः।
कृतघ्नः सर्वभूतानां स वध्यः प्लवगेश्वर॥ **4.34.10**॥ 1453

गीतोऽयं ब्रह्मणा श्लोकः सर्वलोकनमस्कृतः।
दृष्ट्वा कृतघ्नं क्रुद्धेन तन्निबोध प्लवङ्गम॥ **4.34.11**॥ 1454

गोघ्ने चैव सुरापे च चौरे भग्नव्रते तथा।
निष्कृतिर्विहिता सद्भिः कृतघ्ने नास्ति निष्कृतिः॥ **4.34.12**॥ 1455

अनार्यस्त्वं कृतघ्नश्च मिथ्यावादी च वानर।
पूर्वं कृतार्थो रामस्य न तत्प्रतिकरोषि यत्॥ **4.34.13**॥ 1456

ननु नाम कृतार्थेन त्वया रामस्य वानर।
सीताया मार्गणे यत्नः कर्तव्यः कृतमिच्छता॥ **4.34.14**॥ 1457

स त्वं ग्राम्येषु भोगेषु सक्तो मिथ्याप्रतिश्रवः।
न त्वां रामो विजानीते सर्पं मण्डूकराविणम्॥ **4.34.15**॥ 1458

महाभागेन रामेण पापः करुणवेदिना।
हरीणां प्रापितो राज्यं त्वं दुरात्मा महात्मना॥ **4.34.16**॥ 1459

कृतं चेन्नातिजानीषे राघवस्य महात्मनः।
सद्यस्त्वं निशितैर्बाणैर्हतो द्रक्ष्यसि वालिनम्॥ **4.34.17**॥ 1460

न स सङ्कुचितः पन्था येन वाली हतो गतः।
समये तिष्ठ सुग्रीव मा वालिपथमन्वगाः॥ **4.34.18**॥ 1461

न नूनमिक्ष्वाकुवरस्य कार्मुका -
च्छरांश्च तान् पश्यसि वज्रसन्निभान्।
ततः सुखं नाम विषेवसे सुखी
न रामकार्यं मनसाप्यवेक्षसे॥ 4.34.19॥ 1462

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
किष्किन्धाकाण्डे चतुस्त्रिंशः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ पञ्चत्रिंशः सर्गः ॥

तारया युक्तियुक्तया वाचा लक्ष्मणस्य प्रशमनम्

तथा ब्रुवाणं सौमित्रिं प्रदीप्तमिव तेजसा।
अब्रवील्लक्ष्मणं तारा ताराधिपनिभानना ॥ **4.35.1** ॥ 1463

नैवं लक्ष्मण वक्तव्यो नायं परुषमर्हति।
हरीणामीश्वरः श्रोतुं तव वक्त्राद् विशेषतः ॥ **4.35.2** ॥ 1464

नैवाकृतज्ञः सुग्रीवो न शठो नापि दारुणः।
नैवानृतकथो वीर न जिह्मश्च कपीश्वरः ॥ **4.35.3** ॥ 1465

उपकारं कृतं वीरो नाप्ययं विस्मृतः कपिः।
रामेण वीर सुग्रीवो यदन्यैर्दुष्करं रणे ॥ **4.35.4** ॥ 1466

रामप्रसादात् कीर्तिं च कपिराज्यं च शाश्वतम्।
प्राप्तवानिह सुग्रीवो रुमां मां च परन्तप ॥ **4.35.5** ॥ 1467

सुदुःखशयितः पूर्वं प्राप्येदं सुखमुत्तमम्।
प्राप्तकालं न जानीते विश्वामित्रो यथा मुनिः ॥ **4.35.6** ॥ 1468

घृताच्यां किल संसक्तो दश वर्षाणि लक्ष्मण।
अहोऽमन्यत धर्मात्मा विश्वामित्रो महामुनिः ॥ **4.35.7** ॥ 1469

स हि प्राप्तं न जानीते कालं कालविदां वरः।
विश्वामित्रो महातेजाः किं पुनर्यः पृथग्जनः॥ **4.35.8**॥ 1470

देहधर्मगतस्यास्य परिश्रान्तस्य लक्ष्मण।
अवितृप्तस्य कामेषु रामः क्षन्तुमिहार्हति॥ **4.35.9**॥ 1471

न च रोषवशं तात गन्तुमर्हसि लक्ष्मण।
निश्चयार्थमविज्ञाय सहसा प्राकृतो यथा॥ **4.35.10**॥ 1472

सत्त्वयुक्ता हि पुरुषास्त्वद्विधाः पुरुषर्षभ।
अविमृश्य न रोषस्य सहसा यान्ति वश्यताम्॥ **4.35.11**॥ 1473

प्रसादये त्वां धर्मज्ञ सुग्रीवार्थं समाहिता।
महान् रोषसमुत्पन्नः संरम्भस्त्यज्यतामयम्॥ **4.35.12**॥ 1474

रुमां मां चाङ्गदं राज्यं धनधान्यपशूनि च।
रामप्रियार्थं सुग्रीवस्त्यजेदिति मतिर्मम॥ **4.35.13**॥ 1475

समानेष्यति सुग्रीवः सीतया सह राघवम्।
शशाङ्कमिव रोहिण्या हत्वा तं राक्षसाधमम्॥ **4.35.14**॥ 1476

शतकोटिसहस्राणि लङ्कायां किल रक्षसाम्।
अयुतानि च षट्त्रिंशत्सहस्राणि शतानि च॥ **4.35.15**॥ 1477

अहत्वा तांश्च दुर्धर्षान् राक्षसान् कामरूपिणः।
न शक्यो रावणो हन्तुं येन सा मैथिली हृता॥ **4.35.16**॥ 1478

ते न शक्या रणे हन्तुमसहायेन लक्ष्मण।
रावणः क्रूरकर्मा च सुग्रीवेण विशेषतः॥ **4.35.17**॥ 1479

एवमाख्यातवान् वाली स ह्यभिज्ञो हरीश्वरः।
आगमस्तु न मे व्यक्तः श्रवात् तस्य ब्रवीम्यहम्॥ **4.35.18**॥ 1480

त्वत्सहायनिमित्तं हि प्रेषिता हरिपुङ्गवाः।
आनेतुं वानरान् युद्धे सुबहून् हरिपुङ्गवान्॥ **4.35.19**॥ 1481

तांश्च प्रतीक्षमाणोऽयं विक्रान्तान् सुमहाबलान्।
राघवस्यार्थसिद्ध्यर्थं न निर्याति हरीश्वरः॥ **4.35.20**॥ 1482

कृता सुसंस्था सौमित्रे सुग्रीवेण पुरा यथा।
अद्य तैर्वानरैः सर्वैरागन्तव्यं महाबलैः॥ **4.35.21**॥ 1483

ऋक्षकोटिसहस्राणि गोलाङ्गूलशतानि च।
अद्य त्वामुपयास्यन्ति जहि कोपमरिन्दम।
कोट्योऽनेकास्तु काकुत्स्थ कपीनां दीप्ततेजसाम्॥ **4.35.22**॥ 1484

तव हि मुखमिदं निरीक्ष्य कोपात्
क्षतजसमे नयने निरीक्षमाणाः।
हरिवरवनिता न यान्ति शान्तिं
प्रथमभयस्य हि शङ्किताः स्म सर्वाः॥ **4.35.23**॥ 1485

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
किष्किन्धाकाण्डे पञ्चत्रिंशः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ षट्त्रिंशः सर्गः ॥

स्वीयं लघुत्वं श्रीरामस्य महत्त्वं च प्रतिपादयता सुग्रीवेण लक्ष्मणं प्रति क्षमायाः प्रार्थनं लक्ष्मणेन तस्य प्रशंसापूर्वकं तं प्रत्यात्मना सह चलितुमादेशकरणम्

इत्युक्तस्तारया वाक्यं प्रश्रितं धर्मसंहितम्।
मृदुस्वभावः सौमित्रिः प्रतिजग्राह तद्वचः॥ **4.36.1**॥ 1486

तस्मिन् प्रतिगृहीते तु वाक्ये हरिगणेश्वरः।
लक्ष्मणात् सुमहत्त्रासं वस्त्रं क्लिन्नमिवात्यजत्॥ **4.36.2**॥ 1487

ततः कण्ठगतं माल्यं चित्रं बहुगुणं महत्।
चिच्छेद विमदश्चासीत् सुग्रीवो वानरेश्वरः॥ **4.36.3**॥ 1488

स लक्ष्मणं भीमबलं सर्ववानरसत्तमः।
अब्रवीत् प्रश्रितं वाक्यं सुग्रीवः सम्प्रहर्षयन्॥ **4.36.4**॥ 1489

प्रणष्टा श्रीश्च कीर्तिश्च कपिराज्यं च शाश्वतम्।
रामप्रसादात् सौमित्रे पुनश्चाप्तमिदं मया॥ **4.36.5**॥ 1490

कः शक्तस्तस्य देवस्य ख्यातस्य स्वेन कर्मणा।
तादृशं प्रतिकुर्वीत अंशेनापि नृपात्मज॥ **4.36.6**॥ 1491

सीतां प्राप्स्यति धर्मात्मा वधिष्यति च रावणम्।
सहायमात्रेण मया राघवः स्वेन तेजसा॥ **4.36.7**॥ 1492

सहायकृत्यं किं तस्य येन सप्त महाद्रुमाः।
गिरिश्च वसुधा चैव बाणेनैकेन दारिताः॥ **4.36.8**॥ 1493

धनुर्विस्फारमाणस्य यस्य शब्देन लक्ष्मण।
सशैला कम्पिता भूमिः सहायैः किं नु तस्य वै॥ **4.36.9**॥ 1494

अनुयात्रां नरेन्द्रस्य करिष्येऽहं नरर्षभ।
गच्छतो रावणं हन्तुं वैरिणं सपुरस्सरम्॥ **4.36.10**॥ 1495

यदि किञ्चिदतिक्रान्तं विश्वासात् प्रणयेन वा।
प्रेष्यस्य क्षमितव्यं मे न कश्चिन्नापराध्यति॥ **4.36.11**॥ 1496

इति तस्य ब्रुवाणस्य सुग्रीवस्य महात्मनः।
अभवल्लक्ष्मणः प्रीतः प्रेम्णा चेदमुवाच ह॥ **4.36.12**॥ 1497

सर्वथा हि मम भ्राता सनाथो वानरेश्वर।
त्वया नाथेन सुग्रीव प्रश्रितेन विशेषतः॥ **4.36.13**॥ 1498

यस्ते प्रभावः सुग्रीव यच्च ते शौचमीदृशम्।
अर्हस्त्वं कपिराज्यस्य श्रियं भोक्तुमनुत्तमाम्॥ **4.36.14**॥ 1499

सहायेन च सुग्रीव त्वया रामः प्रतापवान्।
वधिष्यति रणे शत्रूनचिरान्नात्र संशयः॥ **4.36.15**॥ 1500

धर्मज्ञस्य कृतज्ञस्य सङ्ग्रामेष्वनिवर्तिनः।
उपपन्नं च युक्तं च सुग्रीव तव भाषितम्॥ **4.36.16**॥ 1501

दोषज्ञः सति सामर्थ्ये कोऽन्यो भाषितुमर्हति।
वर्जयित्वा मम ज्येष्ठं त्वां च वानरसत्तम॥ **4.36.17**॥ 1502

सदृशश्चासि रामेण विक्रमेण बलेन च।
सहायो दैवतैर्दत्तश्चिराय हरिपुङ्गव॥ **4.36.18**॥ 1503

किं तु शीघ्रमितो वीर निष्क्रम त्वं मया सह।
सान्त्वयस्व वयस्यं च भार्याहरणदुःखितम्॥ 4.36.19॥ 1504

यच्च शोकाभिभूतस्य श्रुत्वा रामस्य भाषितम्।
मया त्वं परुषाण्युक्तस्तत् क्षमस्व सखे मम॥ 4.36.20॥ 1505

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
किष्किन्धाकाण्डे षड्त्रिंशः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ सप्तत्रिंशः सर्गः ॥

सुग्रीवेण वानरसेनासङ्ग्रहाय पुनर्दूतान् प्रेषयितुं हनुमत आज्ञपनं तेभ्यो राजाज्ञामाकर्ण्य समेषां वानराणां किष्किन्धां प्रति प्रस्थानं निवृत्तैर्दूतैः सुग्रीवायोपायनानि समर्प्य वानरागमनवृत्तान्तस्य निवेदनम्

एवमुक्तस्तु सुग्रीवो लक्ष्मणेन महात्मना।
हनूमन्तं स्थितं पार्श्वे वचनं चेदमब्रवीत्॥ **4.37.1**॥ 1506

महेन्द्रहिमवद्विन्ध्यकैलासशिखरेषु च।
मन्दरे पाण्डुशिखरे पञ्चशैलेषु ये स्थिताः॥ **4.37.2**॥ 1507

तरुणादित्यवर्णेषु भ्राजमानेषु नित्यशः।
पर्वतेषु समुद्रान्ते पश्चिमस्यां तु ये दिशि॥ **4.37.3**॥ 1508

आदित्यभवने चैव गिरौ सन्ध्याभ्रसन्निभे।
पद्माचलवनं भीमाः संश्रिता हरिपुङ्गवाः॥ **4.37.4**॥ 1509

अञ्जनाम्बुदसङ्काशाः कुञ्जरेन्द्रमहौजसः।
अञ्जने पर्वते चैव ये वसन्ति प्लवङ्गमाः॥ **4.37.5**॥ 1510

महाशैलगुहावासा वानराः कनकप्रभाः।
मेरुपार्श्वगताश्चैव ये च धूम्रगिरिं श्रिताः॥ **4.37.6**॥ 1511

तरुणादित्यवर्णाश्च पर्वते ये महारुणे।
पिबन्तो मधु मैरेयं भीमवेगाः प्लवङ्गमाः॥ **4.37.7**॥ 1512

वनेषु च सुरम्येषु सुगन्धिषु महत्सु च।
तापसाश्रमरम्येषु वनान्तेषु समन्ततः॥ **4.37.8**॥ 1513

तांस्तांस्त्वमानय क्षिप्रं पृथिव्यां सर्ववानरान्।
सामदानादिभिः कल्पैर्वानरैर्वेगवत्तरैः॥ **4.37.9**॥ 1514

प्रेषिताः प्रथमं ये च मयाऽऽज्ञाता महाजवाः।
त्वरणार्थं तु भूयस्त्वं सम्प्रेषय हरीश्वरान्॥ **4.37.10**॥ 1515

ये प्रसक्ताश्च कामेषु दीर्घसूत्राश्च वानराः।
इहानयस्व ताञ्शीघ्रं सर्वानेव कपीश्वरान्॥ **4.37.11**॥ 1516

अहोभिर्दशभिर्ये च नागच्छन्ति ममाज्ञया।
हन्तव्यास्ते दुरात्मानो राजशासनदूषकाः॥ **4.37.12**॥ 1517

शतान्यथ सहस्राणि कोट्यश्च मम शासनात्।
प्रयान्तु कपिसिंहानां निदेशे मम ये स्थिताः॥ **4.37.13**॥ 1518

मेघपर्वतसङ्काशाश्छादयन्त इवाम्बरम्।
घोररूपाः कपिश्रेष्ठा यान्तु मच्छासनादितः॥ **4.37.14**॥ 1519

ते गतिज्ञा गतिं गत्वा पृथिव्यां सर्ववानराः।
आनयन्तु हरीन् सर्वांस्त्वरिताः शासनान्मम॥ **4.37.15**॥ 1520

तस्य वानरराजस्य श्रुत्वा वायुसुतो वचः।
दिक्षु सर्वासु विक्रान्तान् प्रेषयामास वानरान्॥ **4.37.16**॥ 1521

ते पदं विष्णुविक्रान्तं पतत्त्रिज्योतिरध्वगाः।
प्रयाताः प्रहिता राज्ञा हरयस्तु क्षणेन वै॥ **4.37.17**॥ 1522

ते समुद्रेषु गिरिषु वनेषु च सरस्सु च।
वानरा वानरान् सर्वान् रामहेतोरचोदयन्॥ **4.37.18**॥ 1523

मृत्युकालोपमस्याज्ञां राजराजस्य वानराः।
सुग्रीवस्याययुः श्रुत्वा सुग्रीवभयशङ्किताः॥ **4.37.19**॥ 1524

ततस्तेऽञ्जनसङ्काशा गिरेस्तस्मान्महाबलाः।
तिस्रः कोट्यः प्लवङ्गानां निर्ययुर्यत्र राघवः॥ **4.37.20**॥ 1525

अस्तं गच्छति यत्रार्कस्तस्मिन् गिरिवरे रताः।
सन्तप्तहेमवर्णाभास्तस्मात् कोट्यो दश च्युताः॥ **4.37.21**॥ 1526

कैलासशिखरेभ्यश्च सिंहकेसरवर्चसाम्।
ततः कोटिसहस्राणि वानराणां समागमन्॥ **4.37.22**॥ 1527

फलमूलेन जीवन्तो हिमवन्तमुपाश्रिताः।
तेषां कोटिसहस्राणां सहस्रं समवर्तत॥ **4.37.23**॥ 1528

अङ्गारकसमानानां भीमानां भीमकर्मणाम्।
विन्ध्याद् वानर कोटीनां सहस्राण्यपतन् द्रुतम्॥ **4.37.24**॥ 1529

क्षीरोदवेलानिलयास्तमालवनवासिनः।
नारिकेलाशनाश्चैव तेषां सङ्ख्या न विद्यते॥ **4.37.25**॥ 1530

वनेभ्यो गह्वरेभ्यश्च सरिद्भ्यश्च महाबलाः।
आगच्छद् वानरी सेना पिबन्तीव दिवाकरम्॥ **4.37.26**॥ 1531

ये तु त्वारयितुं याता वानराः सर्ववानरान्।
ते वीरा हिमवच्छैले ददृशुस्तं महाद्रुमम्॥ **4.37.27**॥ 1532

तस्मिन् गिरिवरे पुण्ये यज्ञो माहेश्वरः पुरा।
सर्वदेवमनस्तोषो बभूव सुमनोरमः॥ **4.37.28**॥ 1533

अन्ननिस्यन्दजातानि मूलानि च फलानि च।
अमृतस्वादुकल्पानि ददृशुस्तत्र वानराः॥ **4.37.29**॥ 1534

तदन्नसम्भवं दिव्यं फलमूलं मनोहरम्।
यः कश्चित् सकृदश्नाति मासं भवति तर्पितः॥ **4.37.30**॥ 1535

तानि मूलानि दिव्यानि फलानि च फलाशनाः।
औषधानि च दिव्यानि जगृहुर्हरिपुङ्गवाः॥ **4.37.31**॥ 1536

तस्माच्च यज्ञायतनात् पुष्पाणि सुरभीणि च।
आनिन्युर्वानरा गत्वा सुग्रीवप्रियकारणात्॥ **4.37.32**॥ 1537

ते तु सर्वे हरिवराः पृथिव्यां सर्ववानरान्।
सञ्चोदयित्वा त्वरितं यूथानां जग्मुरग्रतः॥ **4.37.33**॥ 1538

ते तु तेन मुहूर्तेन कपयः शीघ्रचारिणः।
किष्किन्धां त्वरया प्राप्ताः सुग्रीवो यत्र वानरः॥ **4.37.34**॥ 1539

ते गृहीत्वौषधीः सर्वाः फलमूलं च वानराः।
तं प्रतिग्राहयामासुर्वचनं चेदमब्रुवन्॥ **4.37.35**॥ 1540

सर्वे परिसृताः शैलाः सरितश्च वनानि च।
पृथिव्यां वानराः सर्वे शासनादुपयान्ति ते॥ **4.37.36**॥ 1541

एवं श्रुत्वा ततो हृष्टः सुग्रीवः प्लवगाधिपः।
प्रतिजग्राह च प्रीतस्तेषां सर्वमुपायनम्॥ **4.37.37**॥ 1542

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
किष्किन्धाकाण्डे सप्तत्रिंशः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ अष्टात्रिंशः सर्गः ॥

सलक्ष्मणेन सुग्रीवेण श्रीरामपार्श्वमागम्य तत्पादयोः प्रणमनं श्रीरामेण तस्याश्वासनं सुग्रीवेण स्वकृतसैन्यसङ्ग्रहोद्योगस्य कथनं तदाकर्ण्य श्रीरामस्य सन्तोषश्च

प्रतिगृह्य च तत् सर्वमुपायनमुपाहृतम्।
वानरान् सान्त्वयित्वा च सर्वानेव व्यसर्जयत्॥ **4.38.1** ॥ 1543

विसर्जयित्वा स हरीन् सहस्रान् कृतकर्मणः।
मेने कृतार्थमात्मानं राघवं च महाबलम्॥ **4.38.2** ॥ 1544

स लक्ष्मणो भीमबलं सर्ववानरसत्तमम्।
अब्रवीत् प्रश्रितं वाक्यं सुग्रीवं सम्प्रहर्षयन्॥ **4.38.3** ॥ 1545

किष्किन्धाया विनिष्क्राम यदि ते सौम्य रोचते।
तस्य तद् वचनं श्रुत्वा लक्ष्मणस्य सुभाषितम्॥ **4.38.4** ॥ 1546

सग्रीवः परमप्रीतो वाक्यमेतदुवाच ह।
एवं भवतु गच्छाम स्थेयं त्वच्छासने मया॥ **4.38.5** ॥ 1547

तमेवमुक्त्वा सुग्रीवो लक्ष्मणं शुभलक्षणम्।
विसर्जयामास तदा ताराद्याश्चैव योषितः॥ **4.38.6** ॥ 1548

एहीत्युच्चैर्हरिवरान् सुग्रीवः समुदाहरत्।
तस्य तद् वचनं श्रुत्वा हरयः शीघ्रमाययुः॥ **4.38.7** ॥ 1549

बद्धाञ्जलिपुटाः सर्वे ये स्युः स्त्रीदर्शनक्षमाः।
तानुवाच ततः प्राप्तान् राजार्कसदृशप्रभः॥ **4.38.8**॥ 1550

उपस्थापयत क्षिप्रं शिबिकां मम वानराः।
श्रुत्वा तु वचनं तस्य हरयः शीघ्रविक्रमाः॥ **4.38.9**॥ 1551

समुपस्थापयामासुः शिबिकां प्रियदर्शनाम्।
तामुपस्थापितां दृष्ट्वा शिबिकां वानराधिपः॥ **4.38.10**॥ 1552

लक्ष्मणारुह्यतां शीघ्रमिति सौमित्रिमब्रवीत्।
इत्युक्त्वा काञ्चनं यानं सुग्रीवः सूर्यसन्निभम्॥ **4.38.11**॥ 1553

बहुभिर्हरिभिर्युक्तमारुरोह सलक्ष्मणः।
पाण्डुरेणातपत्रेण ध्रियमाणेन मूर्धनि॥ **4.38.12**॥ 1554

शुक्लैश्च बालव्यजनैर्धूयमानैः समन्ततः।
शङ्खभेरीनिनादैश्च बन्दिभिश्चाभिनन्दितः॥ **4.38.13**॥ 1555

निर्ययौ प्राप्य सुग्रीवो राज्यश्रियमनुत्तमाम्।
स वानरशतैस्तीक्ष्णैर्बहुभिः शस्त्रपाणिभिः॥ **4.38.14**॥ 1556

परिकीर्णो ययौ तत्र यत्र रामो व्यवस्थितः।
स तं देशमनुप्राप्य श्रेष्ठं रामनिषेवितम्॥ **4.38.15**॥ 1557

अवातरन्महातेजाः शिबिकायाः सलक्ष्मणः।
आसाद्य च ततो रामं कृताञ्जलिपुटोऽभवत्॥ **4.38.16**॥ 1558

कृताञ्जलौ स्थिते तस्मिन् वानराश्चाभवंस्तथा।
तटाकमिव तं दृष्ट्वा रामः कुङ्मलपङ्कजम्॥ **4.38.17**॥ 1559

वानराणां महत् सैन्यं सुग्रीवे प्रीतिमानभूत्।
पादयोः पतितं मूर्ध्ना तमुत्थाप्य हरीश्वरम्॥ **4.38.18**॥ 1560

प्रेम्णा च बहुमानाच्च राघवः परिषस्वजे।
परिष्वज्य च धर्मात्मा निषीदेति ततोऽब्रवीत्॥ **4.38.19**॥ 1561

निषण्णं तं ततो दृष्ट्वा क्षितौ रामोऽब्रवीत् ततः।
धर्ममर्थं च कामं च काले यस्तु निषेवते॥ **4.38.20**॥ 1562

विभज्य सततं वीर स राजा हरिसत्तम।
हित्वा धर्मं तथार्थं च कामं यस्तु निषेवते॥ **4.38.21**॥ 1563

स वृक्षाग्रे यथा सुप्तः पतितः प्रतिबुध्यते।
अमित्राणां वधे युक्तो मित्राणां सङ्ग्रहे रतः॥ **4.38.22**॥ 1564

त्रिवर्गफलभोक्ता च राजा धर्मेण युज्यते।
उद्योगसमयस्त्वेष प्राप्तः शत्रुनिषूदन॥ **4.38.23**॥ 1565

सञ्चिन्त्यतां हि पिङ्गेश हरिभिः सह मन्त्रिभिः।
एवमुक्तस्तु सुग्रीवो रामं वचनमब्रवीत्॥ **4.38.24**॥ 1566

प्रणष्टा श्रीश्च कीर्तिश्च कपिराज्यं च शाश्वतम्।
त्वत्प्रसादान्महाबाहो पुनः प्राप्तमिदं मया॥ **4.38.25**॥ 1567

तव देव प्रसादाच्च भ्रातुश्च जयतां वर।
कृतं न प्रतिकुर्याद् यः पुरुषाणां हि दूषकः॥ **4.38.26**॥ 1568

एते वानरमुख्याश्च शतशः शत्रुसूदन।
प्राप्ताश्चादाय बलिनः पृथिव्यां सर्ववानरान्॥ **4.38.27**॥ 1569

ऋक्षाश्च वानराः शूरा गोलाङ्गूलाश्च राघव।
कान्तारवनदुर्गाणामभिज्ञा घोरदर्शनाः॥ **4.38.28**॥ 1570

देवगन्धर्वपुत्राश्च वानराः कामरूपिणः।
स्वैः स्वैः परिवृताः सैन्यैर्वर्तन्ते पथि राघव॥ **4.38.29**॥ 1571

शतैः शतसहस्रैश्च वर्तन्ते कोटिभिस्तथा।
अयुतैश्चावृता वीर शङ्कुभिश्च परन्तप॥ **4.38.30**॥ 1572

अर्बुदैरर्बुदशतैर्मध्यैश्चान्त्यैश्च वानराः।
समुद्राश्च परार्धाश्च हरयो हरियूथपाः॥ **4.38.31**॥ 1573

आगमिष्यन्ति ते राजन् महेन्द्रसमविक्रमाः।
मेघपर्वतसङ्काशा मेरुविन्ध्यकृतालयाः॥ **4.38.32**॥ 1574

ते त्वामभिगमिष्यन्ति राक्षसं योद्धुमाहवे।
निहत्य रावणं युद्धे ह्यानयिष्यन्ति मैथिलीम्॥ **4.38.33**॥ 1575

ततः समुद्योगमवेक्ष्य वीर्यवान्
हरिप्रवीरस्य निदेशवर्तिनः।
बभूव हर्षाद् वसुधाधिपात्मजः
प्रबुद्धनीलोत्पलतुल्यदर्शनः॥ **4.38.34**॥ 1576

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
किष्किन्धाकाण्डे अष्टात्रिंशः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ एकोनचत्वारिंशः सर्गः ॥

श्रीरामेण सुग्रीवं प्रति कृतज्ञतायाः प्रकाशनं विभिन्नवानरयूथपतीनां सैन्यैः सहागमनम्

इति ब्रुवाणं सुग्रीवं रामो धर्मभृतां वरः।
बाहुभ्यां सम्परिष्वज्य प्रत्युवाच कृताञ्जलिम्॥ **4.39.1** ॥ 1577

यदिन्द्रो वर्षते वर्षं न तच्चित्रं भविष्यति।
आदित्योऽसौ सहस्रांशुः कुर्याद् वितिमिरं नभः॥ **4.39.2** ॥ 1578

चन्द्रमा रजनीं कुर्यात् प्रभया सौम्य निर्मलाम्।
त्वद्विधो वापि मित्राणां प्रीतिं कुर्यात् परन्तप॥ **4.39.3** ॥ 1579

एवं त्वयि न तच्चित्रं भवेद् यत् सौम्य शोभनम्।
जानाम्यहं त्वां सुग्रीव सततं प्रियवादिनम्॥ **4.39.4** ॥ 1580

त्वत्सनाथः सखे सङ्ख्ये जेतास्मि सकलानरीन्।
त्वमेव मे सुहृन्मित्रं साहाय्यं कर्तुमर्हसि॥ **4.39.5** ॥ 1581

जहारात्मविनाशाय मैथिलीं राक्षसाधमः।
वञ्चयित्वा तु पौलोमीमनुह्लादो यथा शचीम्॥ **4.39.6** ॥ 1582

नचिरात् तं वधिष्यामि रावणं निशितैः शरैः।
पौलोम्याः पितरं दृप्तं शतक्रतुरिवारिहा॥ **4.39.7** ॥ 1583

एतस्मिन्नन्तरे चैव रजः समभिवर्तत।
उष्णतीव्रां सहस्रांशोश्छादयद् गगने प्रभाम्॥ **4.39.8**॥ 1584

दिशः पर्याकुलाश्चासंस्तमसा तेन दूषिताः।
चचाल च मही सर्वा सशैलवनकानना॥ **4.39.9**॥ 1585

ततो नगेन्द्रसङ्काशैस्तीक्ष्णदंष्ट्रैर्महाबलैः।
कृत्स्ना सञ्छादिता भूमिरसङ्ख्येयैः प्लवङ्गमैः॥ **4.39.10**॥ 1586

निमेषान्तरमात्रेण ततस्तैर्हरियूथपैः।
कोटीशतपरीवारैर्वानरैर्हरियूथपैः॥ **4.39.11**॥ 1587

नादेयैः पार्वतेयैश्च सामुद्रैश्च महाबलैः।
हरिभिर्मेघनिर्ह्रादैरन्यैश्च वनवासिभिः॥ **4.39.12**॥ 1588

तरुणादित्यवर्णैश्च शशिगौरैश्च वानरैः।
पद्मकेसरवर्णैश्च श्वेतैर्हेमकृतालयैः॥ **4.39.13**॥ 1589

कोटीसहस्रैर्दशभिः श्रीमान् परिवृतस्तदा।
वीरः शतबलिर्नाम वानरः प्रत्यदृश्यत॥ **4.39.14**॥ 1590

ततः काञ्चनशैलाभस्तारायाः वीर्यवान् पिता।
अनेकैर्बहुसाहस्रैः कोटिभिः प्रत्यदृश्यत॥ **4.39.15**॥ 1591

तथापरेण कोटीनां सहस्रेण समन्वितः।
पिता रुमायाः सम्प्राप्तः सुग्रीवश्वशुरो विभुः॥ **4.39.16**॥ 1592

पद्मकेसरसङ्काशस्तरुणार्ककनिभाननः।
बुद्धिमान् वानरश्रेष्ठः सर्ववानरसत्तमः॥ **4.39.17**॥ 1593

अनेकैर्बहुसाहस्रैर्वानराणां समन्वितः।
पिता हनुमतः श्रीमान् केसरी प्रत्यदृश्यत॥ **4.39.18**॥ 1594

गोलाङ्गूलमहाराजो गवाक्षो भीमविक्रमः।
वृतः कोटिसहस्रेण वानराणामदृश्यत ॥ **4.39.19** ॥ 1595

ऋक्षाणां भीमवेगानां धूम्रः शत्रुनिबर्हणः।
वृतः कोटिसहस्राभ्यां द्वाभ्यां समभिवर्तत ॥ **4.39.20** ॥ 1596

महाचलनिभैर्घोरैः पनसो नाम यूथपः।
आजगाम महावीर्यस्तिसृभिः कोटिभिर्वृतः ॥ **4.39.21** ॥ 1597

नीलाञ्जनचयाकारो नीलो नामैष यूथपः।
अदृश्यत महाकायः कोटिभिर्दशभिर्वृतः ॥ **4.39.22** ॥ 1598

ततः काञ्चनशैलाभो गवयो नाम यूथपः।
आजगाम महावीर्यः कोटिभिः पञ्चभिर्वृतः ॥ **4.39.23** ॥ 1599

दरीमुखश्च बलवान् यूथपोऽभ्याययौ तदा।
वृतः कोटिसहस्रेण सुग्रीवं समवस्थितः ॥ **4.39.24** ॥ 1600

मैन्दश्च द्विविदश्चोभावश्विपुत्रौ महाबलौ।
कोटिकोटिसहस्रेण वानराणामदृश्यताम् ॥ **4.39.25** ॥ 1601

गजश्च बलवान् वीरस्तिसृभिः कोटिभिर्वृतः।
आजगाम महातेजाः सुग्रीवस्य समीपतः ॥ **4.39.26** ॥ 1602

ऋक्षराजो महातेजा जाम्बवान्नाम नामतः।
कोटिभिर्दशभिर्व्याप्तः सुग्रीवस्य वशे स्थितः ॥ **4.39.27** ॥ 1603

रुमणो नाम तेजस्वी विक्रान्तैर्वानरैर्वृतः।
आगतो बलवांस्तूर्णं कोटीशतसमावृतः ॥ **4.39.28** ॥ 1604

ततः कोटिसहस्राणां सहस्रेण शतेन च।
पृष्ठतोऽनुगतः प्राप्तो हरिभिर्गन्धमादनः ॥ **4.39.29** ॥ 1605

ततः पद्मसहस्रेण वृतः शङ्कुशतेन च।
युवराजोऽङ्गदः प्राप्तः पितुस्तुल्यपराक्रमः॥ **4.39.30**॥ 1606

ततस्ताराद्युतिस्तारो हरिभिर्भीमविक्रमैः।
पञ्चभिर्हरिकोटीभिर्दूरतः पर्यदृश्यत॥ **4.39.31**॥ 1607

इन्द्रजानुः कविर्वीरो यूथपः प्रत्यदृश्यत।
एकादशानां कोटीनामीश्वरस्तैश्च संवृतः॥ **4.39.32**॥ 1608

ततो रम्भस्त्वनुप्राप्तस्तरुणादित्यसन्निभः।
अयुतेन वृतश्चैव सहस्रेण शतेन च॥ **4.39.33**॥ 1609

ततो यूथपतिर्वीरो दुर्मुखो नाम वानरः।
प्रत्यदृश्यत कोटीभ्यां द्वाभ्यां परिवृतो बली॥ **4.39.34**॥ 1610

कैलासशिखराकारैर्वानरैर्भीमविक्रमैः।
वृतः कोटिसहस्रेण हनुमान् प्रत्यदृश्यत॥ **4.39.35**॥ 1611

नलश्चापि महावीर्यः संवृतो द्रुमवासिभिः।
कोटीशतेन सम्प्राप्तः सहस्रेण शतेन च॥ **4.39.36**॥ 1612

ततो दधिमुखः श्रीमान् कोटिभिर्दशभिर्वृतः।
सम्प्राप्तोऽभिनदंस्तस्य सुग्रीवस्य महात्मनः॥ **4.39.37**॥ 1613

शरभः कुमुदो वह्निर्वानरो रंह एव च।
एते चान्ये च बहवो वानराः कामरूपिणः॥ **4.39.38**॥ 1614

आवृत्य पृथिवीं सर्वां पर्वतांश्च वनानि च।
यूथपाः समनुप्राप्ता येषां सङ्ख्या न विद्यते॥ **4.39.39**॥ 1615

आगताश्च निविष्टाश्च पृथिव्यां सर्ववानराः।
आप्लवन्तः प्लवन्तश्च गर्जन्तश्च प्लवङ्गमाः।
अभ्यवर्तन्त सुग्रीवं सूर्यमभ्रगणा इव॥ **4.39.40**॥ 1616

कुर्वाणा बहुशब्दांश्च प्रकृष्टा बाहुशालिनः।
शिरोभिर्वानरेन्द्राय सुग्रीवाय न्यवेदयन्॥ **4.39.41**॥ 1617

अपरे वानरश्रेष्ठाः सङ्गम्य च यथोचितम्।
सुग्रीवेण समागम्य स्थिताः प्राञ्जलयस्तदा॥ **4.39.42**॥ 1618

सुग्रीवस्त्वरितो रामे सर्वांस्तान् वानरर्षभान्।
निवेदयित्वा धर्मज्ञः स्थितः प्राञ्जलिरब्रवीत्॥ **4.39.43**॥ 1619

यथासुखं पर्वतनिर्झरेषु
वनेषु सर्वेषु च वानरेन्द्राः।
निवेशयित्वा विधिवद् बलानि
बलं बलज्ञः प्रतिपत्तुमीष्टे॥ **4.39.44**॥ 1620

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
किष्किन्धाकाण्डे एकोनचत्वारिंशः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ चत्वारिंशः सर्गः ॥

श्रीरामस्याज्ञया सुग्रीवेण सीतान्वेषणाय पूर्वदिशायां वानराणां प्रेषणं तत्रत्यानां स्थानानां वर्णनं च

अथ राजा समृद्धार्थः सुग्रीवः प्लवगेश्वरः।
उवाच नरशार्दूलं रामं परबलार्दनम्॥ **4.40.1** ॥ 1621

आगता विनिविष्टाश्च बलिनः कामरूपिणः।
वानरेन्द्रा महेन्द्राभा ये मद्विषयवासिनः॥ **4.40.2** ॥ 1622

त इमे बहुविक्रान्तैर्बलिभिर्भीमविक्रमैः।
आगता वानरा घोरा दैत्यदानवसन्निभाः॥ **4.40.3** ॥ 1623

ख्यातकर्मापदानाश्च बलवन्तो जितक्लमाः।
पराक्रमेषु विख्याता व्यवसायेषु चोत्तमाः॥ **4.40.4** ॥ 1624

पृथिव्यम्बुचरा राम नानानगनिवासिनः।
कोट्योघाश्च इमे प्राप्ता वानरास्तव किङ्कराः॥ **4.40.5** ॥ 1625

निदेशवर्तिनः सर्वे सर्वे गुरुहिते स्थिताः।
अभिप्रेतमनुष्ठातुं तव शक्ष्यन्त्यरिन्दम॥ **4.40.6** ॥ 1626

त इमे बहुसाहस्रैरनीकैर्भीमविक्रमैः।
आगता वानरा घोरा दैत्यदानवसन्निभाः॥ **4.40.7** ॥ 1627

यन्मन्यसे नरव्याघ्र प्राप्तकालं तदुच्यताम्।
त्वत्सैन्यं त्वद्वशे युक्तमाज्ञापयितुमर्हसि॥ **4.40.8**॥ 1628

काममेषामिदं कार्यं विदितं मम तत्त्वतः।
तथापि तु यथायुक्तमाज्ञापयितुमर्हसि॥ **4.40.9**॥ 1629

तथा ब्रुवाणं सुग्रीवं रामो दशरथात्मजः।
बाहुभ्यां सम्परिष्वज्य इदं वचनमब्रवीत्॥ **4.40.10**॥ 1630

ज्ञायतां सौम्य वैदेही यदि जीवति वा न वा।
स च देशो महाप्राज्ञ यस्मिन् वसति रावणः॥ **4.40.11**॥ 1631

अधिगम्य तु वैदेहीं निलयं रावणस्य च।
प्राप्तकालं विधास्यामि तस्मिन् काले सह त्वया॥ **4.40.12**॥ 1632

नाहमस्मिन् प्रभुः कार्ये वानरेन्द्र न लक्ष्मणः।
त्वमस्य हेतुः कार्यस्य प्रभुश्च प्लवगेश्वर॥ **4.40.13**॥ 1633

त्वमेवाज्ञापय विभो मम कार्यविनिश्चयम्।
त्वं हि जानासि मे कार्यं मम वीर न संशयः॥ **4.40.14**॥ 1634

सुहृद्द्वितीयो विक्रान्तः प्राज्ञः कालविशेषवित्।
भवानस्मद्धिते युक्तः सुहृदाप्तोऽर्थवित्तमः॥ **4.40.15**॥ 1635

एवमुक्तस्तु सुग्रीवो विनतं नाम यूथपम्।
अब्रवीद् रामसान्निध्ये लक्ष्मणस्य च धीमतः॥ **4.40.16**॥ 1636

शैलाभं मेघनिर्घोषमूर्जितं प्लवगेश्वरम्।
सोमसूर्यनिभैः सार्धं वानरैर्वानरोत्तम॥ **4.40.17**॥ 1637

देशकालनयैर्युक्तो विज्ञः कार्यविनिश्चये।
वृतः शतसहस्रेण वानराणां तरस्विनाम्॥ **4.40.18**॥ 1638

अधिगच्छ दिशं पूर्वां सशैलवनकाननाम्।
तत्र सीतां च वैदेहीं निलयं रावणस्य च॥ **4.40.19**॥ 1639

मार्गध्वं गिरिदुर्गेषु वनेषु च नदीषु च।
नदीं भागीरथीं रम्यां सरयूं कौशिकीं तथा॥ **4.40.20**॥ 1640

कालिन्दीं यमुनां रम्यां यामुनं च महागिरिम्।
सरस्वतीं च सिन्धुं च शोणं मणिनिभोदकम्॥ **4.40.21**॥ 1641

महीं कालमहीं चापि शैलकाननशोभिताम्।
ब्रह्ममालान् विदेहांश्च मालवान् काशिकोसलान्॥ **4.40.22**॥ 1642

मागधांश्च महाग्रामान् पुण्ड्रांस्त्वङ्गांस्तथैव च।
भूमिं च कोशकाराणां भूमिं च रजताकराम्॥ **4.40.23**॥ 1643

सर्वं च तद् विचेतव्यं मार्गयद्भिस्ततस्ततः।
रामस्य दयितां भार्यां सीतां दशरथस्नुषाम्॥ **4.40.24**॥ 1644

समुद्रमवगाढांश्च पर्वतान् पत्तनानि च।
मन्दरस्य च ये कोटिं संश्रिताः केचिदालयाः॥ **4.40.25**॥ 1645

कर्णप्रावरणाश्चैव तथा चाप्योष्ठकर्णकाः।
घोरलोहमुखाश्चैव जवनाश्चैकपादकाः॥ **4.40.26**॥ 1646

अक्षया बलवन्तश्च तथैव पुरुषादकाः।
किरातास्तीक्ष्णचूडाश्च हेमाभाः प्रियदर्शनाः॥ **4.40.27**॥ 1647

आममीनाशनाश्चापि किराता द्वीपवासिनः।
अन्तर्जलचरा घोरा नरव्याघ्रा इति स्मृताः॥ **4.40.28**॥ 1648

एतेषामाश्रयाः सर्वे विचेयाः काननौकसः।
गिरिभिर्ये च गम्यन्ते प्लवनेन प्लवेन च॥ **4.40.29**॥ 1649

यत्नवन्तो यवद्वीपं सप्तराजोपशोभितम्।
सुवर्णरूप्यकद्वीपं सुवर्णाकरमण्डितम्॥ **4.40.30**॥ 1650

यवद्वीपमतिक्रम्य शिशिरो नाम पर्वतः।
दिवं स्पृशति शृङ्गेण देवदानवसेवितः॥ **4.40.31**॥ 1651

एतेषां गिरिदुर्गेषु प्रपातेषु वनेषु च।
मार्गध्वं सहिताः सर्वे रामपत्नीं यशस्विनीम्॥ **4.40.32**॥ 1652

ततो रक्तजलं प्राप्य शोणाख्यं शीघ्रवाहिनम्।
गत्वा पारं समुद्रस्य सिद्धचारणसेवितम्॥ **4.40.33**॥ 1653

तस्य तीर्थेषु रम्येषु विचित्रेषु वनेषु च।
रावणः सह वैदेह्या मार्गितव्यस्ततस्ततः॥ **4.40.34**॥ 1654

पर्वतप्रभवा नद्यः सुभीमबहुनिष्कुटाः।
मार्गितव्या दरीमन्तः पर्वताश्च वनानि च॥ **4.40.35**॥ 1655

ततः समुद्रद्वीपांश्च सुभीमान् द्रष्टुमर्हथ।
ऊर्मिमन्तं महारौद्रं क्रोशन्तमनिलोद्धतम्॥ **4.40.36**॥ 1656

तत्रासुरा महाकायाश्छायां गृह्णन्ति नित्यशः।
ब्रह्मणा समनुज्ञाता दीर्घकालं बुभुक्षिताः॥ **4.40.37**॥ 1657

तं कालमेघप्रतिमं महोरगनिषेवितम्।
अभिगम्य महानादं तीर्थेनैव महोदधिम्॥ **4.40.38**॥ 1658

ततो रक्तजलं भीमं लोहितं नाम सागरम्।
गत्वा प्रेक्ष्यथ तां चैव बृहतीं कूटशाल्मलीम्॥ **4.40.39**॥ 1659

गृहं च वैनतेयस्य नानारत्नविभूषितम्।
तत्र कैलाससङ्काशं विहितं विश्वकर्मणा॥ **4.40.40**॥ 1660

तत्र शैलनिभा भीमा मन्देहा नाम राक्षसाः।
शैलशृङ्गेषु लम्बन्ते नानारूपा भयावहाः॥ **4.40.41**॥ 1661

ते पतन्ति जले नित्यं सूर्यस्योदयनं प्रति।
अभितप्ताः स्म सूर्येण लम्बन्ते स्म पुनः पुनः॥ **4.40.42**॥ 1662

निहता ब्रह्मतेजोभिरहन्यहनि राक्षसाः।
ततः पाण्डुरमेघाभं क्षीरोदं नाम सागरम्॥ **4.40.43**॥ 1663

गत्वा द्रक्ष्यथ दुर्धर्षा मुक्ताहारमिवोर्मिभिः।
तस्य मध्ये महाञ्श्वेतो ऋषभो नाम पर्वतः॥ **4.40.44**॥ 1664

दिव्यगन्धैः कुसुमितैराचितैश्च नगैर्वृतः।
सरश्च राजतैः पद्मैर्ज्वलितैर्हेमकेसरैः॥ **4.40.45**॥ 1665

नाम्ना सुदर्शनं नाम राजहंसैः समाकुलम्।
विबुधाश्चारणा यक्षाः किन्नराश्चाप्सरोगणाः॥ **4.40.46**॥ 1666

हृष्टाः समधिगच्छन्ति नलिनीं तां रिरंसवः।
क्षीरोदं समतिक्रम्य तदा द्रक्ष्यथ वानराः॥ **4.40.47**॥ 1667

जलोदं सागरं शीघ्रं सर्वभूतभयावहम्।
तत्र तत्कोपजं तेजः कृतं हयमुखं महत्॥ **4.40.48**॥ 1668

अस्याहुस्तन्महावेगमोदनं सचराचरम्।
तत्र विक्रोशतां नादो भूतानां सागरौकसाम्।
श्रूयते चासमर्थानां दृष्ट्वाभूद् वडवामुखम्॥ **4.40.49**॥ 1669

स्वादूदस्योत्तरे तीरे योजनानि त्रयोदश।
जातरूपशिलो नाम सुमहान् कनकप्रभः॥ **4.40.50**॥ 1670

तत्र चन्द्रप्रतीकाशं पन्नगं धरणीधरम्।
पद्मपत्रविशालाक्षं ततो द्रक्ष्यथ वानराः॥ **4.40.51**॥ 1671

आसीनं पर्वतस्याग्रे सर्वदेवनमस्कृतम्।
सहस्रशिरसं देवमनन्तं नीलवाससम्॥ **4.40.52**॥ 1672

त्रिशिराः काञ्चनः केतुस्तालस्तस्य महात्मनः।
स्थापितः पर्वतस्याग्रे विराजति सवेदिकः॥ **4.40.53**॥ 1673

पूर्वस्यां दिशि निर्माणं कृतं तत् त्रिदशेश्वरैः।
ततः परं हेममयः श्रीमानुदयपर्वतः॥ **4.40.54**॥ 1674

तस्य कोटिर्दिवं स्पृष्ट्वा शतयोजनमायता।
जातरूपमयी दिव्या विराजति सवेदिका॥ **4.40.55**॥ 1675

सालैस्तालैस्तमालैश्च कर्णिकारैश्च पुष्पितैः।
जातरूपमयैर्दिव्यैः शोभते सूर्यसन्निभैः॥ **4.40.56**॥ 1676

तत्र योजनविस्तारमुच्छ्रितं दशयोजनम्।
शृङ्गं सौमनसं नाम जातरूपमयं ध्रुवम्॥ **4.40.57**॥ 1677

तत्र पूर्वं पदं कृत्वा पुरा विष्णुस्त्रिविक्रमे।
द्वितीयं शिखरे मेरोश्चकार पुरुषोत्तमः॥ **4.40.58**॥ 1678

उत्तरेण परिक्रम्य जम्बूद्वीपं दिवाकरः।
दृश्यो भवति भूयिष्ठं शिखरं तन्महोच्छ्रयम्॥ **4.40.59**॥ 1679

तत्र वैखानसा नाम वालखिल्या महर्षयः।
प्रकाशमाना दृश्यन्ते सूर्यवर्णास्तपस्विनः॥ **4.40.60**॥ 1680

अयं सुदर्शनो द्वीपः पुरो यस्य प्रकाशते।
तस्मिंस्तेजश्च चक्षुश्च सर्वप्राणभृतामपि॥ **4.40.61**॥ 1681

शैलस्य तस्य पृष्ठेषु कन्दरेषु वनेषु च।
रावणः सह वैदेह्या मार्गितव्यस्ततस्ततः॥ **4.40.62**॥ 1682

काञ्चनस्य च शैलस्य सूर्यस्य च महात्मनः।
आविष्टा तेजसा सन्ध्या पूर्वा रक्ता प्रकाशते॥ **4.40.63**॥ 1683

पूर्वमेतत् कृतं द्वारं पृथिव्या भुवनस्य च।
सूर्यस्योदयनं चैव पूर्वा ह्येषा दिगुच्यते॥ **4.40.64**॥ 1684

तस्य शैलस्य पृष्ठेषु निर्झरेषु गुहासु च।
रावणः सह वैदेह्या मार्गितव्यस्ततस्ततः॥ **4.40.65**॥ 1685

ततः परमगम्या स्याद् दिक्पूर्वा त्रिदशावृता।
रहिता चन्द्रसूर्याभ्यामदृश्या तमसावृता॥ **4.40.66**॥ 1686

शैलेषु तेषु सर्वेषु कन्दरेषु नदीषु च।
ये च नोक्ता मयोद्देशा विचेया तेषु जानकी॥ **4.40.67**॥ 1687

एतावद् वानरैः शक्यं गन्तुं वानरपुङ्गवाः।
अभास्करममर्यादं न जानीमस्ततः परम्॥ **4.40.68**॥ 1688

अभिगम्य तु वैदेहीं निलयं रावणस्य च।
मासे पूर्णे निवर्तध्वमुदयं प्राप्य पर्वतम्॥ **4.40.69**॥ 1689

ऊर्ध्वं मासान्न वस्तव्यं वसन् वध्यो भवेन्मम।
सिद्धार्थाः सन्निवर्तध्वमधिगम्य च मैथिलीम्॥ **4.40.70**॥ 1690

महेन्द्रकान्तां वनषण्डमण्डितां दिशं चरित्वा निपुणेन वानराः।
अवाप्य सीतां रघुवंशजप्रियां ततो निवृत्ताः सुखिनो भविष्यथ॥ **4.40.71**॥ 1691

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
किष्किन्धाकाण्डे चत्वारिंशः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ एकचत्वारिंशः सर्गः ॥

दक्षिणदिग्वर्तिस्थानानि वर्णयता सुग्रीवेण तत्र प्रमुखवानरवीराणां प्रेषणम्

ततः प्रस्थाप्य सुग्रीवस्तन्महद्वानरं बलम्।
दक्षिणां प्रेषयामास वानरानभिलक्षितान्॥ **4.41.1**॥ 1692

नीलमग्निसुतं चैव हनूमन्तं च वानरम्।
पितामहसुतं चैव जाम्बवन्तं महौजसम्॥ **4.41.2**॥ 1693

सुहोत्रं च शरारिं च शरगुल्मं तथैव च।
गजं गवाक्षं गवयं सुषेणं वृषभं तथा॥ **4.41.3**॥ 1694

मैन्दं च द्विविदं चैव सुषेणं गन्धमादनम्।
उल्कामुखमनङ्गं च हुताशनसुतावुभौ॥ **4.41.4**॥ 1695

अङ्गदप्रमुखान् वीरान् वीरः कपिगणेश्वरः।
वेगविक्रमसम्पन्नान् सन्दिदेश विशेषवित्॥ **4.41.5**॥ 1696

तेषामग्रेसरं चैव बृहद्बलमथाङ्गदम्।
विधाय हरिवीराणामादिशद् दक्षिणां दिशम्॥ **4.41.6**॥ 1697

ये केचन समुद्देशास्तस्यां दिशि सुदुर्गमाः।
कपीशः कपिमुख्यानां स तेषां समुदाहरत्॥ **4.41.7**॥ 1698

सहस्रशिरसं विन्ध्यं नानाद्रुमलतायुतम्।
नर्मदां च नदीं रम्यां महोरगनिषेविताम्॥ **4.41.8**॥ 1699

ततो गोदावरीं रम्यां कृष्णवेणीं महानदीम्।
वरदां च महाभागां महोरगनिषेविताम्।
मेखलानुत्कलांश्चैव दशार्णनगराण्यपि॥ **4.41.9**॥ 1700

आब्रवन्तीमवन्तीं च सर्वमेवानुपश्यत।
विदर्भानृष्टिकांश्चैव रम्यान् माहिषकानपि॥ **4.41.10**॥ 1701

तथा वङ्गान् कलिङ्गांश्च कौशिकांश्च समन्ततः।
अन्वीक्ष्य दण्डकारण्यं सपर्वतनदीगुहम्॥ **4.41.11**॥ 1702

नदीं गोदावरीं चैव सर्वमेवानुपश्यत।
तथैवान्ध्रांश्च पुण्ड्रांश्च चोलान् पाण्ड्यांश्च केरलान्॥ **4.41.12**॥ 1703

अयोमुखश्च गन्तव्यः पर्वतो धातुमण्डितः।
विचित्रशिखरः श्रीमांश्चित्रपुष्पितकाननः॥ **4.41.13**॥ 1704

सुचन्दनवनोद्देशो मार्गितव्यो महागिरिः।
ततस्तामापगां दिव्यां प्रसन्नसलिलाशयाम्॥ **4.41.14**॥ 1705

तत्र द्रक्ष्यथ कावेरीं विहृतामप्सरोगणैः।
तस्यासीनं नगस्याग्रे मलयस्य महौजसम्॥ **4.41.15**॥ 1706

द्रक्ष्यथादित्यसङ्काशमगस्त्यमृषिसत्तमम्।
ततस्तेनाभ्यनुज्ञाताः प्रसन्नेन महात्मना॥ **4.41.16**॥ 1707

ताम्रपर्णीं ग्राहजुष्टां तरिष्यथ महानदीम्।
सा चन्दनवनैश्चित्रैः प्रच्छन्नद्वीपवारिणी॥ **4.41.17**॥ 1708

कान्तेव युवती कान्तं समुद्रमवगाहते।
ततो हेममयं दिव्यं मुक्तामणिविभूषितम्॥ **4.41.18**॥ 1709

युक्तं कवाटं पाण्ड्यानां गता द्रक्ष्यथ वानराः।
ततः समुद्रमासाद्य सम्प्रधार्यार्थनिश्चयम्॥ **4.41.19**॥ 1710

अगस्त्येनान्तरे तत्र सागरे विनिवेशितः।
चित्रसानुनगः श्रीमान् महेन्द्रः पर्वतोत्तमः॥ **4.41.20**॥ 1711

जातरूपमयः श्रीमानवगाढो महार्णवम्।
नानाविधैर्नगैः फुल्लैर्लताभिश्चोपशोभितम्॥ **4.41.21**॥ 1712

देवर्षियक्षप्रवरैरप्सरोभिश्च शोभितम्।
सिद्धचारणसङ्घैश्च प्रकीर्णं सुमनोरमम्॥ **4.41.22**॥ 1713

तमुपैति सहस्राक्षः सदा पर्वसु पर्वसु।
द्वीपस्तस्यापरे पारे शतयोजनविस्तृतः॥ **4.41.23**॥ 1714

अगम्यो मानुषैर्दीप्तस्तं मार्गध्वं समन्ततः।
तत्र सर्वात्मना सीता मार्गितव्या विशेषतः॥ **4.41.24**॥ 1715

स हि देशस्तु वध्यस्य रावणस्य दुरात्मनः।
राक्षसाधिपतेर्वासः सहस्राक्षसमद्युतेः॥ **4.41.25**॥ 1716

दक्षिणस्य समुद्रस्य मध्ये तस्य तु राक्षसी।
अङ्गारकेति विख्याता छायामाक्षिप्य भोजिनी॥ **4.41.26**॥ 1717

एवं निःसंशयान् कृत्वा संशयान्नष्टसंशयाः।
मृगयध्वं नरेन्द्रस्य पत्नीममिततेजसः॥ **4.41.27**॥ 1718

तमतिक्रम्य लक्ष्मीवान् समुद्रे शतयोजने।
गिरिः पुष्पितको नाम सिद्धचारणसेवितः॥ **4.41.28**॥ 1719

चन्द्रसूर्यांशुसङ्काशः सागराम्बुसमाश्रयः।
भ्राजते विपुलैः शृङ्गैरम्बरं विलिखन्निव॥ **4.41.29**॥ 1720

तस्यैकं काञ्चनं शृङ्ग सेवते यं दिवाकरः।
श्वेतं राजतमेकं च सेवते यन्निशाकरः।
न तं कृतघ्नाः पश्यन्ति न नृशंसा न नास्तिकाः॥ **4.41.30**॥ 1721

प्रणम्य शिरसा शैलं तं विमार्गथ वानराः।
तमतिक्रम्य दुर्धर्षं सूर्यवान्नाम पर्वतः॥ **4.41.31**॥ 1722

अध्वना दुर्विगाहेन योजनानि चतुर्दश।
ततस्तमप्यतिक्रम्य वैद्युतो नाम पर्वतः॥ **4.41.32**॥ 1723

सर्वकामफलैर्वृक्षैः सर्वकालमनोहरैः।
तत्र भुक्त्वा वरार्हाणि मूलानि च फलानि च॥ **4.41.33**॥ 1724

मधूनि पीत्वा जुष्टानि परं गच्छत वानराः।
तत्र नेत्रमनःकान्तः कुञ्जरो नाम पर्वतः॥ **4.41.34**॥ 1725

अगस्त्यभवनं यत्र निर्मितं विश्वकर्मणा।
तत्र योजनविस्तारमुच्छ्रितं दशयोजनम्॥ **4.41.35**॥ 1726

शरणं काञ्चनं दिव्यं नानारत्नविभूषितम्।
तत्र भोगवती नाम सर्पाणामालयः पुरी॥ **4.41.36**॥ 1727

विशालरथ्या दुर्धर्षा सर्वतः परिरक्षिता।
रक्षिता पन्नगैर्घोरैस्तीक्ष्णदंष्ट्रैर्महाविषैः॥ **4.41.37**॥ 1728

सर्पराजो महाघोरो यस्यां वसति वासुकिः।
निर्याय मार्गितव्या च सा च भोगवती पुरी॥ **4.41.38**॥ 1729

तत्र चानन्तरोद्देशा ये केचन समावृताः।
तं च देशमतिक्रम्य महानृषभसंस्थितिः॥ **4.41.39**॥ 1730

सर्वरत्नमयः श्रीमानृषभो नाम पर्वतः।
गोशीर्षकं पद्मकं च हरिश्यामं च चन्दनम्॥ **4.41.40**॥ 1731

दिव्यमुत्पद्यते यत्र तच्चैवाग्निसमप्रभम्।
न तु तच्चन्दनं दृष्ट्वा स्प्रष्टव्यं तु कदाचन॥ **4.41.41**॥ 1732

रोहिता नाम गन्धर्वा घोरं रक्षन्ति तद्वनम्।
तत्र गन्धर्वपतयः पञ्च सूर्यसमप्रभाः॥ **4.41.42**॥ 1733

शैलूषो ग्रामणीः शिक्षः शुको बभ्रुस्तथैव च।
रविसोमाग्निवपुषां निवासः पुण्यकर्मणाम्॥ **4.41.43**॥ 1734

अन्ते पृथिव्या दुर्धर्षास्ततः स्वर्गजितः स्थिताः।
ततः परं न वः सेव्यः पितृलोकः सुदारुणः॥ **4.41.44**॥ 1735

राजधानी यमस्यैषा कष्टेन तमसाऽऽवृता।
एतावदेव युष्माभिर्वीरा वानरपुङ्गवाः।
शक्यं विचेतुं गन्तुं वा नातो गतिमतां गतिः॥ **4.41.45**॥ 1736

सर्वमेतत् समालोक्य यच्चान्यदपि दृश्यते।
गतिं विदित्वा वैदेह्याः सन्निवर्तितुमर्हथ॥ **4.41.46**॥ 1737

यश्च मासान्निवृत्तोऽग्रे दृष्टा सीतेति वक्ष्यति।
मत्तुल्यविभवो भोगैः सुखं स विहरिष्यति॥ **4.41.47**॥ 1738

ततः प्रियतरो नास्ति मम प्राणाद् विशेषतः।
कृतापराधो बहुशो मम बन्धुर्भविष्यति॥ **4.41.48**॥ 1739

अमितबलपराक्रमा भवन्तो
विपुलगुणेषु कुलेषु च प्रसूताः।
मनुजपतिसुतां यथा लभध्वं
तदधिगुणं पुरुषार्थमारभध्वम्॥ **4.41.49**॥ 1740

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
किष्किन्धाकाण्डे एकचत्वारिंशः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ द्विचत्वारिंशः सर्गः ॥

पश्चिमदिग्वर्तिस्थानानि वर्णयता सुग्रीवेण सुषेणप्रभृतिवानराणां तत्र प्रेषणम्

अथ प्रस्थाप्य स हरीन् सुग्रीवो दक्षिणां दिशम्।
अब्रवीन्मेघसङ्काशं सुषेणं नाम वानरम्॥ **4.42.1**॥ 1741

तारायाः पितरं राजा श्वशुरं भीमविक्रमम्।
अब्रवीत् प्राञ्जलिर्वाक्यमभिगम्य प्रणम्य च॥ **4.42.2**॥ 1742

महर्षिपुत्रं मारीचमर्चिष्मन्तं महाकपिम्।
वृतं कपिवरैः शूरैर्महेन्द्रसदृशद्युतिम्॥ **4.42.3**॥ 1743

बुद्धिविक्रमसम्पन्नं वैनतेयसमद्युतिम्।
मरीचिपुत्रान् मारीचानर्चिर्माल्यान् महाबलान्॥ **4.42.4**॥ 1744

ऋषिपुत्रांश्च तान् सर्वान् प्रतीचीमादिशद् दिशम्।
द्वाभ्यां शतसहस्राभ्यां कपीनां कपिसत्तमाः॥ **4.42.5**॥ 1745

सुषेणप्रमुखा यूयं वैदेहीं परिमार्गथ।
सौराष्ट्रान् सहबाह्लीकांश्चन्द्रचित्रांस्तथैव च॥ **4.42.6**॥ 1746

स्फीताञ्जनपदान् रम्यान् विपुलानि पुराणि च।
पुन्नागगहनं कुक्षिं बकुलोद्दालकाकुलम्॥ **4.42.7**॥ 1747

तथा केतकखण्डांश्च मार्गध्वं हरिपुंङ्गवाः।
प्रत्यक्स्रोतोवहाश्चैव नद्यः शीतजलाः शिवाः॥ **4.42.8**॥ 1748

तापसानामरण्यानि कान्तारगिरयश्च ये।
तत्र स्थलीर्मरुप्राया अत्युच्चशिशिराः शिलाः॥ **4.42.9**॥ 1749

गिरिजालावृतां दुर्गां मार्गित्वा पश्चिमां दिशम्।
ततः पश्चिममागम्य समुद्रं द्रष्टुमर्हथ॥ **4.42.10**॥ 1750

तिमिनक्राकुलजलं गत्वा द्रक्ष्यथ वानराः।
ततः केतकखण्डेषु तमालगहनेषु च॥ **4.42.11**॥ 1751

कपयो विहरिष्यन्ति नारिकेलवनेषु च।
तत्र सीतां च मार्गध्वं निलयं रावणस्य च॥ **4.42.12**॥ 1752

वेलातलनिविष्टेषु पर्वतेषु वनेषु च।
मुरवीपत्तनं चैव रम्यं चैव जटापुरम्॥ **4.42.13**॥ 1753

अवन्तीमङ्गलेपां च तथा चालक्षितं वनम्।
राष्ट्राणि च विशालानि पत्तनानि ततस्ततः॥ **4.42.14**॥ 1754

सिन्धुसागरयोश्चैव सङ्गमे तत्र पर्वतः।
महान् सोमगिरिर्नाम शतशृङ्गो महाद्रुमः॥ **4.42.15**॥ 1755

तत्र प्रस्थेषु रम्येषु सिंहाः पक्षगमाः स्थिताः।
तिमिमत्स्यगजांश्चैव नीडान्यारोपयन्ति ते॥ **4.42.16**॥ 1756

तानि नीडानि सिंहानां गिरिशृङ्गगताश्च ये।
दृप्तास्तृप्ताश्च मातङ्गास्तोयदस्वननिःस्वनाः॥ **4.42.17**॥ 1757

विचरन्ति विशालेऽस्मिंस्तोयपूर्णे समन्ततः।
तस्य शृङ्गं दिवस्पर्शं काञ्चनं चित्रपादपम्॥ **4.42.18**॥ 1758

सर्वमाशु विचेतव्यं कपिभिः कामरूपिभिः।
कोटिं तत्र समुद्रस्य काञ्चनीं शतयोजनाम्॥ **4.42.19**॥ 1759

दुर्दर्शीं पारियात्रस्य गत्वा द्रक्ष्यथ वानराः।
कोट्यस्तत्र चतुर्विंशद् गन्धर्वाणां तरस्विनाम्॥ **4.42.20**॥ 1760

वसन्त्यग्निनिकाशानां घोराणां कामरूपिणाम्।
पावकार्चिःप्रतीकाशाः समवेताः समन्ततः॥ **4.42.21**॥ 1761

नात्यासादयितव्यास्ते वानरैर्भीमविक्रमैः।
नादेयं च फलं तस्माद् देशात् किञ्चित् प्लवङ्गमैः॥ **4.42.22**॥ 1762

दुरासदा हि ते वीराः सत्त्ववन्तो महाबलाः।
फलमूलानि ते तत्र रक्षन्ते भीमविक्रमाः॥ **4.42.23**॥ 1763

तत्र यत्नश्च कर्तव्यो मार्गितव्या च जानकी।
नहि तेभ्यो भयं किञ्चित् कपित्वमनुवर्तताम्॥ **4.42.24**॥ 1764

तत्र वैदूर्यवर्णाभो वज्रसंस्थानसंस्थितः।
नानाद्रुमलताकीर्णो वज्रो नाम महागिरिः॥ **4.42.25**॥ 1765

श्रीमान् समुदितस्तत्र योजनानां शतं समम्।
गुहास्तत्र विचेतव्याः प्रयत्नेन प्लवङ्गमाः॥ **4.42.26**॥ 1766

चतुर्भागे समुद्रस्य चक्रवान् नाम पर्वतः।
तत्र चक्रं सहस्रारं निर्मितं विश्वकर्मणा॥ **4.42.27**॥ 1767

तत्र पञ्चजनं हत्वा हयग्रीवं च दानवम्।
आजहार ततश्चक्रं शङ्खं च पुरुषोत्तमः॥ **4.42.28**॥ 1768

तस्य सानुषु रम्येषु विशालासु गुहासु च।
रावणः सह वैदेह्या मार्गितव्यस्ततस्ततः॥ **4.42.29**॥ 1769

योजनानि चतुःषष्टिर्वराहो नाम पर्वतः।
सुवर्णशृङ्गः सुमहानगाधे वरुणालये॥ **4.42.30**॥ 1770

तत्र प्राग्ज्योतिषं नाम जातरूपमयं पुरम्।
यस्मिन् वसति दुष्टात्मा नरको नाम दानवः॥ **4.42.31**॥ 1771

तत्र सानुषु रम्येषु विशालासु गुहासु च।
रावणः सह वैदेह्या मार्गितव्यस्ततस्ततः॥ **4.42.32**॥ 1772

तमतिक्रम्य शैलेन्द्रं काञ्चनान्तरदर्शनम्।
पर्वतः सर्वसौवर्णो धाराप्रस्रवणायुतः॥ **4.42.33**॥ 1773

तं गजाश्च वराहाश्च सिंहा व्याघ्राश्च सर्वतः।
अभिगर्जन्ति सततं तेन शब्देन दर्पिताः॥ **4.42.34**॥ 1774

यस्मिन् हरिहयः श्रीमान् महेन्द्रः पाकशासनः।
अभिषिक्तः सुरै राजा मेघो नाम स पर्वतः॥ **4.42.35**॥ 1775

तमतिक्रम्य शैलेन्द्रं महेन्द्रपरिपालितम्।
षष्टिं गिरिसहस्राणि काञ्चनानि गमिष्यथ॥ **4.42.36**॥ 1776

तरुणादित्यवर्णानि भ्राजमानानि सर्वतः।
जातरूपमयैर्वृक्षैः शोभितानि सुपुष्पितैः॥ **4.42.37**॥ 1777

तेषां मध्ये स्थितो राजा मेरुरुत्तमपर्वतः।
आदित्येन प्रसन्नेन शैलो दत्तवरः पुरा॥ **4.42.38**॥ 1778

तेनैवमुक्तः शैलेन्द्रः सर्व एव त्वदाश्रयाः।
मत्प्रसादाद् भविष्यन्ति दिवा रात्रौ च काञ्चनाः॥ **4.42.39**॥ 1779

त्वयि ये चापि वत्स्यन्ति देवगन्धर्वदानवाः।
ते भविष्यन्ति भक्ताश्च प्रभया काञ्चनप्रभाः॥ **4.42.40**॥ 1780

विश्वेदेवाश्च वसवो मरुतश्च दिवौकसः।
आगत्य पश्चिमां सन्ध्यां मेरुमुत्तमपर्वतम्॥ **4.42.41**॥ 1781

आदित्यमुपतिष्ठन्ति तैश्च सूर्योऽभिपूजितः।
अदृश्यः सर्वभूतानामस्तं गच्छति पर्वतम्॥ **4.42.42**॥ 1782

योजनानां सहस्राणि दश तानि दिवाकरः।
मुहूर्तार्धेन तं शीघ्रमभियाति शिलोच्चयम्॥ **4.42.43**॥ 1783

शृङ्गे तस्य महद्दिव्यं भवनं सूर्यसन्निभम्।
प्रासादगणसम्बाधं विहितं विश्वकर्मणा॥ **4.42.44**॥ 1784

शोभितं तरुभिश्चित्रैर्नानापक्षिसमाकुलैः।
निकेतं पाशहस्तस्य वरुणस्य महात्मनः॥ **4.42.45**॥ 1785

अन्तरा मेरुमस्तं च तालो दशशिरा महान्।
जातरूपमयः श्रीमान् भ्राजते चित्रवेदिकः॥ **4.42.46**॥ 1786

तेषु सर्वेषु दुर्गेषु सरस्सु च सरित्सु च।
रावणः सह वैदेह्या मार्गितव्यस्ततस्ततः॥ **4.42.47**॥ 1787

यत्र तिष्ठति धर्मज्ञस्तपसा स्वेन भावितः।
मेरुसावर्णिरित्येष ख्यातो वै ब्रह्मणा समः॥ **4.42.48**॥ 1788

प्रष्टव्यो मेरुसावर्णिर्महर्षिः सूर्यसन्निभः।
प्रणम्य शिरसा भूमौ प्रवृत्तिं मैथिलीं प्रति॥ **4.42.49**॥ 1789

एतावज्जीवलोकस्य भास्करो रजनीक्षये।
कृत्वा वितिमिरं सर्वमस्तं गच्छति पर्वतम्॥ **4.42.50**॥ 1790

एतावद् वानरैः शक्यं गन्तुं वानरपुङ्गवाः।
अभास्करममर्यादं न जानीमस्ततः परम्॥ **4.42.51**॥ 1791

अवगम्य तु वैदेहीं निलयं रावणस्य च।
अस्तं पर्वतमासाद्य पूर्णे मासे निवर्तत॥ **4.42.52**॥ 1792

ऊर्ध्वं मासान्न वस्तव्यं वसन् वध्यो भवेन्मम।
सहैव शूरो युष्माभिः श्वशुरो मे गमिष्यति॥ **4.42.53**॥ 1793

श्रोतव्यं सर्वमेतस्य भवद्भिर्दिष्टकारिभिः।
गुरुरेष महाबाहुः श्वशुरो मे महाबलः॥ **4.42.54**॥ 1794

भवन्तश्चापि विक्रान्ताः प्रमाणं सर्व एव हि।
प्रमाणमेनं संस्थाप्य पश्यध्वं पश्चिमां दिशम्॥ **4.42.55**॥ 1795

दृष्टायां तु नरेन्द्रस्य पत्न्याममिततेजसः।
कृतकृत्या भविष्यामः कृतस्य प्रतिकर्मणा॥ **4.42.56**॥ 1796

अतोऽन्यदपि यत्कार्यं कार्यस्यास्य प्रियं भवेत्।
सम्प्रधार्य भवद्भिश्च देशकालार्थसंहितम्॥ **4.42.57**॥ 1797

ततः सुषेणप्रमुखाः प्लवङ्गाः
सुग्रीववाक्यं निपुणं निशम्य।
आमन्त्र्य सर्वे प्लवगाधिपं ते
जग्मुर्दिशं तां वरुणाभिगुप्ताम्॥ **4.42.58**॥ 1798

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
किष्किन्धाकाण्डे द्विचत्वारिंशः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ त्रिचत्वारिंशः सर्गः ॥

उत्तरदिग्वर्तीनि स्थानानि परिचाययता सुग्रीवेण शतबलिप्रभृतीनां तत्र प्रेषणम्

ततः सन्दिश्य सुग्रीवः श्वशुरं पश्चिमां दिशम्।
वीरं शतबलिं नाम वानरं वानरेश्वरः॥ **4.43.1** ॥ 1799

उवाच राजा सर्वज्ञः सर्ववानरसत्तमः।
वाक्यमात्महितं चैव रामस्य च हितं तदा॥ **4.43.2** ॥ 1800

वृतः शतसहस्रेण त्वद्विधानां वनौकसाम्।
वैवस्वतसुतैः सार्धं प्रविष्टः सर्वमन्त्रिभिः॥ **4.43.3** ॥ 1801

दिशं ह्युदीचीं विक्रान्तां हिमशैलावतंसिकाम्।
सर्वतः परिमार्गध्वं रामपत्नीं यशस्विनीम्॥ **4.43.4** ॥ 1802

अस्मिन् कार्ये विनिर्वृत्ते कृते दाशरथेः प्रिये।
ऋणान्मुक्ता भविष्यामः कृतार्थार्थविदां वराः॥ **4.43.5** ॥ 1803

कृतं हि प्रियमस्माकं राघवेण महात्मना।
तस्य चेत्प्रतिकारोऽस्ति सफलं जीवितं भवेत्॥ **4.43.6** ॥ 1804

अर्थिनः कार्यनिर्वृत्तिमकर्तुरपि यश्चरेत्।
तस्य स्यात् सफलं जन्म किं पुनः पूर्वकारिणः॥ **4.43.7** ॥ 1805

एतां बुद्धिं समास्थाय दृश्यते जानकी यथा।
तथा भवद्भिः कर्तव्यमस्मत्प्रियहितैषिभिः॥ **4.43.8**॥ 1806

अयं हि सर्वभूतानां मान्यस्तु नरसत्तमः।
अस्मासु च गतः प्रीतिं रामः परपुरञ्जयः॥ **4.43.9**॥ 1807

इमानि बहुदुर्गाणि नद्यः शैलान्तराणि च।
भवन्तः परिमार्गन्तु बुद्धिविक्रमसम्पदा॥ **4.43.10**॥ 1808

तत्र म्लेच्छान् पुलिन्दांश्च शूरसेनांस्तथैव च।
प्रस्थलान् भरतांश्चैव कुरूंश्च सह मद्रकैः॥ **4.43.11**॥ 1809

काम्बोजयवनांश्चैव शकानां पत्तनानि च।
अन्वीक्ष्य दरदांश्चैव हिमवन्तं विचिन्वथ॥ **4.43.12**॥ 1810

लोध्रपद्मकखण्डेषु देवदारुवनेषु च।
रावणः सह वैदेह्या मार्गितव्यस्ततस्ततः॥ **4.43.13**॥ 1811

ततः सोमाश्रमं गत्वा देवगन्धर्वसेवितम्।
कालं नाम महासानुं पर्वतं तं गमिष्यथ॥ **4.43.14**॥ 1812

महत्सु तस्य शैलेषु पर्वतेषु गुहासु च।
विचिन्वत महाभागां रामपत्नीमनिन्दिताम्॥ **4.43.15**॥ 1813

तमतिक्रम्य शैलेन्द्रं हेमगर्भं महागिरिम्।
ततः सुदर्शनं नाम पर्वतं गन्तुमर्हथ॥ **4.43.16**॥ 1814

ततो देवसखो नाम पर्वतः पतगालयः।
नानापक्षिसमाकीर्णो विविधद्रुमभूषितः॥ **4.43.17**॥ 1815

तस्य काननखण्डेषु निर्झरेषु गुहासु च।
रावणः सह वैदेह्या मार्गितव्यस्ततस्ततः॥ **4.43.18**॥ 1816

तमतिक्रम्य चाकाशं सर्वतः शतयोजनम्।
अपर्वतनदीवृक्षं सर्वसत्त्वविवर्जितम्॥ **4.43.19**॥ 1817

तत्तु शीघ्रमतिक्रम्य कान्तारं रोमहर्षणम्।
कैलासं पाण्डुरं प्राप्य हृष्टा यूयं भविष्यथ॥ **4.43.20**॥ 1818

तत्र पाण्डुरमेघाभं जाम्बूनदपरिष्कृतम्।
कुबेरभवनं रम्यं निर्मितं विश्वकर्मणा॥ **4.43.21**॥ 1819

विशाला नलिनी यत्र प्रभूतकमलोत्पला।
हंसकारण्डवाकीर्णा अप्सरोगणसेविता॥ **4.43.22**॥ 1820

तत्र वैश्रवणो राजा सर्वलोकनमस्कृतः।
धनदो रमते श्रीमान् गुह्यकैः सह यक्षराट्॥ **4.43.23**॥ 1821

तस्य चन्द्रनिकाशेषु पर्वतेषु गुहासु च।
रावणः सह वैदेह्या मार्गितव्यस्ततस्ततः॥ **4.43.24**॥ 1822

क्रौञ्चं तु गिरिमासाद्य बिलं तस्य सुदुर्गमम्।
अप्रमत्तैः प्रवेष्टव्यं दुष्प्रवेशं हि तत् स्मृतम्॥ **4.43.25**॥ 1823

वसन्ति हि महात्मानस्तत्र सूर्यसमप्रभाः।
देवैरभ्यर्थिताः सम्यग् देवरूपा महर्षयः॥ **4.43.26**॥ 1824

क्रौञ्चस्य तु गुहाश्चान्याः सानूनि शिखराणि च।
निर्दराश्च नितम्बाश्च विचेतव्यास्ततस्ततः॥ **4.43.27**॥ 1825

अवृक्षं कामशैलं च मानसं विहगालयम्।
न गतिस्तत्र भूतानां देवानां न च रक्षसाम्॥ **4.43.28**॥ 1826

स च सर्वैर्विचेतव्यः ससानुप्रस्थभूधरः।
क्रौञ्चं गिरिमतिक्रम्य मैनाको नाम पर्वतः॥ **4.43.29**॥ 1827

मयस्य भवनं तत्र दानवस्य स्वयङ्कृतम्।
मैनाकस्तु विचेतव्यः ससानुप्रस्थकन्दरः॥ **4.43.30**॥ 1828

स्त्रीणामश्वमुखीनां तु निकेतस्तत्र तत्र तु।
तं देशं समतिक्रम्य आश्रमं सिद्धसेवितम्॥ **4.43.31**॥ 1829

सिद्धा वैखानसा यत्र वालखिल्याश्च तापसाः।
वन्दितव्यास्ततः सिद्धास्तपसा वीतकल्मषाः॥ **4.43.32**॥ 1830

प्रष्टव्या चापि सीतायाः प्रवृत्तिर्विनयान्वितैः।
हेमपुष्करसञ्छन्नं तत्र वैखानसं सरः॥ **4.43.33**॥ 1831

तरुणादित्यसङ्काशैर्हंसैर्विचरितं शुभैः।
औपवाह्यः कुबेरस्य सार्वभौम इति स्मृतः॥ **4.43.34**॥ 1832

गजः पर्येति तं देशं सदा सह करेणुभिः।
तत् सरः समतिक्रम्य नष्टचन्द्रदिवाकरम्।
अनक्षत्रगणं व्योम निष्पयोदमनादितम्॥ **4.43.35**॥ 1833

गभस्तिभिरिवार्कस्य स तु देशः प्रकाश्यते।
विश्राम्यद्भिस्तपः सिद्धैर्देवकल्पैः स्वयम्प्रभैः॥ **4.43.36**॥ 1834

तं तु देशमतिक्रम्य शैलोदा नाम निम्नगा।
उभयोस्तीरयोस्तस्याः कीचका नाम बेणवः॥ **4.43.37**॥ 1835

ते नयन्ति परं तीरं सिद्धान् प्रत्यानयन्ति च।
उत्तराः कुरवस्तत्र कृतपुण्यप्रतिश्रयाः॥ **4.43.38**॥ 1836

ततः काञ्चनपद्माभिः पद्मिनीभिः कृतोदकाः।
नीलवैदूर्यपत्राढ्या नद्यस्तत्र सहस्रशः॥ **4.43.39**॥ 1837

रक्तोत्पलवनैश्चात्र मण्डिताश्च हिरण्मयैः।
तरुणादित्यसङ्काशा भान्ति तत्र जलाशयाः॥ **4.43.40**॥ 1838

महार्हमणिपत्रैश्च काञ्चनप्रभकेसरैः।
नीलोत्पलवनैश्चित्रैः स देशः सर्वतो वृतः॥ **4.43.41**॥ 1839

निस्तुलाभिश्च मुक्ताभिर्मणिभिश्च महाधनैः।
उद्धूतपुलिनास्तत्र जातरूपैश्च निम्नगाः॥ **4.43.42**॥ 1840

सर्वरत्नमयैश्चित्रैरवगाढा नगोत्तमैः।
जातरूपमयैश्चापि हुताशनसमप्रभैः॥ **4.43.43**॥ 1841

नित्यपुष्पफलास्तत्र नगाः पत्ररथाकुलाः।
दिव्यगन्धरसस्पर्शाः सर्वकामान् स्रवन्ति च॥ **4.43.44**॥ 1842

नानाकाराणि वासांसि फलन्त्यन्ये नगोत्तमाः।
मुक्तावैदूर्यचित्राणि भूषणानि तथैव च।
स्त्रीणां यान्यनुरूपाणि पुरुषाणां तथैव च॥ **4.43.45**॥ 1843

सर्वर्तुसुखसेव्यानि फलन्त्यन्ये नगोत्तमाः।
महार्हमणिचित्राणि फलन्त्यन्ये नगोत्तमाः॥ **4.43.46**॥ 1844

शयनानि प्रसूयन्ते चित्रास्तरणवन्ति च।
मनःकान्तानि माल्यानि फलन्त्यत्रापरे द्रुमाः॥ **4.43.47**॥ 1845

पानानि च महार्हाणि भक्ष्याणि विविधानि च।
स्त्रियश्च गुणसम्पन्ना रूपयौवनलक्षिताः॥ **4.43.48**॥ 1846

गन्धर्वाः किन्नराः सिद्धा नागा विद्याधरास्तथा।
रमन्ते सततं तत्र नारीभिर्भास्वरप्रभाः॥ **4.43.49**॥ 1847

सर्वे सुकृतकर्माणः सर्वे रतिपरायणाः।
सर्वे कामार्थसहिता वसन्ति सह योषितः॥ **4.43.50**॥ 1848

गीतवादित्रनिर्घोषः सोत्कृष्टहसितस्वनः।
श्रूयते सततं तत्र सर्वभूतमनोरमः॥ **4.43.51**॥ 1849

तत्र नामुदितः कश्चिन्नात्र कश्चिदसत्प्रियः।
अहन्यहनि वर्धन्ते गुणास्तत्र मनोरमाः॥ **4.43.52**॥ 1850

समतिक्रम्य तं देशमुत्तरः पयसां निधिः।
तत्र सोमगिरिर्नाम मध्ये हेममयो महान्॥ **4.43.53**॥ 1851

इन्द्रलोकगता ये च ब्रह्मलोकगताश्च ये।
देवास्तं समवेक्षन्ते गिरिराजं दिवं गताः॥ **4.43.54**॥ 1852

स तु देशो विसूर्योऽपि तस्य भासा प्रकाशते।
सूर्यलक्ष्म्याभिविज्ञेयस्तपतेव विवस्वता॥ **4.43.55**॥ 1853

भगवांस्तत्र विश्वात्मा शम्भुरेकादशात्मकः।
ब्रह्मा वसति देवेशो ब्रह्मर्षिपरिवारितः॥ **4.43.56**॥ 1854

न कथञ्चन गन्तव्यं कुरूणामुत्तरेण वः।
अन्येषामपि भूतानां नानुक्रामति वै गतिः॥ **4.43.57**॥ 1855

स हि सोमगिरिर्नाम देवानामपि दुर्गमः।
तमालोक्य ततः क्षिप्रमुपावर्तितुमर्हथ॥ **4.43.58**॥ 1856

एतावद् वानरैः शक्यं गन्तुं वानरपुङ्गवाः।
अभास्करममर्यादं न जानीमस्ततः परम्॥ **4.43.59**॥ 1857

सर्वमेतद् विचेतव्यं यन्मया परिकीर्तितम्।
यदन्यदपि नोक्तं च तत्रापि क्रियतां मतिः॥ **4.43.60**॥ 1858

ततः कृतं दाशरथेर्महत्प्रियं
महत्प्रियं चापि ततो मम प्रियम्।
कृतं भविष्यत्यनिलानलोपमा
विदेहजादर्शनजेन कर्मणा॥ **4.43.61**॥ 1859

ततः कृतार्थाः सहिताः सबान्धवा
मयार्चिताः सर्वगुणैर्मनोरमैः।
चरिष्यथोर्वीं प्रति शान्तशत्रवः
सहप्रिया भूतधराः प्लवङ्गमाः॥ **4.43.62**॥ 1860

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
किष्किन्धाकाण्डे त्रिचत्वारिंशः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ चतुश्चत्वारिंशः सर्गः ॥

श्रीरामेण हनुमते मुद्रिकां प्रदाय तस्य दक्षिणदिशि प्रेषणम्

विशेषेण तु सुग्रीवो हनूमत्यर्थमुक्तवान्।
स हि तस्मिन् हरिश्रेष्ठे निश्चितार्थोऽर्थसाधने ॥ **4.44.1** ॥ 1861

अब्रवीच्च हनूमन्तं विक्रान्तमनिलात्मजम्।
सुग्रीवः परमप्रीतः प्रभुः सर्ववनौकसाम् ॥ **4.44.2** ॥ 1862

न भूमौ नान्तरिक्षे वा नाम्बरे नामरालये।
नाप्सु वा गतिसङ्गं ते पश्यामि हरिपुङ्गव ॥ **4.44.3** ॥ 1863

सासुराः सहगन्धर्वाः सनागनरदेवताः।
विदिताः सर्वलोकास्ते ससागरधराधराः ॥ **4.44.4** ॥ 1864

गतिर्वेगश्च तेजश्च लाघवं च महाकपे।
पितुस्ते सदृशं वीर मारुतस्य महौजसः ॥ **4.44.5** ॥ 1865

तेजसा वापि ते भूतं न समं भुवि विद्यते।
तद् यथा लभ्यते सीता तत्त्वमेवानुचिन्तय ॥ **4.44.6** ॥ 1866

त्वय्येव हनुमन्नस्ति बलं बुद्धिः पराक्रमः।
देशकालानुवृत्तिश्च नयश्च नयपण्डित ॥ **4.44.7** ॥ 1867

ततः कार्यसमासङ्गमवगम्य हनूमति।
विदित्वा हनुमन्तं च चिन्तयामास राघवः॥ **4.44.8**॥ 1868

सर्वथा निश्चितार्थोऽयं हनूमति हरीश्वरः।
निश्चितार्थतरश्चापि हनूमान् कार्यसाधने॥ **4.44.9**॥ 1869

तदेवं प्रस्थितस्यास्य परिज्ञातस्य कर्मभिः।
भर्त्रा परिगृहीतस्य ध्रुवः कार्यफलोदयः॥ **4.44.10**॥ 1870

तं समीक्ष्य महातेजा व्यवसायोत्तरं हरिम्।
कृतार्थ इव संहृष्टः प्रहृष्टेन्द्रियमानसः॥ **4.44.11**॥ 1871

ददौ तस्य ततः प्रीतः स्वनामाङ्कोपशोभितम्।
अङ्गुलीयमभिज्ञानं राजपुत्र्याः परन्तपः॥ **4.44.12**॥ 1872

अनेन त्वां हरिश्रेष्ठ चिह्नेन जनकात्मजा।
मत्सकाशादनुप्राप्तमनुद्विग्नानुपश्यति॥ **4.44.13**॥ 1873

व्यवसायश्च ते वीर सत्त्वयुक्तश्च विक्रमः।
सुग्रीवस्य च सन्देशः सिद्धिं कथयतीव मे॥ **4.44.14**॥ 1874

स तद् गृह्य हरिश्रेष्ठः कृत्वा मूर्ध्नि कृताञ्जलिः।
वन्दित्वा चरणौ चैव प्रस्थितः प्लवगर्षभः॥ **4.44.15**॥ 1875

स तत् प्रकर्षन् हरिणां महद् बलं
बभूव वीरः पवनात्मजः कपिः।
गताम्बुदे व्योम्नि विशुद्धमण्डलः
शशीव नक्षत्रगणोपशोभितः॥ **4.44.16**॥ 1876

अतिबल बलमाश्रितस्तवाहं
हरिवर विक्रम विक्रमैरनल्पैः।

पवनसुत यथाधिगम्यते सा
जनकसुता हनुमंस्तथा कुरुष्व ॥ 4.44.17 ॥ 1877

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
किष्किन्धाकाण्डे चतुश्चत्वारिंशः सर्गः ॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ पञ्चचत्वारिंशः सर्गः ॥

विभिन्ना दिशः प्रति गच्छतां वानराणां सुग्रीवसमक्षे स्वीयसोत्साहवचसां श्रावणम्

सर्वांश्चाहूय सुग्रीवः प्लवगान् प्लवगर्षभः।
समस्तांश्चाब्रवीद् राजा रामकार्यार्थसिद्धये ॥ **4.45.1** ॥ 1878

एवमेतद् विचेतव्यं भवद्भिर्वानरोत्तमैः।
तदुग्रशासनं भर्तुर्विज्ञाय हरिपुङ्गवाः ॥ **4.45.2** ॥ 1879

शलभा इव सञ्छाद्य मेदिनीं सम्प्रतस्थिरे।
रामः प्रस्रवणे तस्मिन् न्यवसत् सहलक्ष्मणः ॥ **4.45.3** ॥ 1880

प्रतीक्षमाणस्तं मासं सीताधिगमने कृतः।
उत्तरां तु दिशं रम्यां गिरिराजसमावृताम् ॥ **4.45.4** ॥ 1881

प्रतस्थे सहसा वीरो हरिः शतबलिस्तदा।
पूर्वां दिशं प्रतिययौ विनतो हरियूथपः ॥ **4.45.5** ॥ 1882

ताराङ्गदादिसहितः प्लवगः पवनात्मजः।
अगस्त्याचरितामाशां दक्षिणां हरियूथपः ॥ **4.45.6** ॥ 1883

पश्चिमां च दिशं घोरां सुषेणः प्लवगेश्वरः।
प्रतस्थे हरिशार्दूलो दिशं वरुणपालिताम् ॥ **4.45.7** ॥ 1884

ततः सर्वा दिशो राजा चोदयित्वा यथातथम्।
कपिसेनापतिर्वीरो मुमोद सुखितः सुखम्॥ **4.45.8**॥ 1885

एवं सञ्चोदिताः सर्वे राज्ञा वानरयूथपाः।
स्वां स्वां दिशमभिप्रेत्य त्वरिताः सम्प्रतस्थिरे॥ **4.45.9**॥ 1886

नदन्तश्चोन्नदन्तश्च गर्जन्तश्च प्लवङ्गमाः।
क्ष्वेडन्तो धावमानाश्च विनदन्तो महाबलाः॥ **4.45.10**॥ 1887

एवं सञ्चोदिताः सर्वे राज्ञा वानरयूथपाः।
आनयिष्यामहे सीतां हनिष्यामश्च रावणम्॥ **4.45.11**॥ 1888

अहमेको वधिष्यामि प्राप्तं रावणमाहवे।
ततश्चोन्मथ्य सहसा हरिष्ये जनकात्मजाम्॥ **4.45.12**॥ 1889

वेपमानां श्रमेणाद्य भवद्भिः स्थीयतामिति।
एक एवाहरिष्यामि पातालादपि जानकीम्॥ **4.45.13**॥ 1890

विधमिष्याम्यहं वृक्षान् दारयिष्याम्यहं गिरीन्।
धरणीं दारयिष्यामि क्षोभयिष्यामि सागरान्॥ **4.45.14**॥ 1891

अहं योजनसङ्ख्यायाः प्लवेयं नात्र संशयः।
शतयोजनसङ्ख्यायाः शतं समधिकं ह्यहम्॥ **4.45.15**॥ 1892

भूतले सागरे वापि शैलेषु च वनेषु च।
पातालस्यापि वा मध्ये न ममाच्छिद्यते गतिः॥ **4.45.16**॥ 1893

इत्येकैकस्तदा तत्र वानरा बलदर्पिताः।
ऊचुश्च वचनं तस्य हरिराजस्य सन्निधौ॥ **4.45.17**॥ 1894

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
किष्किन्धाकाण्डे पञ्चचत्वारिंशः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ षट्चत्वारिंशः सर्गः ॥

सुग्रीवेण श्रीरामं प्रति स्वकीयभूमण्डलभ्रमणवृत्तान्तस्य प्रतिपादनम्

गतेषु वानरेन्द्रेषु रामः सुग्रीवमब्रवीत्।
कथं भवान् विजानीते सर्वं वै मण्डलं भुवः॥ **4.46.1**॥ 1895

सुग्रीवश्च ततो राममुवाच प्रणतात्मवान्।
श्रूयतां सर्वमाख्यास्ये विस्तरेण वचो मम॥ **4.46.2**॥ 1896

यदा तु दुन्दुभिं नाम दानवं महिषाकृतिम्।
प्रतिकालयते वाली मलयं प्रति पर्वतम्॥ **4.46.3**॥ 1897

तदा विवेश महिषो मलयस्य गुहां प्रति।
विवेश वाली तत्रापि मलयं तज्जिघांसया॥ **4.46.4**॥ 1898

ततोऽहं तत्र निक्षिप्तो गुहाद्वारि विनीतवत्।
न च निष्क्रामते वाली तदा संवत्सरे गते॥ **4.46.5**॥ 1899

ततः क्षतजवेगेन आपुपूरे तदा बिलम्।
तदहं विस्मितो दृष्ट्वा भ्रातुः शोकविषार्दितः॥ **4.46.6**॥ 1900

अथाहं गतबुद्धिस्तु सुव्यक्तं निहतो गुरुः।
शिला पर्वतसङ्काशा बिलद्वारि मया कृता॥ **4.46.7**॥ 1901

अशक्नुवन्निष्क्रमितुं महिषो विनशिष्यति।
ततोऽहमागां किष्किन्धां निराशस्तस्य जीविते॥ **4.46.8**॥ 1902

राज्यं च सुमहत् प्राप्य तारां च रुमया सह।
मित्रैश्च सहितस्तत्र वसामि विगतज्वरः॥ **4.46.9**॥ 1903

आजगाम ततो वाली हत्वा तं वानरर्षभः।
ततोऽहमददां राज्यं गौरवाद् भययन्त्रितः॥ **4.46.10**॥ 1904

स मां जिघांसुर्दुष्टात्मा वाली प्रव्यथितेन्द्रियः।
परिकालयते वाली धावन्तं सचिवैः सह॥ **4.46.11**॥ 1905

ततोऽहं वालिना तेन सोऽनुबद्धः प्रधावितः।
नदीश्च विविधाः पश्यन् वनानि नगराणि च॥ **4.46.12**॥ 1906

आदर्शतलसङ्काशा ततो वै पृथिवी मया।
अलातचक्रप्रतिमा दृष्टा गोष्पदवत् कृता॥ **4.46.13**॥ 1907

पूर्वां दिशं ततो गत्वा पश्यामि विविधान् द्रुमान्।
पर्वतान् सदरीन् रम्यान् सरांसि विविधानि च॥ **4.46.14**॥ 1908

उदयं तत्र पश्यामि पर्वतं धातुमण्डितम्।
क्षीरोदं सागरं चैव नित्यमप्सरसालयम्॥ **4.46.15**॥ 1909

परिकाल्यमानस्तदा वालिनाभिद्रुतो ह्यहम्।
पुनरावृत्य सहसा प्रस्थितोऽहं तदा विभो॥ **4.46.16**॥ 1910

दिशस्तस्यास्ततो भूयः प्रस्थितो दक्षिणां दिशम्।
विन्ध्यपादपसङ्कीर्णां चन्दनद्रुमशोभिताम्॥ **4.46.17**॥ 1911

द्रुमशैलान्तरे पश्यन् भूयो दक्षिणतोऽपराम्।
अपरां च दिशं प्राप्तो वालिना समभिद्रुतः॥ **4.46.18**॥ 1912

स पश्यन् विविधान् देशानस्तं च गिरिसत्तमम्।
प्राप्य चास्तं गिरिश्रेष्ठमुत्तरं सम्प्रधावितः॥ **4.46.19**॥ 1913

हिमवन्तं च मेरुं च समुद्रं च तथोत्तरम्।
यदा न विन्दे शरणं वालिना समभिद्रुतः॥ **4.46.20**॥ 1914

ततो मां बुद्धिसम्पन्नो हनुमान् वाक्यमब्रवीत्।
इदानीं मे स्मृतं राजन् यथा वाली हरीश्वरः॥ **4.46.21**॥ 1915

मतङ्गेन तदा शप्तो ह्यस्मिन्नाश्रममण्डले।
प्रविशेद् यदि वै वाली मूर्धास्य शतधा भवेत्॥ **4.46.22**॥ 1916

तत्र वासः सुखोऽस्माकं निरुद्विग्नो भविष्यति।
ततः पर्वतमासाद्य ऋष्यमूकं नृपात्मज॥ **4.46.23**॥ 1917

न विवेश तदा वाली मतङ्गस्य भयात् तदा।
एवं मया तदा राजन् प्रत्यक्षमुपलक्षितम्।
पृथिवीमण्डलं सर्वं गुहामस्म्यागतस्ततः॥ **4.46.24**॥ 1918

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
किष्किन्धाकाण्डे षट्चत्वारिंशः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ सप्तचत्वारिंशः सर्गः ॥

पूर्वादिषु तिसृषु दिक्षु प्रविष्टानां वानराणां सनैराश्यं निवर्तनम्

दर्शनार्थं तु वैदेह्याः सर्वतः कपिकुञ्जराः।
व्यादिष्टाः कपिराजेन यथोक्तं जग्मुरञ्जसा ॥ **4.47.1** ॥ 1919

ते सरांसि सरित्कक्षानाकाशं नगराणि च।
नदीदुर्गांस्तथा देशान् विचिन्वन्ति समन्ततः ॥ **4.47.2** ॥ 1920

सुग्रीवेण समाख्याताः सर्वे वानरयूथपाः।
तत्र देशान् विचिन्वन्ति सशैलवनकाननान् ॥ **4.47.3** ॥ 1921

विचित्य दिवसं सर्वे सीताधिगमने धृताः।
समायान्ति स्म मेदिन्यां निशाकालेषु वानराः ॥ **4.47.4** ॥ 1922

सर्वर्तुकांश्च देशेषु वानराः सफलद्रुमान्।
आसाद्य रजनीं शय्यां चक्रुः सर्वेष्वहःसु ते ॥ **4.47.5** ॥ 1923

तदहः प्रथमं कृत्वा मासे प्रस्रवणं गताः।
कपिराजेन सङ्गम्य निराशाः कपिकुञ्जराः ॥ **4.47.6** ॥ 1924

विचित्य तु दिशं पूर्वां यथोक्तां सचिवैः सह।
अदृष्ट्वा विनतः सीतामाजगाम महाबलः ॥ **4.47.7** ॥ 1925

दिशमप्युत्तरां सर्वां विविच्य स महाकपिः।
आगतः सह सैन्येन भीतः शतबलिस्तदा॥ **4.47.8**॥ 1926

सुषेणः पश्चिमामाशां विविच्य सह वानरैः।
समेत्य मासे पूर्णे तु सुग्रीवमुपचक्रमे॥ **4.47.9**॥ 1927

तं प्रस्रवणपृष्ठस्थं समासाद्याभिवाद्य च।
आसीनं सह रामेण सुग्रीवमिदमब्रुवन्॥ **4.47.10**॥ 1928

विचिताः पर्वताः सर्वे वनानि गहनानि च।
निम्नगाः सागरान्ताश्च सर्वे जनपदाश्च ये॥ **4.47.11**॥ 1929

गुहाश्च विचिताः सर्वा याश्च ते परिकीर्तिताः।
विचिताश्च महागुल्मा लतावितसन्ततताः॥ **4.47.12**॥ 1930

गहनेषु च देशेषु दुर्गेषु विषमेषु च।
सत्त्वान्यतिप्रमाणानि विचितानि हतानि च।
ये चैव गहना देशा विचितास्ते पुनः पुनः॥ **4.47.13**॥ 1931

उदारसत्त्वाभिजनो हनूमान्
स मैथिलीं ज्ञास्यति वानरेन्द्र।
दिशं तु यामेव गता तु सीता
तामास्थितो वायुसुतो हनूमान्॥ **4.47.14**॥ 1932

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
किष्किन्धाकाण्डे सप्तचत्वारिंशः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ अष्टचत्वारिंशः सर्गः ॥

दक्षिणदिग्गतैर्वानरैः सीतानुसन्धानस्य प्रारम्भणम्

सह ताराङ्गदाभ्यां तु सहसा हनुमान् कपिः।
सुग्रीवेण यथोद्दिष्टं गन्तुं देशं प्रचक्रमे ॥ **4.48.1** ॥ 1933

स तु दूरमुपागम्य सर्वैस्तैः कपिसत्तमैः।
ततो विचित्य विन्ध्यस्य गुहाश्च गहनानि च ॥ **4.48.2** ॥ 1934

पर्वताग्रनदीदुर्गान् सरांसि विपुलद्रुमान्।
वृक्षखण्डांश्च विविधान् पर्वतान् वनपादपान् ॥ **4.48.3** ॥ 1935

अन्वेषमाणास्ते सर्वे वानराः सर्वतोदिशम्।
न सीतां ददृशुर्वीरा मैथिलीं जनकात्मजाम् ॥ **4.48.4** ॥ 1936

ते भक्षयन्तो मूलानि फलानि विविधान्यपि।
अन्वेषमाणा दुर्धर्षा न्यवसंस्तत्र तत्र ह ॥ **4.48.5** ॥ 1937

स तु देशो दुरन्वेषो गुहागहनवान् महान्।
निर्जलं निर्जनं शून्यं गहनं घोरदर्शनम् ॥ **4.48.6** ॥ 1938

तादृशान्यप्यरण्यानि विचित्य भृशपीडिताः।
स देशश्च दुरन्वेष्यो गुहागहनवान् महान् ॥ **4.48.7** ॥ 1939

त्यक्त्वा तु तं ततो देशं सर्वे वै हरियूथपाः।
देशमन्यं दुराधर्षं विविशुश्चाकुतोभयाः॥ **4.48.8**॥ 1940

यत्र वन्ध्यफला वृक्षा विपुष्पाः पर्णवर्जिताः।
निस्तोयाः सरितो यत्र मूलं यत्र सुदुर्लभम्॥ **4.48.9**॥ 1941

न सन्ति महिषा यत्र न मृगा न च हस्तिनः।
शार्दूलाः पक्षिणो वापि ये चान्ये वनगोचराः॥ **4.48.10**॥ 1942

न चात्र वृक्षा नौषध्यो न वल्ल्यो नापि वीरुधः।
स्निग्धपत्राः स्थले यत्र पद्मिन्यः फुल्लपङ्कजाः॥ **4.48.11**॥ 1943

प्रेक्षणीयाः सुगन्धाश्च भ्रमरैश्च विवर्जिताः।
कण्डुर्नाम महाभागः सत्यवादी तपोधनः॥ **4.48.12**॥ 1944

महर्षिः परमामर्षी नियमैर्दुष्प्रधर्षणः।
तस्य तस्मिन् वने पुत्रो बालको दशवार्षिकः॥ **4.48.13**॥ 1945

प्रणष्टो जीवितान्ताय क्रुद्धस्तेन महामुनिः।
तेन धर्मात्मना शप्तं कृत्स्नं तत्र महद्वनम्॥ **4.48.14**॥ 1946

अशरण्यं दुराधर्षं मृगपक्षिविवर्जितम्।
तस्य ते काननान्तांस्तु गिरीणां कन्दराणि च॥ **4.48.15**॥ 1947

प्रभवाणि नदीनां च विचिन्वन्ति समाहिताः।
तत्र चापि महात्मानो नापश्यञ्जनकात्मजाम्॥ **4.48.16**॥ 1948

हर्तारं रावणं वापि सुग्रीवप्रियकारिणः।
ते प्रविश्य तु तं भीमं लतागुल्मसमावृतम्॥ **4.48.17**॥ 1949

ददृशुर्भीमकर्माणमसुरं सुरनिर्भयम्।
तं दृष्ट्वा वानरा घोरं स्थितं शैलमिवासुरम्॥ **4.48.18**॥ 1950

गाढं परिहिताः सर्वे दृष्ट्वा तं पर्वतोपमम्।
सोऽपि तान् वानरान् सर्वान् नष्टाः स्थेत्यब्रवीद् बली॥ **4.48.19**॥ 1951

अभ्यधावत सङ्क्रुद्धो मुष्टिमुद्यम्य सङ्गतम्।
तमापतन्तं सहसा वालिपुत्रोऽङ्गदस्तदा॥ **4.48.20**॥ 1952

रावणोऽयमिति ज्ञात्वा तलेनाभिजघान ह।
स वालिपुत्राभिहतो वक्त्राच्छोणितमुद्वमन्॥ **4.48.21**॥ 1953

असुरो न्यपतद् भूमौ पर्यस्त इव पर्वतः।
ते तु तस्मिन् निरुच्छ्वासे वानरा जितकाशिनः॥ **4.48.22**॥ 1954

व्यचिन्वन् प्रायशस्तत्र सर्वं ते गिरिगह्वरम्।
विचितं तु ततः सर्वं सर्वे ते काननौकसः॥ **4.48.23**॥ 1955

अन्यदेवापरं घोरं विविशुर्गिरिगह्वरम्।
ते विचित्य पुनः खिन्ना विनिष्पत्य समागताः।
एकान्ते वृक्षमूले तु निषेदुर्दीनमानसाः॥ **4.48.24**॥ 1956

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
किष्किन्धाकाण्डे अष्टचत्वारिंशः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ एकोनपञ्चाशः सर्गः ॥

अङ्गदगन्धमादनाभ्यामाश्वासितानां वानराणां पुनः सोत्साहमन्वेषणे प्रवृत्तिः

अथाङ्गदस्तदा सर्वान् वानरानिदमब्रवीत्।
परिश्रान्तो महाप्राज्ञः समाश्वास्य शनैर्वचः॥ **4.49.1** ॥ 1957

वनानि गिरयो नद्यो दुर्गाणि गहनानि च।
दरी गिरिगुहाश्चैव विचिताः सर्वमन्ततः॥ **4.49.2** ॥ 1958

तत्र तत्र सहास्माभिर्जानकी न च दृश्यते।
तथा रक्षोऽपहर्ता च सीतायाश्चैव दुष्कृती॥ **4.49.3** ॥ 1959

कालश्च नो महान् यातः सुग्रीवश्चोग्रशासनः।
तस्माद् भवन्तः सहिता विचिन्वन्तु समन्ततः॥ **4.49.4** ॥ 1960

विहाय तन्द्रीं शोकं च निद्रां चैव समुत्थिताम्।
विचिनुध्वं तथा सीतां पश्यामो जनकात्मजाम्॥ **4.49.5** ॥ 1961

अनिर्वेदं च दाक्ष्यं च मनसश्चापराजयम्।
कार्यसिद्धिकराण्याहुस्तस्मादेतद् ब्रवीम्यहम्॥ **4.49.6** ॥ 1962

अद्यापीदं वनं दुर्गं विचिन्वन्तु वनौकसः।
खेदं त्यक्त्वा पुनः सर्वं वनमेव विचिन्वताम्॥ **4.49.7** ॥ 1963

अवश्यं कुर्वतां तस्य दृश्यते कर्मणः फलम्।
परं निर्वेदमागम्य नहि नोन्मीलनं क्षमम्॥ **4.49.8**॥ 1964

सुग्रीवः क्रोधनो राजा तीक्ष्णदण्डश्च वानराः।
भेतव्यं तस्य सततं रामस्य च महात्मनः॥ **4.49.9**॥ 1965

हितार्थमेतदुक्तं वः क्रियतां यदि रोचते।
उच्यतां हि क्षमं यत् तत् सर्वेषामेव वानराः॥ **4.49.10**॥ 1966

अङ्गदस्य वचः श्रुत्वा वचनं गन्धमादनः।
उवाच व्यक्तया वाचा पिपासाश्रमखिन्नया॥ **4.49.11**॥ 1967

सदृशं खलु वो वाक्यमङ्गदो यदुवाच ह।
हितं चैवानुकूलं च क्रियतामस्य भाषितम्॥ **4.49.12**॥ 1968

पुनर्मार्गामहे शैलान् कन्दरांश्च शिलांस्तथा।
काननानि च शून्यानि गिरिप्रस्रवणानि च॥ **4.49.13**॥ 1969

यथोद्दिष्टानि सर्वाणि सुग्रीवेण महात्मना।
विचिन्वन्तु वनं सर्वे गिरिदुर्गाणि सङ्गताः॥ **4.49.14**॥ 1970

ततः समुत्थाय पुनर्वानरास्ते महाबलाः।
विन्ध्यकाननसङ्कीर्णां विचेरुर्दक्षिणां दिशम्॥ **4.49.15**॥ 1971

ते शारदाभ्रप्रतिमं श्रीमद्रजतपर्वतम्।
शृङ्गवन्तं दरीवन्तमधिरुह्य च वानराः॥ **4.49.16**॥ 1972

तत्र लोध्रवनं रम्यं सप्तपर्णवनानि च।
विचिन्वन्तो हरिवराः सीतादर्शनकाङ्क्षिणः॥ **4.49.17**॥ 1973

तस्याग्रमधिरूढास्ते श्रान्ता विपुलविक्रमाः।
न पश्यन्ति स्म वैदेहीं रामस्य महिषीं प्रियाम्॥ **4.49.18**॥ 1974

ते तु दृष्टिगतं दृष्ट्वा तं शैलं बहुकन्दरम्।
अध्यारोहन्त हरयो वीक्षमाणाः समन्ततः॥ **4.49.19**॥ 1975

अवरुह्य ततो भूमिं श्रान्ता विगतचेतसः।
स्थिता मुहूर्तं तत्राथ वृक्षमूलमुपाश्रिताः॥ **4.49.20**॥ 1976

ते मुहूर्तं समाश्वस्ताः किञ्चिद्भग्नपरिश्रमाः।
पुनरेवोद्यताः कृत्स्नां मार्गितुं दक्षिणां दिशम्॥ **4.49.21**॥ 1977

हनुमत्प्रमुखास्तावत् प्रस्थिताः प्लवगर्षभाः।
विन्ध्यमेवादितः कृत्वा विचेरुश्च समन्ततः॥ **4.49.22**॥ 1978

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
किष्किन्धाकाण्डे एकोनपञ्चाशः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ पञ्चाशः सर्गः ॥

क्षुत्तृडभिभूतानां वानराणामेकस्यां गुहायां प्रवेशस्तत्र तैर्दिव्यवृक्षसरोवरभवनानामेकस्या वृद्धायास्तपस्विन्याश्चावलोकनं हनुमता तां प्रति तस्याः परिचयस्य जिज्ञासनम्

सह ताराङ्गदाभ्यां तु सङ्गम्य हनुमान् कपिः।
विचिनोति च विन्ध्यस्य गुहाश्च गहनानि च ॥ **4.50.1** ॥ 1979

सिंहशार्दूलजुष्टाश्च गुहाश्च परितस्तदा।
विषमेषु नगेन्द्रस्य महाप्रस्रवणेषु च ॥ **4.50.2** ॥ 1980

आसेदुस्तस्य शैलस्य कोटिं दक्षिणपश्चिमाम्।
तेषां तत्रैव वसतां स कालो व्यत्यवर्तत ॥ **4.50.3** ॥ 1981

स हि देशो दुरन्वेष्यो गुहागहनवान् महान्।
तत्र वायुसुतः सर्वं विचिनोति स्म पर्वतम् ॥ **4.50.4** ॥ 1982

परस्परेण रहिता अन्योन्यस्याविदूरतः।
गजो गवाक्षो गवयः शरभो गन्धमादनः ॥ **4.50.5** ॥ 1983

मैन्दश्च द्विविदश्चैव हनूमान् जाम्बवानपि।
अङ्गदो युवराजश्च तारश्च वनगोचरः ॥ **4.50.6** ॥ 1984

गिरिजालावृतान् देशान् मार्गित्वा दक्षिणां दिशम्।
विचिन्वन्तस्ततस्तत्र ददृशुर्विवृतं बिलम् ॥ **4.50.7** ॥ 1985

दुर्गमृक्षबिलं नाम दानवेनाभिरक्षितम्।
क्षुत्पिपासापरीतास्तु श्रान्तास्तु सलिलार्थिनः॥ **4.50.8**॥ 1986

अवकीर्णं लतावृक्षैर्ददृशुस्ते महाबिलम्।
तत्र क्रौञ्चाश्च हंसाश्च सारसाश्चापि निष्क्रमन्॥ **4.50.9**॥ 1987

जलार्द्राश्चक्रवाकाश्च रक्ताङ्गाः पद्मरेणुभिः।
ततस्तद् बिलमासाद्य सुगन्धि दुरतिक्रमम्॥ **4.50.10**॥ 1988

विस्मयव्यग्रमनसो बभूवुर्वानरर्षभाः।
सञ्जातपरिशङ्कास्ते तद् बिलं प्लवगोत्तमाः॥ **4.50.11**॥ 1989

अभ्यपद्यन्त संहृष्टास्तेजोवन्तो महाबलाः।
नानासत्त्वसमाकीर्णं दैत्येन्द्रनिलयोपमम्॥ **4.50.12**॥ 1990

दुर्दर्शमिव घोरं च दुर्विगाह्यं च सर्वशः।
ततः पर्वतकूटाभो हनूमान् मारुतात्मजः॥ **4.50.13**॥ 1991

अब्रवीद् वानरान् घोरान् कान्तारवनकोविदः।
गिरिजालावृतान् देशान् मार्गित्वा दक्षिणां दिशम्॥ **4.50.14**॥ 1992

वयं सर्वे परिश्रान्ता न च पश्याम मैथिलीम्।
अस्माच्चापि बिलाद्धंसाः क्रौञ्चाश्च सह सारसैः॥ **4.50.15**॥ 1993

जलार्द्राश्चक्रवाकाश्च निष्पतन्ति स्म सर्वशः।
नूनं सलिलवानत्र कूपो वा यदि वा ह्रदः॥ **4.50.16**॥ 1994

तथा चेमे बिलद्वारे स्निग्धास्तिष्ठन्ति पादपाः।
इत्युक्तास्तद् बिलं सर्वे विविशुस्तिमिरावृतम्॥ **4.50.17**॥ 1995

अचन्द्रसूर्यं हरयो ददृशू रोमहर्षणम्।
निशाम्य तस्मात् सिंहांश्च तांस्तांश्च मृगपक्षिणः॥ **4.50.18**॥ 1996

प्रविष्टा हरिशार्दूला बिलं तिमिरसंवृतम्।
न तेषां सज्जते दृष्टिर्न तेजो न पराक्रमः॥ **4.50.19**॥ 1997

वायोरिव गतिस्तेषां दृष्टिस्तमसि वर्तते।
ते प्रविष्टास्तु वेगेन तद् बिलं कपिकुञ्जराः॥ **4.50.20**॥ 1998

प्रकाशं चाभिरामं च ददृशुर्देशमुत्तमम्।
ततस्तस्मिन् बिले भीमे नानापादपसङ्कुले॥ **4.50.21**॥ 1999

अन्योन्यं सम्परिष्वज्य जग्मुर्योजनमन्तरम्।
ते नष्टसंज्ञास्तृषिताः सम्भ्रान्ताः सलिलार्थिनः॥ **4.50.22**॥ 2000

परिपेतुर्बिले तस्मिन् कञ्चित् कालमतन्द्रिताः।
ते कृशा दीनवदनाः परिश्रान्ताः प्लवङ्गमाः॥ **4.50.23**॥ 2001

आलोकं ददृशुर्वीरा निराशा जीविते यदा।
ततस्तं देशमागम्य सौम्या वितिमिरं वनम्॥ **4.50.24**॥ 2002

ददृशुः काञ्चनान् वृक्षान् दीप्तवैश्वानरप्रभान्।
सालांस्तालांस्तमालांश्च पुन्नागान् वञ्जुलान् धवान्॥ **4.50.25**॥ 2003

चम्पकान् नागवृक्षांश्च कर्णिकारांश्चपुष्पितान्।
स्तबकैः काञ्चनैश्चित्रै रक्तैः किसलयैस्तथा॥ **4.50.26**॥ 2004

आपीडैश्च लताभिश्च हेमाभरणभूषितान्।
तरुणादित्यसङ्काशान् वैदूर्यमयवेदिकान्॥ **4.50.27**॥ 2005

बिभ्राजमानान् वपुषा पादपांश्च हिरण्मयान्।
नीलवैदूर्यवर्णाश्च पद्मिनीः पतगैर्वृताः॥ **4.50.28**॥ 2006

महद्भिः काञ्चनैर्वृक्षैर्वृता बालार्कसन्निभैः।
जातरूपमयैर्मत्स्यैर्महद्भिश्चाथ पङ्कजैः॥ **4.50.29**॥ 2007

नलिनीस्तत्र ददृशुः प्रसन्नसलिलायुताः।
काञ्चनानि विमानानि राजतानि तथैव च॥ **4.50.30**॥ 2008

तपनीयगवाक्षाणि मुक्ताजालावृतानि च।
हैमराजतभौमानि वैदूर्यमणिमन्ति च॥ **4.50.31**॥ 2009

ददृशुस्तत्र हरयो गृहमुख्यानि सर्वशः।
पुष्पितान् फलिनो वृक्षान् प्रवालमणिसन्निभान्॥ **4.50.32**॥ 2010

काञ्चनभ्रमरांश्चैव मधूनि च समन्ततः।
मणिकाञ्चनचित्राणि शयनान्यासनानि च॥ **4.50.33**॥ 2011

विविधानि विशालानि ददृशुस्ते समन्ततः।
हैमराजतकांस्यानां भाजनानां च राशयः॥ **4.50.34**॥ 2012

अगुरूणां च दिव्यानां चन्दनानां च सञ्चयान्।
शुचीन्यभ्यवहाराणि मूलानि च फलानि च॥ **4.50.35**॥ 2013

महार्हाणि च यानानि मधूनि रसवन्ति च।
दिव्यानामम्बराणां च महार्हाणां च सञ्चयान्॥ **4.50.36**॥ 2014

कम्बलानां च चित्राणामजिनानां च सञ्चयान्।
तत्र तत्र च विन्यस्तान् दीप्तान् वैश्वानरप्रभान्॥ **4.50.37**॥ 2015

ददृशुर्वानराः शुभ्राञ्जातरूपस्य सञ्चयान्।
तत्र तत्र विचिन्वन्तो बिले तत्र महाप्रभाः॥ **4.50.38**॥ 2016

ददृशुर्वानराः शूराः स्त्रियं काञ्चिददूरतः।
तां च ते ददृशुस्तत्र चीरकृष्णाजिनाम्बराम्॥ **4.50.39**॥ 2017

तापसीं नियताहारां ज्वलन्तीमिव तेजसा।
विस्मिता हरयस्तत्र व्यवतिष्ठन्त सर्वशः।
पप्रच्छ हनुमांस्तत्र कासि त्वं कस्य वा बिलम्॥ **4.50.40**॥ 2018

ततो हनूमान् गिरिसन्निकाशः
कृताञ्जलिस्तामभिवाद्य वृद्धाम्।
पप्रच्छ का त्वं भवनं बिलं च
रत्नानि चेमानि वदस्व कस्य॥ **4.50.41**॥ 2019

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
किष्किन्धाकाण्डे पञ्चाशः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ एकपञ्चाशः सर्गः ॥

हनुमता पृष्टया तापस्या स्वात्मनस्तस्य दिव्यस्थानस्य च परिचयं दत्त्वा वानराणां भोजनाय निमन्त्रणम्

इत्युक्त्वा हनुमांस्तत्र चीरकृष्णाजिनाम्बराम्।
अब्रवीत् तां महाभागां तापसीं धर्मचारिणीम्॥ **4.51.1** ॥ 2020

इदं प्रविष्टाः सहसा बिलं तिमिरसंवृतम्।
क्षुत्पिपासापरिश्रान्ताः परिखिन्नाश्च सर्वशः॥ **4.51.2** ॥ 2021

महद् धरण्या विवरं प्रविष्टाः स्म पिपासिताः।
इमांस्त्वेवंविधान् भावान् विविधानद्भुतोपमान्॥ **4.51.3** ॥ 2022

दृष्ट्वा वयं प्रव्यथिताः सम्भ्रान्ता नष्टचेतसः।
कस्यैते काञ्चना वृक्षास्तरुणादित्यसन्निभाः॥ **4.51.4** ॥ 2023

शुचीन्यभ्यवहाराणि मूलानि च फलानि च।
काञ्चनानि विमानानि राजतानि गृहाणि च॥ **4.51.5** ॥ 2024

तपनीयगवाक्षाणि मणिजालावृतानि च।
पुष्पिताः फलवन्तश्च पुण्याः सुरभिगन्धयः॥ **4.51.6** ॥ 2025

इमे जाम्बूनदमयाः पादपाः कस्य तेजसा।
काञ्चनानि च पद्मानि जातानि विमले जले॥ **4.51.7** ॥ 2026

कथं मत्स्याश्च सौवर्णा दृश्यन्ते सह कच्छपैः।
आत्मनस्त्वनुभावाद् वा कस्य वैतत्तपोबलम्॥ **4.51.8**॥ 2027

अजानतां नः सर्वेषां सर्वमाख्यातुमर्हसि।
एवमुक्ता हनुमता तापसी धर्मचारिणी॥ **4.51.9**॥ 2028

प्रत्युवाच हनूमन्तं सर्वभूतहिते रता।
मयो नाम महातेजा मायावी वानरर्षभ॥ **4.51.10**॥ 2029

तेनेदं निर्मितं सर्वं मायया काञ्चनं वनम्।
पुरा दानवमुख्यानां विश्वकर्मा बभूव ह॥ **4.51.11**॥ 2030

येनेदं काञ्चनं दिव्यं निर्मितं भवनोत्तमम्।
स तु वर्षसहस्राणि तपस्तप्त्वा महद्वने॥ **4.51.12**॥ 2031

पितामहाद् वरं लेभे सर्वमौशनसं धनम्।
विधाय सर्वं बलवान् सर्वकामेश्वरस्तदा॥ **4.51.13**॥ 2032

उवास सुखितः कालं कञ्चिदस्मिन् महावने।
तमप्सरसि हेमायां सक्तं दानवपुङ्गवम्॥ **4.51.14**॥ 2033

विक्रम्यैवाशनिं गृह्य जघानेशः पुरन्दरः।
इदं च ब्रह्मणा दत्तं हेमायै वनमुत्तमम्॥ **4.51.15**॥ 2034

शाश्वतः कामभोगश्च गृहं चेदं हिरण्मयम्।
दुहिता मेरुसावर्णेरहं तस्याः स्वयम्प्रभा॥ **4.51.16**॥ 2035

इदं रक्षामि भवनं हेमाया वानरोत्तम।
मम प्रियसखी हेमा नृत्तगीतविशारदा॥ **4.51.17**॥ 2036

तयादत्तवरा चास्मि रक्षामि भवनं महत्।
किं कार्यं कस्य वा हेतोः कान्तारानि प्रपद्यथ॥ **4.51.18**॥ 2037

कथं चेदं वनं दुर्गं युष्माभिरुपलक्षितम्।
शुचीन्यभ्यवहाराणि मूलानि च फलानि च।
भुक्त्वा पीत्वा च पानीयं सर्वं मे वक्तुमर्हसि॥ 4.51.19॥ 2038

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
किष्किन्धाकाण्डे एकपञ्चाशः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ द्विपञ्चाशः सर्गः ॥

स्वयम्प्रभया पृष्टैर्वानरैस्तां प्रति स्ववृत्तान्तस्य वर्णनं तस्याः प्रभावेण च गुहातो बहिर्निष्क्रम्य तेषां सागरतटे गमनम्

अथ तानब्रवीत् सर्वान् विश्रान्तान् हरियूथपान्।
इदं वचनमेकाग्रा तापसी धर्मचारिणी ॥ **4.52.1** ॥ 2039

वानरा यदि वः खेदः प्रणष्टः फलभक्षणात्।
यदि चैतन्मया श्राव्यं श्रोतुमिच्छामि तां कथाम् ॥ **4.52.2** ॥ 2040

तस्यास्तद् वचनं श्रुत्वा हनूमान् मारुतात्मजः।
आर्जवेन यथातत्त्वमाख्यातुमुपचक्रमे ॥ **4.52.3** ॥ 2041

राजा सर्वस्य लोकस्य महेन्द्रवरुणोपमः।
रामो दाशरथिः श्रीमान् प्रविष्टो दण्डकावनम् ॥ **4.52.4** ॥ 2042

लक्ष्मणेन सह भ्रात्रा वैदेह्या सह भार्यया।
तस्य भार्या जनस्थानाद् रावणेन हृता बलात् ॥ **4.52.5** ॥ 2043

वीरस्तस्य सखा राज्ञः सुग्रीवो नाम वानरः।
राजा वानरमुख्यानां येन प्रस्थापिता वयम् ॥ **4.52.6** ॥ 2044

अगस्त्यचरितामाशां दक्षिणां यमरक्षिताम्।
सहैभिर्वानरैर्मुख्यैरङ्गदप्रमुखैर्वयम् ॥ **4.52.7** ॥ 2045

रावणं सहिताः सर्वे राक्षसं कामरूपिणम्।
सीतया सह वैदेह्या मार्गध्वमिति चोदिताः॥ **4.52.8**॥ 2046

विचित्य तु वनं सर्वं समुद्रं दक्षिणां दिशम्।
वयं बुभुक्षिताः सर्वे वृक्षमूलमुपाश्रिताः॥ **4.52.9**॥ 2047

विवर्णवदनाः सर्वे सर्वे ध्यानपरायणाः।
नाधिगच्छामहे पारं मग्नाश्चिन्तामहार्णवे॥ **4.52.10**॥ 2048

चारयन्तस्ततश्चक्षुर्दृष्टवन्तो महद् बिलम्।
लतापादपसञ्छन्नं तिमिरेण समावृतम्॥ **4.52.11**॥ 2049

अस्माद्धंसा जलक्लिन्नाः पक्षैः सलिलरेणुभिः।
कुरराः सारसाश्चैव निष्पतन्ति पतत्रिणः॥ **4.52.12**॥ 2050

साध्वत्र प्रविशामेति मया तूक्ताः प्लवङ्गमाः।
तेषामपि हि सर्वेषामनुमानमुपागतम्॥ **4.52.13**॥ 2051

अस्मिन् निपतिताः सर्वेऽप्यथ कार्यत्वरान्विताः।
ततो गाढं निपतिता गृह्य हस्तैः परस्परम्॥ **4.52.14**॥ 2052

इदं प्रविष्टाः सहसा बिलं तिमिरसंवृतम्।
एतन्नः कार्यमेतेन कृत्येन वयमागताः॥ **4.52.15**॥ 2053

त्वां चैवोपगताः सर्वे परिद्यूना बुभुक्षिताः।
आतिथ्यधर्मदत्तानि मूलानि च फलानि च॥ **4.52.16**॥ 2054

अस्माभिरुपयुक्तानि बुभुक्षापरिपीडितैः।
यत् त्वया रक्षिताः सर्वे म्रियमाणा बुभुक्षया॥ **4.52.17**॥ 2055

ब्रूहि प्रत्युपकारार्थं किं ते कुर्वन्तु वानराः।
एवमुक्ता तु सर्वज्ञा वानरैस्तैः स्वयम्प्रभा॥ **4.52.18**॥ 2056

प्रत्युवाच ततः सर्वानिदं वानरयूथपान्।
सर्वेषां परितुष्टास्मि वानराणां तरस्विनाम्॥ **4.52.19**॥ 2057

चरन्त्या मम धर्मेण न कार्यमिह केनचित्।
एवमुक्तः शुभं वाक्यं तापस्या धर्मसंहितम्॥ **4.52.20**॥ 2058

उवाच हनुमान् वाक्यं तामनिन्दितलोचनाम्।
शरणं त्वां प्रपन्नाः स्मः सर्वे वै धर्मचारिणीम्॥ **4.52.21**॥ 2059

यः कृतः समयोऽस्मासु सुग्रीवेण महात्मना।
स तु कालो व्यतिक्रान्तो बिले च परिवर्तताम्॥ **4.52.22**॥ 2060

सा त्वमस्माद् बिलादस्मानुत्तारयितुमर्हसि।
तस्मात् सुग्रीववचनादतिक्रान्तान् गतायुषः॥ **4.52.23**॥ 2061

त्रातुमर्हसि नः सर्वान् सुग्रीवभयशङ्कितान्।
महच्च कार्यमस्माभिः कर्तव्यं धर्मचारिणि॥ **4.52.24**॥ 2062

तच्चापि न कृतं कार्यमस्माभिरिह वासिभिः।
एवमुक्ता हनुमता तापसी वाक्यमब्रवीत्॥ **4.52.25**॥ 2063

जीवता दुष्करं मन्ये प्रविष्टेन निवर्तितुम्।
तपसः सुप्रभावेण नियमोपार्जितेन च॥ **4.52.26**॥ 2064

सर्वानेव बिलादस्मात् तारयिष्यामि वानरान्।
निमीलयत चक्षूंषि सर्वे वानरपुङ्गवाः॥ **4.52.27**॥ 2065

नहि निष्क्रमितुं शक्यमनिमीलितलोचनैः।
ततो निमीलिताः सर्वे सुकुमाराङ्गुलैः करैः॥ **4.52.28**॥ 2066

सहसा पिदधुर्दृष्टिं हृष्टा गमनकाङ्क्षया।
वानरास्तु महात्मानो हस्तरुद्धमुखास्तदा॥ **4.52.29**॥ 2067

निमेषान्तरमात्रेण बिलादुत्तारितास्तया।
उवाच सर्वांस्तांस्तत्र तापसी धर्मचारिणी॥ **4.52.30**॥ 2068

निःसृतान् विषमात् तस्मात् समाश्वास्येदमब्रवीत्।
एष विन्ध्यो गिरिः श्रीमान् नानाद्रुमलतायुतः॥ **4.52.31**॥ 2069

एष प्रस्रवणः शैलः सागरोऽयं महोदधिः।
स्वस्ति वोऽस्तु गमिष्यामि भवनं वानरर्षभाः।
इत्युक्त्वा तद् बिलं श्रीमत् प्रविवेश स्वयम्प्रभा॥ **4.52.32**॥ 2070

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
किष्किन्धाकाण्डे द्विपञ्चाशः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ त्रिपञ्चाशः सर्गः ॥

निवर्तनाय नियतमवधिमतीत्यापि कार्यस्यासाधनात् सुग्रीवस्योग्रदण्डतो विभ्यतामङ्गदप्रभृतीनां कपीनामुपोष्य प्राणान् परित्यक्तुं निश्चयः

ततस्ते ददृशुर्घोरं सागरं वरुणालयम्।
अपारमभिगर्जन्तं घोरैरूर्मिभिराकुलम्॥ **4.53.1** ॥ 2071

मयस्य मायाविहितं गिरिदुर्गं विचिन्वताम्।
तेषां मासो व्यतिक्रान्तो यो राज्ञा समयः कृतः॥ **4.53.2** ॥ 2072

विन्ध्यस्य तु गिरेः पादे सम्प्रपुष्पितपादपे।
उपविश्य महात्मानश्चिन्तामापेदिरे तदा॥ **4.53.3** ॥ 2073

ततः पुष्पातिभाराग्रान् लताशतसमावृतान्।
द्रुमान् वासन्तिकान् दृष्ट्वा बभूवुर्भयशङ्किताः॥ **4.53.4** ॥ 2074

ते वसन्तमनुप्राप्तं प्रतिवेद्य परस्परम्।
नष्टसन्देशकालार्था निपेतुर्धरणीतले॥ **4.53.5** ॥ 2075

ततस्तान् कपिवृद्धांश्च शिष्टांश्चैव वनौकसः।
वाचा मधुरयाऽऽभाष्य यथावदनुमान्य च॥ **4.53.6** ॥ 2076

स तु सिंहवृषस्कन्धः पीनायतभुजः कपिः।
युवराजो महाप्राज्ञ अङ्गदो वाक्यमब्रवीत्॥ **4.53.7** ॥ 2077

शासनात् कपिराजस्य वयं सर्वे विनिर्गताः।
मासः पूर्णो बिलस्थानां हरयः किं न बुध्यत॥ **4.53.8**॥ 2078

वयमाश्वयुजे मासि कालसङ्ख्याव्यवस्थिताः।
प्रस्थिताः सोऽपिचातीतः किमतः कार्यमुत्तरम्॥ **4.53.9**॥ 2079

भवन्तः प्रत्ययं प्राप्ता नीतिमार्गविशारदाः।
हितेष्वभिरता भर्तुर्निसृष्टाः सर्वकर्मसु॥ **4.53.10**॥ 2080

कर्मस्वप्रतिमाः सर्वे दिक्षु विश्रुतपौरुषाः।
मां पुरस्कृत्य निर्याताः पिङ्गाक्षप्रतिचोदिताः॥ **4.53.11**॥ 2081

इदानीमकृतार्थानां मर्तव्यं नात्र संशयः।
हरिराजस्य सन्देशमकृत्वा कः सुखी भवेत्॥ **4.53.12**॥ 2082

अस्मिन्नतीते काले तु सुग्रीवेण कृते स्वयम्।
प्रायोपवेशनं युक्तं सर्वेषां च वनौकसाम्॥ **4.53.13**॥ 2083

तीक्ष्णः प्रकृत्या सुग्रीवः स्वामिभावे व्यवस्थितः।
न क्षमिष्यति नः सर्वानपराधकृतो गतान्॥ **4.53.14**॥ 2084

अप्रवृत्तौ च सीतायाः पापमेव करिष्यति।
तस्मात् क्षममिहाद्यैव गन्तुं प्रायोपवेशनम्॥ **4.53.15**॥ 2085

त्यक्त्वा पुत्रांश्च दारांश्च धनानि च गृहाणि च।
ध्रुवं नो हिंसते राजा सर्वान् प्रतिगतानितः॥ **4.53.16**॥ 2086

वधेनाप्रतिरूपेण श्रेयान् मृत्युरिहैव नः।
न चाहं यौवराज्येन सुग्रीवेणाभिषेचितः॥ **4.53.17**॥ 2087

नरेन्द्रेणाभिषिक्तोऽस्मि रामेणाक्लिष्टकर्मणा।
स पूर्वं बद्धवैरो मां राजा दृष्ट्वा व्यतिक्रमम्॥ **4.53.18**॥ 2088

घातयिष्यति दण्डेन तीक्ष्णेन कृतनिश्चयः।
किं मे सुहद्भिर्व्यसनं पश्यद्भिर्जीवितान्तरे।
इहैव प्रायमासिष्ये पुण्ये सागररोधसि॥ **4.53.19**॥ 2089

एतच्छ्रुत्वा कुमारेण युवराजेन भाषितम्।
सर्वे ते वानरश्रेष्ठाः करुणं वाक्यमब्रुवन्॥ **4.53.20**॥ 2090

तीक्ष्णः प्रकृत्या सुग्रीवः प्रियारक्तश्च राघवः।
समीक्ष्याकृतकार्यांस्तु तस्मिंश्च समये गते॥ **4.53.21**॥ 2091

अदृष्टायां च वैदेह्यां दृष्ट्वा चैव समागतान्।
राघवप्रियकामाय घातयिष्यत्यसंशयम्॥ **4.53.22**॥ 2092

न क्षमं चापराद्धानां गमनं स्वामिपार्श्वतः।
प्रधानभूताश्च वयं सुग्रीवस्य समागताः॥ **4.53.23**॥ 2093

इहैव सीतामन्वीक्ष्य प्रवृत्तिमुपलभ्य वा।
नो चेद् गच्छाम तं वीरं गमिष्यामो यमक्षयम्॥ **4.53.24**॥ 2094

प्लवङ्गमानां तु भयार्दितानां
श्रुत्वा वचस्तार इदं बभाषे।
अलं विषादेन बिलं प्रविश्य
वसाम सर्वे यदि रोचते वः॥ **4.53.25**॥ 2095

इदं हि मायाविहितं सुदुर्गमं
प्रभूतवृक्षोदकभोज्यपेयकम्।
इहास्ति नो नैव भयं पुरन्दरा -
न्न राघवाद् वानरराजतोऽपि वा॥ **4.53.26**॥ 2096

श्रुत्वाङ्गदस्यापि वचोऽनुकूल -
मूचुश्च सर्वे हरयः प्रतीताः।
यथा न हन्येम तथा विधान -
मसक्तमद्यैव विधीयतां नः॥ **4.53.27**॥ 2097

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
किष्किन्धाकाण्डे त्रिपञ्चाशः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ चतुःपञ्चाशः सर्गः ॥

भेदनीत्या वानरान् स्वपक्षे समानीय हनुमताङ्गदस्यात्मना सह चलितुं प्रबोधनम्

तथा ब्रुवति तारे तु ताराधिपतिवर्चसि।
अथ मेने हृतं राज्यं हनूमानङ्गदेन तत्॥ **4.54.1** ॥ 2098

बुद्ध्या ह्यष्टाङ्गया युक्तं चतुर्बलसमन्वितम्।
चतुर्दशगुणं मेने हनूमान् वालिनः सुतम्॥ **4.54.2** ॥ 2099

आपूर्यमाणं शश्वच्च तेजोबलपराक्रमैः।
शशिनं शुक्लपक्षादौ वर्धमानमिव श्रिया॥ **4.54.3** ॥ 2100

बृहस्पतिसमं बुद्ध्या विक्रमे सदृशं पितुः।
शुश्रूषमाणं तारस्य शुक्रस्येव पुरन्दरम्॥ **4.54.4** ॥ 2101

भर्तुरर्थे परिश्रान्तं सर्वशास्त्रविशारदः।
अभिसन्धातुमारेभे हनूमानङ्गदं ततः॥ **4.54.5** ॥ 2102

स चतुर्णामुपायानां तृतीयमुपवर्णयन्।
भेदयामास तान् सर्वान् वानरान् वाक्यसम्पदा॥ **4.54.6** ॥ 2103

तेषु सर्वेषु भिन्नेषु ततोऽभीषयदङ्गदम्।
भीषणैर्विविधैर्वाक्यैः कोपोपायसमन्वितैः॥ **4.54.7** ॥ 2104

त्वं समर्थतरः पित्रा युद्धे तारेय वै ध्रुवम्।
दृढं धारयितुं शक्तः कपिराज्यं यथा पिता॥ **4.54.8**॥ 2105

नित्यमस्थिरचित्ता हि कपयो हरिपुङ्गव।
नाज्ञाप्यं विषहिष्यन्ति पुत्रदारं विना त्वया॥ **4.54.9**॥ 2106

त्वां नैते ह्यनुरञ्जेयुः प्रत्यक्षं प्रवदामि ते।
यथायं जाम्बवान् नीलः सुहोत्रश्च महाकपिः॥ **4.54.10**॥ 2107

नह्यहं ते इमे सर्वे सामदानादिभिर्गुणैः।
दण्डेन न त्वया शक्याः सुग्रीवादपकर्षितुम्॥ **4.54.11**॥ 2108

विगृह्यासनमप्याहर्दुर्बलेन बलीयसा।
आत्मरक्षाकरस्तस्मान्न विगृह्णीत दुर्बलः॥ **4.54.12**॥ 2109

यां चेमां मन्यसे धात्रीमेतद् बिलमिति श्रुतम्।
एतल्लक्ष्मणबाणानामीषत् कार्यं विदारणम्॥ **4.54.13**॥ 2110

स्वल्पं हि कृतमिन्द्रेण क्षिपता ह्यशनिं पुरा।
लक्ष्मणो निशितैर्बाणैर्भिन्द्यात् पत्रपुटं यथा॥ **4.54.14**॥ 2111

लक्ष्मणस्य च नाराचा बहवः सन्ति तद्विधाः।
वज्राशनिसमस्पर्शा गिरीणामपि दारकाः॥ **4.54.15**॥ 2112

अवस्थानं यदैव त्वमासिष्यसि परन्तप।
तदैव हरयः सर्वे त्यक्ष्यन्ति कृतनिश्चयाः॥ **4.54.16**॥ 2113

स्मरन्तः पुत्रदाराणां नित्योद्विग्ना बुभुक्षिताः।
खेदिता दुःखशय्याभिस्त्वां करिष्यन्ति पृष्ठतः॥ **4.54.17**॥ 2114

स त्वं हीनः सुहृद्भिश्च हितकामैश्च बन्धुभिः।
तृणादपि भृशोद्विग्नः स्पन्दमानाद् भविष्यसि॥ **4.54.18**॥ 2115

न च जातु न हिंस्युस्त्वां घोरा लक्ष्मणसायकाः।
अपवृत्तं जिघांसन्तो महावेगा दुरासदाः॥ **4.54.19**॥ 2116

अस्माभिस्तु गतं सार्धं विनीतवदुपस्थितम्।
आनुपूर्व्यात्तु सुग्रीवो राज्ये त्वां स्थापयिष्यति॥ **4.54.20**॥ 2117

धर्मराजः पितृव्यस्ते प्रीतिकामो दृढव्रतः।
शुचिः सत्यप्रतिज्ञश्च स त्वां जातु न नाशयेत्॥ **4.54.21**॥ 2118

प्रियकामश्च ते मातुस्तदर्थं चास्य जीवितम्।
तस्यापत्यं च नास्त्यन्यत् तस्मादङ्गद गम्यताम्॥ **4.54.22**॥ 2119

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
किष्किन्धाकाण्डे चतुःपञ्चाशः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ पञ्चपञ्चाशः सर्गः ॥

अङ्गदसहितानां वानराणां प्रायोपवेशनम्

श्रुत्वा हनुमतो वाक्यं प्रश्रितं धर्मसंहितम्।
स्वामिसत्कारसंयुक्तमङ्गदो वाक्यमब्रवीत्॥ **4.55.1** ॥ 2120

स्थैर्यमात्ममनःशौचमानृशंस्यमथार्जवम्।
विक्रमश्चैव धैर्यं च सुग्रीवे नोपपद्यते॥ **4.55.2** ॥ 2121

भ्रातुर्ज्येष्ठस्य यो भार्यां जीवतो महिषीं प्रियाम्।
धर्मेण मातरं यस्तु स्वीकरोति जुगुप्सितः॥ **4.55.3** ॥ 2122

कथं स धर्मं जानीते येन भ्रात्रा दुरात्मना।
युद्धायाभिनियुक्तेन बिलस्य पिहितं मुखम्॥ **4.55.4** ॥ 2123

सत्यात् पाणिगृहीतश्च कृतकर्मा महायशाः।
विस्मृतो राघवो येन स कस्य सुकृतं स्मरेत्॥ **4.55.5** ॥ 2124

लक्ष्मणस्य भयेनेह नाधर्मभयभीरुणा।
आदिष्टा मार्गितुं सीता धर्मस्तस्मिन् कथं भवेत्॥ **4.55.6** ॥ 2125

तस्मिन् पापे कृतघ्ने तु स्मृतिभिन्ने चलात्मनि।
आर्यः को विश्वसेज्जातु तत्कुलीनो विशेषतः॥ **4.55.7** ॥ 2126

राज्ये पुत्रः प्रतिष्ठाप्यः सगुणो निर्गुणोऽपि वा।
कथं शत्रुकुलीनं मां सुग्रीवो जीवयिष्यति॥ **4.55.8**॥ 2127

भिन्नमन्त्रोऽपराद्धश्च भिन्नशक्तिः कथं ह्यहम्।
किष्किन्धां प्राप्य जीवेयमनाथ इव दुर्बलः॥ **4.55.9**॥ 2128

उपांशुदण्डेन हि मां बन्धनेनोपपादयेत्।
शठः क्रूरो नृशंसश्च सुग्रीवो राज्यकारणात्॥ **4.55.10**॥ 2129

बन्धनाच्यावसादान्मे श्रेयः प्रायोपवेशनम्।
अनुजानन्तु मां सर्वे गृहं गच्छन्तु वानराः॥ **4.55.11**॥ 2130

अहं वः प्रतिजानामि न गमिष्याम्यहं पुरीम्।
इहैव प्रायमासिष्ये श्रेयो मरणमेव मे॥ **4.55.12**॥ 2131

अभिवादनपूर्वं तु राजा कुशलमेव च।
अभिवादनपूर्वं तु राघवौ बलशालिनौ॥ **4.55.13**॥ 2132

वाच्यस्तातो यवीयान् मे सुग्रीवो वानरेश्वरः।
आरोग्यपूर्वं कुशलं वाच्या माता रुमा च मे॥ **4.55.14**॥ 2133

मातरं चैव मे तारामाश्वासयितुमर्हथ।
प्रकृत्या प्रियपुत्रा सा सानुक्रोशा तपस्विनी॥ **4.55.15**॥ 2134

विनष्टमिह मां श्रुत्वा व्यक्तं हास्यति जीवितम्।
एतावदुक्त्वा वचनं वृद्धांस्तानभिवाद्य च॥ **4.55.16**॥ 2135

विवेश चाङ्गदो भूमौ रुदन् दर्भेषु दुर्मनाः।
तस्य संविशतस्तत्र रुदन्तो वानरर्षभाः॥ **4.55.17**॥ 2136

नयनेभ्यः प्रमुमुचुरुष्णं वै वारि दुःखिताः।
सुग्रीवं चैव निन्दन्तः प्रशंसन्तश्च वालिनम्॥ **4.55.18**॥ 2137

परिवार्याङ्गदं सर्वे व्यवसन् प्रायमासितुम्।
तद् वाक्यं वालिपुत्रस्य विज्ञाय प्लवगर्षभाः॥ **4.55.19**॥ 2138

उपस्पृश्योदकं सर्वे प्राङ्मुखाः समुपाविशन्।
दक्षिणाग्रेषु दर्भेषु उदक्तीरं समाश्रिताः॥ **4.55.20**॥ 2139

मुमूर्षवो हरिश्रेष्ठा एतत् क्षममिति स्म ह।
रामस्य वनवासं च क्षयं दशरथस्य च॥ **4.55.21**॥ 2140

जनस्थानवधं चैव वधं चैव जटायुषः।
हरणं चैव वैदेह्या वालिनश्च वधं तथा।
रामकोपं च वदतां हरीणां भयमागतम्॥ **4.55.22**॥ 2141

स संविशद्भिर्बहुभिर्महीधरो
महाद्रिकूटप्रतिमैः प्लवङ्गमैः।
बभूव सन्नादितनिर्दरान्तरो
भृशं नदद्भिर्जलदैरिवाम्बरम्॥ **4.55.23**॥ 2142

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
किष्किन्धाकाण्डे पञ्चपञ्चाशः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ षट्पञ्चाशः सर्गः ॥

सम्पातेर्वानराणां भयं तेषां मुखाजटायुषो वधं निशम्य सम्पातेर्दुःखं स्वमधोऽवरोपयितुं तस्य वानरान् प्रत्यनुनयः

उपविष्टास्तु ते सर्वे यस्मिन् प्रायं गिरिस्थले।
हरयो गृध्रराजश्च तं देशमुपचक्रमे॥ **4.56.1** ॥ 2143

सम्पातिर्नाम नाम्ना तु चिरजीवी विहङ्गमः।
भ्राता जटायुषः श्रीमान् विख्यातबलपौरुषः॥ **4.56.2** ॥ 2144

कन्दरादभिनिष्क्रम्य स विन्ध्यस्य महागिरेः।
उपविष्टान् हरीन् दृष्ट्वा हृष्टात्मा गिरमब्रवीत्॥ **4.56.3** ॥ 2145

विधिः किल नरं लोके विधानेनानुवर्तते।
यथायं विहितो भक्ष्यश्चिरान्मह्यमुपागतः॥ **4.56.4** ॥ 2146

परम्पराणां भक्षिष्ये वानराणां मृतं मृतम्।
उवाचैतद् वचः पक्षी तान् निरीक्ष्य प्लवङ्गमान्॥ **4.56.5** ॥ 2147

तस्य तद् वचनं श्रुत्वा भक्ष्यलुब्धस्य पक्षिणः।
अङ्गदः परमायस्तो हनूमन्तमथाब्रवीत्॥ **4.56.6** ॥ 2148

पश्य सीतापदेशेन साक्षाद् वैवस्वतो यमः।
इमं देशमनुप्राप्तो वानराणां विपत्तये॥ **4.56.7** ॥ 2149

रामस्य न कृतं कार्यं न कृतं राजशासनम्।
हरीणामियमज्ञाता विपत्तिः सहसाऽऽगता॥ **4.56.8**॥ 2150

वैदेह्याः प्रियकामेन कृतं कर्म जटायुषा।
गृध्रराजेन यत् तत्र श्रुतं वस्तदशेषतः॥ **4.56.9**॥ 2151

तथा सर्वाणि भूतानि तिर्यग्योनिगतान्यपि।
प्रियं कुर्वन्ति रामस्य त्यक्त्वा प्राणान् यथा वयम्॥ **4.56.10**॥ 2152

अन्योन्यमुपकुर्वन्ति स्नेहकारुण्ययन्त्रिताः।
ततस्तस्योपकारार्थं त्यजतात्मानमात्मना॥ **4.56.11**॥ 2153

प्रियं कृतं हि रामस्य धर्मज्ञेन जटायुषा।
राघवार्थे परिश्रान्ता वयं सन्त्यक्तजीविताः॥ **4.56.12**॥ 2154

कान्ताराणि प्रपन्नाः स्म न च पश्याम मैथिलीम्।
स सुखी गृध्रराजस्तु रावणेन हतो रणे।
मुक्तश्च सुग्रीवभयाद् गतश्च परमां गतिम्॥ **4.56.13**॥ 2155

जटायुषो विनाशेन राज्ञो दशरथस्य च।
हरणेन च वैदेह्याः संशयं हरयो गताः॥ **4.56.14**॥ 2156

रामलक्ष्मणयोर्वासमरण्ये सह सीतया।
राघवस्य च बाणेन वालिनश्च तथा वधः॥ **4.56.15**॥ 2157

रामकोपादशेषाणां रक्षसां च तथा वधम्।
कैकेय्या वरदानेन इदं च विकृतं कृतम्॥ **4.56.16**॥ 2158

तदसुखमनुकीर्तितं वचो
भुवि पतितांश्च निरीक्ष्य वानरान्।

भृशचकितमतिर्महामतिः
कृपणमुदाहृतवान् स गृध्रराट्॥ **4.56.17**॥ 2159

तत् तु श्रुत्वा तथा वाक्यमङ्गदस्य मुखोद्गतम्।
अब्रवीद् वचनं गृध्रस्तीक्ष्णतुण्डो महास्वनः॥ **4.56.18**॥ 2160

कोऽयं गिरा घोषयति प्राणैः प्रियतरस्य मे।
जटायुषो वधं भ्रातुः कम्पयन्निव मे मनः॥ **4.56.19**॥ 2161

कथमासीजनस्थाने युद्धं राक्षसगृध्रयोः।
नामधेयमिदं भ्रातुश्चिरस्याद्य मया श्रुतम्॥ **4.56.20**॥ 2162

इच्छेयं गिरिदुर्गाच्च भवद्भिरवतारितुम्।
यवीयसो गुणज्ञस्य श्लाघनीयस्य विक्रमैः॥ **4.56.21**॥ 2163

अतिदीर्घस्य कालस्य परितुष्टोऽस्मि कीर्तनात्।
तदिच्छेयमहं श्रोतुं विनाशं वानरर्षभाः॥ **4.56.22**॥ 2164

भ्रातुर्जटायुषस्तस्य जनस्थाननिवासिनः।
तस्यैव च मम भ्रातुः सखा दशरथः कथम्॥ **4.56.23**॥ 2165

यस्य रामः प्रियः पुत्रो ज्येष्ठो गुरुजनप्रियः।
सूर्यांशुदग्धपक्षत्वान्न शक्नोमि विसर्पितुम्।
इच्छेयं पर्वतादस्मादवतर्तुमरिन्दमाः॥ **4.56.24**॥ 2166

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
किष्किन्धाकाण्डे षट्पञ्चाशः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ सप्तपञ्चाशः सर्गः ॥

सम्पातिं पर्वतशिखरादवतार्याङ्गदेन तं प्रति जटायुर्वधवृत्तान्तस्य निवेदनं रामसुग्रीवयोर्मैत्रीं वालिनो वधं च निशाम्य स्वप्रायोपवेशनस्य यत्कारणं तस्य वर्णनम्

शोकाद् भ्रष्टस्वरमपि श्रुत्वा वानरयूथपाः।
श्रद्दधुर्नैव तद्वाक्यं कर्मणा तस्य शङ्किताः॥ **4.57.1** ॥ 2167

ते प्रायमुपविष्टास्तु दृष्ट्वा गृध्रं प्लवङ्गमाः।
चक्रुर्बुद्धिं तदा रौद्रां सर्वान् नो भक्षयिष्यति॥ **4.57.2** ॥ 2168

सर्वथा प्रायमासीनान् यदि नो भक्षयिष्यति।
कृतकृत्या भविष्यामः क्षिप्रं सिद्धिमितो गताः॥ **4.57.3** ॥ 2169

एतां बुद्धिं ततश्चक्रुः सर्वे ते हरियूथपाः।
अवतार्य गिरेः शृङ्गाद् गृध्रमाहाङ्गदस्तदा॥ **4.57.4** ॥ 2170

बभूवर्क्षरजो नाम वानरेन्द्रः प्रतापवान्।
ममार्यः पार्थिवः पक्षिन् धार्मिकौ तस्य चात्मजौ॥ **4.57.5** ॥ 2171

सुग्रीवश्चैव वाली च पुत्रौ घनबलावुभौ।
लोके विश्रुतकर्माभूद् राजा वाली पिता मम॥ **4.57.6** ॥ 2172

राजा कृत्स्नस्य जगत इक्ष्वाकूणां महारथः।
रामो दाशरथिः श्रीमान् प्रविष्टो दण्डकावनम्॥ **4.57.7** ॥ 2173

लक्ष्मणेन सह भ्रात्रा वैदेह्या सह भार्यया।
पितुर्निदेशनिरतो धर्मं पन्थानमाश्रितः॥ **4.57.8**॥ 2174

तस्य भार्या जनस्थानाद् रावणेन हृता बलात्।
रामस्य तु पितुर्मित्रं जटायुर्नाम गृध्रराट्॥ **4.57.9**॥ 2175

ददर्श सीतां वैदेहीं ह्रियमाणां विहायसा।
रावणं विरथं कृत्वा स्थापयित्वा च मैथिलीम्।
परिश्रान्तश्च वृद्धश्च रावणेन हतो रणे॥ **4.57.10**॥ 2176

एवं गृध्रो हतस्तेन रावणेन बलीयसा।
संस्कृतश्चापि रामेण जगाम गतिमुत्तमाम्॥ **4.57.11**॥ 2177

ततो मम पितृव्येण सुग्रीवेण महात्मना।
चकार राघवः सख्यं सोऽवधीत् पितरं मम॥ **4.57.12**॥ 2178

मम पित्रा निरुद्धो हि सुग्रीवः सचिवैः सह।
निहत्य वालिनं रामस्ततस्तमभिषेचयत्॥ **4.57.13**॥ 2179

स राज्ये स्थापितस्तेन सुग्रीवो वानरेश्वरः।
राजा वानरमुख्यानां तेन प्रस्थापिता वयम्॥ **4.57.14**॥ 2180

एवं रामप्रयुक्तास्तु मार्गमाणास्ततस्ततः।
वैदेहीं नाधिगच्छामो रात्रौ सूर्यप्रभामिव॥ **4.57.15**॥ 2181

ते वयं दण्डकारण्यं विचित्य सुसमाहिताः।
अज्ञानात् तु प्रविष्टाः स्म धरण्या विवृतं बिलम्॥ **4.57.16**॥ 2182

मयस्य मायाविहितं तद् बिलं च विचिन्वताम्।
व्यतीतस्तत्र नो मासो यो राज्ञा समयः कृतः॥ **4.57.17**॥ 2183

ते वयं कपिराजस्य सर्वे वचनकारिणः।
कृतां संस्थामतिक्रान्ता भयात् प्रायमुपासिताः॥ **4.57.18**॥ 2184

क्रुद्धे तस्मिंस्तु काकुत्स्थे सुग्रीवे च सलक्ष्मणे।
गतानामपि सर्वेषां तत्र नो नास्ति जीवितम्॥ **4.57.19**॥ 2185

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
किष्किन्धाकाण्डे सप्तपञ्चाशः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ अष्टपञ्चाशः सर्गः ॥

सम्पातिना स्वकीयपक्षदाहवृत्तस्य वर्णनं सीताया रावणस्य च निवासस्थानस्य कथनं वानराणां साहाय्येन समुद्रतटं गत्वा तेन भ्रात्रे जलाञ्जलिदानम्

इत्युक्तः करुणं वाक्यं वानरैस्त्यक्तजीवितैः।
सबाष्पो वानरान् गृध्रः प्रत्युवाच महास्वनः॥ **4.58.1** ॥ 2186

यवीयान् स मम भ्राता जटायुर्नाम वानराः।
यमाख्यात हतं युद्धे रावणेन बलीयसा॥ **4.58.2** ॥ 2187

वृद्धभावादपक्षत्वाच्छृण्वंस्तदपि मर्षये।
नहि मे शक्तिरस्त्यद्य भ्रातुर्वैरविमोक्षणे॥ **4.58.3** ॥ 2188

पुरा वृत्रवधे वृत्ते स चाहं च जयैषिणौ।
आदित्यमुपयातौ स्वो ज्वलन्तं रश्मिमालिनम्॥ **4.58.4** ॥ 2189

आवृत्याकाशमार्गेण जवेन स्वर्गतौ भृशम्।
मध्यं प्राप्ते तु सूर्ये तु जटायुरवसीदति॥ **4.58.5** ॥ 2190

तमहं भ्रातरं दृष्ट्वा सूर्यरश्मिभिरर्दितम्।
पक्षाभ्यां छादयामास स्नेहात् परमविह्वलम्॥ **4.58.6** ॥ 2191

निर्दग्धपत्रः पतितो विन्ध्येऽहं वानरर्षभाः।
अहमस्मिन् वसन् भ्रातुः प्रवृत्तिं नोपलक्षये॥ **4.58.7** ॥ 2192

जटायुषस्त्वेवमुक्तो भ्रात्रा सम्पातिना तदा।
युवराजो महाप्रज्ञः प्रत्युवाचाङ्गदस्तदा॥ **4.58.8**॥ 2193

जटायुषो यदि भ्राता श्रुतं ते गदितं मया।
आख्याहि यदि जानासि निलयं तस्य रक्षसः॥ **4.58.9**॥ 2194

अदीर्घदर्शिनं तं वै रावणं राक्षसाधमम्।
अन्तिके यदि वा दूरे यदि जानासि शंस नः॥ **4.58.10**॥ 2195

ततोऽब्रवीन्महातेजा भ्राता ज्येष्ठो जटायुषः।
आत्मानुरूपं वचनं वानरान् सम्प्रहर्षयन्॥ **4.58.11**॥ 2196

निर्दग्धपक्षो गृध्रोऽहं गतवीर्यः प्लवङ्गमाः।
वाङ्मात्रेण तु रामस्य करिष्ये साह्यमुत्तमम्॥ **4.58.12**॥ 2197

जानामि वारुणान् लोकान् विष्णोस्त्रैविक्रमानपि।
देवासुरविमर्दांश्च ह्यमृतस्य विमन्थनम्॥ **4.58.13**॥ 2198

रामस्य यदिदं कार्यं कर्तव्यं प्रथमं मया।
जरया च हृतं तेजः प्राणाश्च शिथिला मम॥ **4.58.14**॥ 2199

तरुणी रूपसम्पन्ना सर्वाभरणभूषिता।
ह्रियमाणा मया दृष्टा रावणेन दुरात्मना॥ **4.58.15**॥ 2200

क्रोशन्ती रामरामेति लक्ष्मणेति च भामिनी।
भूषणान्यपविध्यन्ती गात्राणि च विधुन्वती॥ **4.58.16**॥ 2201

सूर्यप्रभेव शैलाग्रे तस्याः कौशेयमुत्तमम्।
असिते राक्षसे भाति यथा वा तडिदम्बुदे॥ **4.58.17**॥ 2202

तां तु सीतामहं मन्ये रामस्य परिकीर्तनात्।
श्रूयतां मे कथयतो निलयं तस्य रक्षसः॥ **4.58.18**॥ 2203

पुत्रो विश्रवसः साक्षाद् भ्राता वैश्रवणस्य च।
अध्यास्ते नगरीं लङ्कां रावणो नाम राक्षसः॥ **4.58.19**॥ 2204

इतो द्वीपे समुद्रस्य सम्पूर्णे शतयोजने।
तस्मिन् लङ्का पुरी रम्या निर्मिता विश्वकर्मणा॥ **4.58.20**॥ 2205

जाम्बूनदमयैर्द्वारैश्चित्रैः काञ्चनवेदिकैः।
प्रासादैर्हेमवर्णैश्च महद्भिः सुसमाकृता॥ **4.58.21**॥ 2206

प्राकारेणार्कवर्णेन महता च समन्विता।
तस्यां वसति वैदेही दीना कौशेयवासिनी॥ **4.58.22**॥ 2207

रावणान्तःपुरे रुद्धा राक्षसीभिः सुरक्षिता।
जनकस्यात्मजां राज्ञस्तस्यां द्रक्ष्यथ मैथिलीम्॥ **4.58.23**॥ 2208

लङ्कायामथ गुप्तायां सागरेण समन्ततः।
सम्प्राप्य सागरस्यान्तं सम्पूर्णं शतयोजनम्॥ **4.58.24**॥ 2209

आसाद्य दक्षिणं तीरं ततो द्रक्ष्यथ रावणम्।
तत्रैव त्वरिताः क्षिप्रं विक्रमध्वं प्लवङ्गमाः॥ **4.58.25**॥ 2210

ज्ञानेन खलु पश्यामि दृष्ट्वा प्रत्यागमिष्यथ।
आद्यः पन्थाः कुलिङ्गानां ये चान्ये धान्यजीविनः॥ **4.58.26**॥ 2211

द्वितीयो बलिभोजानां ये च वृक्षफलाशनाः।
भासास्तृतीयं गच्छन्ति क्रौञ्चाश्च कुररैः सह॥ **4.58.27**॥ 2212

श्येनाश्चतुर्थं गच्छन्ति गृध्रा गच्छन्ति पञ्चमम्।
बलवीर्योपपन्नानां रूपयौवनशालिनाम्॥ **4.58.28**॥ 2213

षष्ठस्तु पन्था हंसानां वैनतेयगतिः परा।
वैनतेयाच्च नो जन्म सर्वेषां वानरर्षभाः॥ **4.58.29**॥ 2214

गर्हितं तु कृतं कर्म येन स्म पिशिताशिनः।
प्रतिकार्यं च मे तस्य वैरं भ्रातृकृतं भवेत्॥ **4.58.30**॥ 2215

इहस्थोऽहं प्रपश्यामि रावणं जानकीं तथा।
अस्माकमपि सौपर्णं दिव्यं चक्षुर्बलं तथा॥ **4.58.31**॥ 2216

तस्मादाहारवीर्येण निसर्गेण च वानराः।
आयोजनशतात् साग्राद् वयं पश्याम नित्यशः॥ **4.58.32**॥ 2217

अस्माकं विहिता वृत्तिर्निसर्गेण च दूरतः।
विहिता वृक्षमूले तु वृत्तिश्चरणयोधिनाम्॥ **4.58.33**॥ 2218

उपायो दृश्यतां कश्चिल्लङ्घने लवणाम्भसः।
अभिगम्य तु वैदेहीं समृद्धार्था गमिष्यथ॥ **4.58.34**॥ 2219

समुद्रं नेतुमिच्छामि भवद्भिर्वरुणालयम्।
प्रदास्याम्युदकं भ्रातुः स्वर्गतस्य महात्मनः॥ **4.58.35**॥ 2220

ततो नीत्वा तु तं देशं तीरे नदनदीपतेः।
निर्दग्धपक्षं सम्पातिं वानराः सुमहौजसः॥ **4.58.36**॥ 2221

तं पुनः प्रापयित्वा च तं देशं पतगेश्वरम्।
बभूवुर्वानरा हृष्टाः प्रवृत्तिमुपलभ्य ते॥ **4.58.37**॥ 2222

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
किष्किन्धाकाण्डे अष्टपञ्चाशः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ एकोनषष्टितमः सर्गः ॥

सम्पातिना स्वपुत्रस्य सुपार्श्वस्य मुखतः श्रुतायाः सीतारावणदर्शनसम्बन्धिघटनाया वर्णनम्

ततस्तदमृतास्वादं गृध्रराजेन भाषितम्।
निशम्य वदता हृष्टास्ते वचः प्लवगर्षभाः॥ **4.59.1** ॥ 2223

जाम्बवान् वानरश्रेष्ठः सह सर्वैः प्लवङ्गमैः।
भूतलात् सहसोत्थाय गृध्रराजानमब्रवीत्॥ **4.59.2** ॥ 2224

क्व सीता केन वा दृष्टा को वा हरति मैथिलीम्।
तदाख्यातु भवान् सर्वं गतिर्भव वनौकसाम्॥ **4.59.3** ॥ 2225

को दाशरथिबाणानां वज्रवेगनिपातिनाम्।
स्वयं लक्ष्मणमुक्तानां न चिन्तयति विक्रमम्॥ **4.59.4** ॥ 2226

स हरीन् प्रतिसम्मुक्तान् सीताश्रुतिसमाहितान्।
पुनराश्वासयन् प्रीत इदं वचनमब्रवीत्॥ **4.59.5** ॥ 2227

श्रूयतामिह वैदेह्या यथा मे हरणं श्रुतम्।
येन चापि ममाख्यातं यत्र चायतलोचना॥ **4.59.6** ॥ 2228

अहमस्मिन् गिरौ दुर्गे बहुयोजनमायते।
चिरान्निपतितो वृद्धः क्षीणप्राणपराक्रमः॥ **4.59.7** ॥ 2229

तं मामेवङ्गतं पुत्रः सुपार्श्वो नाम नामतः।
आहारेण यथाकालं बिभर्ति पततां वरः॥ **4.59.8**॥ 2230

तीक्ष्णकामास्तु गन्धर्वास्तीक्ष्णकोपा भुजङ्गमाः।
मृगाणां तु भयं तीक्ष्णं ततस्तीक्ष्णक्षुधा वयम्॥ **4.59.9**॥ 2231

स कदाचित् क्षुधार्तस्य ममाहाराभिकाङ्क्षिणः।
गतसूर्येऽहनि प्राप्तो मम पुत्रो ह्यनामिषः॥ **4.59.10**॥ 2232

स मयाऽऽहारसंरोधात् पीडितः प्रीतिवर्धनः।
अनुमान्य यथातत्त्वमिदं वचनमब्रवीत्॥ **4.59.11**॥ 2233

अहं तात यथाकालमामिषार्थी खमाप्लुतः।
महेन्द्रस्य गिरेर्द्वारमावृत्य सुसमाश्रितः॥ **4.59.12**॥ 2234

तत्र सत्त्वसहस्राणां सागरान्तरचारिणाम्।
पन्थानमेकोऽध्यवसं सन्निरोद्धमवाङ्मुखः॥ **4.59.13**॥ 2235

तत्र कश्चिन्मया दृष्टः सूर्योदयसमप्रभाम्।
स्त्रियमादाय गच्छन् वै भिन्नाञ्जनचयोपमः॥ **4.59.14**॥ 2236

सोऽहमभ्यवहारार्थं तौ दृष्ट्वा कृतनिश्चयः।
तेन साम्ना विनीतेन पन्थानमनुयाचितः॥ **4.59.15**॥ 2237

नहि सामोपपन्नानां प्रहर्ता विद्यते भुवि।
नीचेष्वपि जनः कश्चित् किमङ्ग बत मद्विधः॥ **4.59.16**॥ 2238

स यातस्तेजसा व्योम सङ्क्षिपन्निव वेगितः।
अथाहं खेचरैर्भूतैरभिगम्य सभाजितः॥ **4.59.17**॥ 2239

दिष्ट्या जीवति सीतेति ह्यब्रुवन् मां महर्षयः।
कथञ्चित् सकलत्रोऽसौ गतस्ते स्वस्त्यसंशयम्॥ **4.59.18**॥ 2240

एवमुक्तस्ततोऽहं तैः सिद्धैः परमशोभनैः।
स च मे रावणो राजा रक्षसां प्रतिवेदितः॥ **4.59.19**॥ 2241

पश्यन् दाशरथेर्भार्यां रामस्य जनकात्मजाम्।
भ्रष्टाभरणकौशेयां शोकवेगपराजिताम्॥ **4.59.20**॥ 2242

रामलक्ष्मणयोर्नाम क्रोशन्तीं मुक्तमूर्धजाम्।
एष कालात्ययस्तात इति वाक्यविदां वरः॥ **4.59.21**॥ 2243

एतदर्थं समग्रं मे सुपार्श्वः प्रत्यवेदयत्।
तच्छ्रुत्वापि हि मे बुद्धिर्नासीत् काचित् पराक्रमे॥ **4.59.22**॥ 2244

अपक्षो हि कथं पक्षी कर्म किञ्चित् समारभेत्।
यत् तु शक्यं मया कर्तुं वाग्बुद्धिगुणवर्तिना॥ **4.59.23**॥ 2245

श्रूयतां तत्र वक्ष्यामि भवतां पौरुषाश्रयम्।
वाङ्मतिभ्यां हि सर्वेषां करिष्यामि प्रियं हि वः॥ **4.59.24**॥ 2246

यद्धि दाशरथेः कार्यं मम तन्नात्र संशयः।
तद् भवन्तो मतिश्रेष्ठा बलवन्तो मनस्विनः॥ **4.59.25**॥ 2247

प्रहिताः कपिराजेन देवैरपि दुरासदाः।
रामलक्ष्मणबाणाश्च विहिताः कङ्कपत्रिणः॥ **4.59.26**॥ 2248

त्रयाणामपि लोकानां पर्याप्तास्त्राणनिग्रहे।
कामं खलु दशग्रीवस्तेजोबलसमन्वितः।
भवतां तु समर्थानां न किञ्चिदपि दुष्करम्॥ **4.59.27**॥ 2249

तदलं कालसङ्क्षेन क्रियतां बुद्धिनिश्चयः।
नहि कर्मसु सज्जन्ते बुद्धिमन्तो भवद्विधाः॥ **4.59.28**॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
किष्किन्धाकाण्डे एकोनषष्टितमः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ षष्टितमः सर्गः ॥

सम्पातेरात्मकथा

ततः कृतोदकं स्नातं तं गृध्रं हरियूथपाः।
उपविष्टा गिरौ रम्ये परिवार्य समन्ततः॥ **4.60.1** ॥ 2251

तमङ्गदमुपासीनं तैः सर्वैर्हरिभिर्वृतम्।
जनितप्रत्ययो हर्षात् सम्पातिः पुनरब्रवीत्॥ **4.60.2** ॥ 2252

कृत्वा निःशब्दमेकाग्राः शृण्वन्तु हरयो मम।
तथ्यं सङ्कीर्तयिष्यामि यथा जानामि मैथिलीम्॥ **4.60.3** ॥ 2253

अस्य विन्ध्यस्य शिखरे पतितोऽस्मि पुरानघ।
सूर्यतापपरीताङ्गो निर्दग्धः सूर्यरश्मिभिः॥ **4.60.4** ॥ 2254

लब्धसंज्ञस्तु षड्रात्राद् विवशो विह्वलन्निव।
वीक्षमाणो दिशः सर्वा नाभिजानामि किञ्चन॥ **4.60.5** ॥ 2255

ततस्तु सागराञ्शैलान् नदीः सर्वाः सरांसि च।
वनानि च प्रदेशांश्च निरीक्ष्य मतिरागता॥ **4.60.6** ॥ 2256

हृष्टपक्षिगणाकीर्णः कन्दरोदरकूटवान्।
दक्षिणस्योदधेस्तीरे विन्ध्योऽयमिति निश्चितः॥ **4.60.7** ॥ 2257

आसीच्चात्राश्रमं पुण्यं सुरैरपि सुपूजितम्।
ऋषिर्निशाकरो नाम यस्मिन्नुग्रतपाऽभवत्॥ **4.60.8**॥ 2258

अष्टौ वर्षसहस्राणि तेनास्मिन्नृषिणा गिरौ।
वसतो मम धर्मज्ञे स्वर्गते तु निशाकरे॥ **4.60.9**॥ 2259

अवतीर्य च विन्ध्याग्रात् कृच्छ्रेण विषमाच्छनैः।
तीक्ष्णदर्भां वसुमतीं दुःखेन पुनरागतः॥ **4.60.10**॥ 2260

तमृषिं द्रष्टुकामोऽस्मि दुःखेनाभ्यागतो भृशम्।
जटायुषा मया चैव बहुशोऽधिगतो हि सः॥ **4.60.11**॥ 2261

तस्याश्रमपदाभ्याशे ववुर्वाताः सुगन्धिनः।
वृक्षो नापुष्पितः कश्चिदफलो वा न दृश्यते॥ **4.60.12**॥ 2262

उपेत्य चाश्रमं पुण्यं वृक्षमूलमुपाश्रितः।
द्रष्टुकामः प्रतीक्षे च भगवन्तं निशाकरम्॥ **4.60.13**॥ 2263

अथ पश्यामि दूरस्थमृषिं ज्वलिततेजसम्।
कृताभिषेकं दुर्धर्षमुपावृत्तमुदङ्मुखम्॥ **4.60.14**॥ 2264

तमृक्षाः सृमरा व्याघ्राः सिंहा नानासरीसृपाः।
परिवार्योपगच्छन्ति दातारं प्राणिनो यथा॥ **4.60.15**॥ 2265

ततः प्राप्तमृषिं ज्ञात्वा तानि सत्त्वानि वै ययुः।
प्रविष्टे राजनि यथा सर्वं सामात्यकं बलम्॥ **4.60.16**॥ 2266

ऋषिस्तु दृष्ट्वा मां तुष्टः प्रविष्टश्चाश्रमं पुनः।
मुहूर्तमात्रान्निर्गम्य ततः कार्यमपृच्छत॥ **4.60.17**॥ 2267

सौम्य वैकल्यतां दृष्ट्वा रोम्णां ते नावगम्यते।
अग्निदग्धाविमौ पक्षौ प्राणाश्चापि शरीरके॥ **4.60.18**॥ 2268

गृध्रौ द्वौ दृष्टपूर्वौ मे मातरिश्वसमौ जवे।
गृध्राणां चैव राजानौ भ्रातरौ कामरूपिणौ॥ **4.60.19**॥ 2269

ज्येष्ठोऽवितस्त्वं सम्पाते जटायुरनुजस्तव।
मानुषं रूपमास्थाय गृह्णीतां चरणौ मम॥ **4.60.20**॥ 2270

किं ते व्याधिसमुत्थानं पक्षयोः पतनं कथम्।
दण्डो वायं धृतः केन सर्वमाख्याहि पृच्छतः॥ **4.60.21**॥ 2271

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
किष्किन्धाकाण्डे षष्टितमः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ एकषष्टितमः सर्गः ॥

सम्पातिना निशाकरमुनिं प्रति स्वपुङ्खदाहकारणस्य वर्णनम्

ततस्तद् दारुणं कर्म दुष्करं सहसा कृतम्।
आचचक्षे मुनेः सर्वं सूर्यानुगमनं तथा ॥ **4.61.1** ॥ 2272

भगवन् व्रणयुक्तत्वाल्लज्जया चाकुलेन्द्रियः।
परिश्रान्तो न शक्नोमि वचनं परिभाषितुम् ॥ **4.61.2** ॥ 2273

अहं चैव जटायुश्च सङ्घर्षाद् गर्वमोहितौ।
आकाशं पतितौ दूराज्जिज्ञासन्तौ पराक्रमम् ॥ **4.61.3** ॥ 2274

कैलासशिखरे बद्ध्वा मुनीनामग्रतः पणम्।
रविः स्यादनुयातव्यो यावदस्तं महागिरिम् ॥ **4.61.4** ॥ 2275

अप्यावां युगपत् प्राप्तावपश्याव महीतले।
रथचक्रप्रमाणानि नगराणि पृथक् पृथक् ॥ **4.61.5** ॥ 2276

क्वचिद् वादित्रघोषश्च क्वचिद् भूषणनिःस्वनः।
गायन्तीः स्माङ्गना बह्वीः पश्यावो रक्तवाससः ॥ **4.61.6** ॥ 2277

तूर्णमुत्पत्य चाकाशमादित्यपदमास्थितौ।
आवामालोकयावस्तद् वनं शाद्वलसंस्थितम् ॥ **4.61.7** ॥ 2278

उपलैरिव सञ्छन्ना दृश्यते भूः शिलोच्चयैः।
आपगाभिश्च संवीता सूत्रैरिव वसुन्धरा॥ **4.61.8**॥ 2279

हिमवांश्चैव विन्ध्यश्च मेरुश्च सुमहागिरिः।
भूतले सम्प्रकाशन्ते नागा इव जलाशये॥ **4.61.9**॥ 2280

तीव्रः स्वेदश्च खेदश्च भयं चासीत् तदावयोः।
समाविशत मोहश्च ततो मूर्च्छा च दारुणा॥ **4.61.10**॥ 2281

न च दिग् ज्ञायते याम्या न चाग्नेयी न वारुणी।
युगान्ते नियतो लोको हतो दग्ध इवाग्निना॥ **4.61.11**॥ 2282

मनश्च मे हतं भूयश्चक्षुः प्राप्य तु संश्रयम्।
यत्नेन महता ह्यस्मिन् मनः सन्धाय चक्षुषी॥ **4.61.12**॥ 2283

यत्नेन महता भूयो भास्करः प्रतिलोकितः।
तुल्यपृथ्वीप्रमाणेन भास्करः प्रतिभाति नौ॥ **4.61.13**॥ 2284

जटायुर्मामनापृच्छ्य निपपात महीं ततः।
तं दृष्ट्वा तूर्णमाकाशादात्मानं मुक्तवानहम्॥ **4.61.14**॥ 2285

पक्षाभ्यां च मया गुप्तो जटायुर्न प्रदह्यत।
प्रमादात् तत्र निर्दग्धः पतन् वायुपथादहम्॥ **4.61.15**॥ 2286

आशङ्के तं निपतितं जनस्थाने जटायुषम्।
अहं तु पतितो विन्ध्ये दग्धपक्षो जडीकृतः॥ **4.61.16**॥ 2287

राज्याच्च हीनो भ्रात्रा च पक्षाभ्यां विक्रमेण च।
सर्वथा मर्तुमेवेच्छन् पतिष्ये शिखराद् गिरेः॥ **4.61.17**॥ 2288

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये किष्किन्धाकाण्डे एकषष्टितमः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ द्विषष्टितमः सर्गः ॥

सम्पातिं सान्त्वयता निशाकरेण भाविश्रीरामकार्ये साहाय्यकरणाय जीवनं धारयितुं तं प्रत्यादेशदानम्

एवमुक्त्वा मुनिश्रेष्ठमरुदं भृशदुःखितः।
अथ ध्यात्वा मुहूर्तं च भगवानिदमब्रवीत्॥ **4.62.1**॥ 2289

पक्षौ च ते प्रपक्षौ च पुनरन्यौ भविष्यतः।
चक्षुषी चैव प्राणाश्च विक्रमश्च बलं च ते॥ **4.62.2**॥ 2290

पुराणे सुमहत्कार्यं भविष्यं हि मया श्रुतम्।
दृष्टं मे तपसा चैव श्रुत्वा च विदितं मम॥ **4.62.3**॥ 2291

राजा दशरथो नाम कश्चिदिक्ष्वाकुवर्धनः।
तस्य पुत्रो महातेजा रामो नाम भविष्यति॥ **4.62.4**॥ 2292

अरण्यं च सह भ्रात्रा लक्ष्मणेन गमिष्यति।
तस्मिन्नर्थे नियुक्तः सन् पित्रा सत्यपराक्रमः॥ **4.62.5**॥ 2293

नैर्ऋतो रावणो नाम तस्य भार्यां हरिष्यति।
राक्षसेन्द्रो जनस्थाने अवध्यः सुरदानवैः॥ **4.62.6**॥ 2294

सा च कामैः प्रलोभ्यन्ती भक्ष्यैर्भोज्यैश्च मैथिली।
न भोक्ष्यति महाभागा दुःखमग्ना यशस्विनी॥ **4.62.7**॥ 2295

परमान्नं च वैदेह्या ज्ञात्वा दास्यति वासवः।
यदन्नममृतप्रख्यं सुराणामपि दुर्लभम्॥ **4.62.8**॥ 2296

तदन्नं मैथिली प्राप्य विज्ञायेन्द्रादिदं त्विति।
अग्रमुद्धृत्य रामाय भूतले निर्वपिष्यति॥ **4.62.9**॥ 2297

यदि जीवति मे भर्ता लक्ष्मणो वापि देवरः।
देवत्वं गच्छतोर्वापि तयोरन्नमिदं त्विति॥ **4.62.10**॥ 2298

एष्यन्ति प्रेषितास्तत्र रामदूताः प्लवङ्गमाः।
आख्येया राममहिषी त्वया तेभ्यो विहङ्गम॥ **4.62.11**॥ 2299

सर्वथा तु न गन्तव्यमीदृशः क्व गमिष्यसि।
देशकालौ प्रतीक्षस्व पक्षौ त्वं प्रतिपत्स्यसे॥ **4.62.12**॥ 2300

उत्सहेयमहं कर्तुमद्यैव त्वां सपक्षकम्।
इहस्थस्त्वं हि लोकानां हितं कार्यं करिष्यसि॥ **4.62.13**॥ 2301

त्वयापि खलु तत् कार्यं तयोश्च नृपपुत्रयोः।
ब्राह्मणानां गुरूणां च मुनीनां वासवस्य च॥ **4.62.14**॥ 2302

इच्छाम्यहमपि द्रष्टुं भ्रातरौ रामलक्ष्मणौ।
नेच्छे चिरं धारयितुं प्राणांस्त्यक्ष्ये कलेवरम्।
महर्षिस्त्वब्रवीदेवं दृष्टतत्त्वार्थदर्शनः॥ **4.62.15**॥ 2303

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
किष्किन्धाकाण्डे द्विषष्टितमः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ त्रिषष्टितमः सर्गः ॥

सम्पातेर्नवपुङ्खोद्गमस्तस्य वानराणां प्रोत्साहनं कृत्वा तत उड्डयनं वानराणां ततो दक्षिणस्यां प्रस्थानं च

एतैरन्यैश्च बहुभिर्वाक्यैर्वाक्यविशारदः।
मां प्रशस्याभ्यनुज्ञाप्य प्रविष्टः स स्वमालयम्॥ **4.63.1** ॥ 2304

कन्दरात् तु विसर्पित्वा पर्वतस्य शनैः शनैः।
अहं विन्ध्यं समारुह्य भवतः प्रतिपालये॥ **4.63.2** ॥ 2305

अद्य त्वेतस्य कालस्य वर्षं साग्रशतं गतम्।
देशकालप्रतीक्षोऽस्मि हृदि कृत्वा मुनेर्वचः॥ **4.63.3** ॥ 2306

महाप्रस्थानमासाद्य स्वर्गते तु निशाकरे।
मां निर्दहति सन्तापो वितर्कैर्बहुभिर्वृतम्॥ **4.63.4** ॥ 2307

उदितां मरणे बुद्धिं मुनिवाक्यैर्निवर्तये।
बुद्धिर्या तेन मे दत्ता प्राणानां रक्षणे मम॥ **4.63.5** ॥ 2308

सा मेऽपनयते दुःखं दीप्तेवाग्निशिखा तमः।
बुध्यता च मया वीर्यं रावणस्य दुरात्मनः॥ **4.63.6** ॥ 2309

पुत्रः सन्तर्जितो वाग्भिर्न त्राता मैथिली कथम्।
तस्या विलपितं श्रुत्वा तौ च सीतावियोजितौ॥ **4.63.7** ॥ 2310

न मे दशरथस्नेहात् पुत्रेणोत्पादितं प्रियम्।
तस्य त्वेवं ब्रुवाणस्य संहतैर्वानरैः सह॥ **4.63.8**॥ 2311

उत्पेततुस्तदा पक्षौ समक्षं वनचारिणाम्।
स दृष्ट्वा स्वां तनुं पक्षैरुद्गतैररुणच्छदैः॥ **4.63.9**॥ 2312

प्रहर्षमतुलं लेभे वानरांश्चेदमब्रवीत्।
निशाकरस्य राजर्षेः प्रसादादमितौजसः॥ **4.63.10**॥ 2313

आदित्यरश्मिनिर्दग्धौ पक्षौ पुनरुपस्थितौ।
यौवने वर्तमानस्य ममासीद् यः पराक्रमः॥ **4.63.11**॥ 2314

तमेवाद्यावगच्छामि बलं पौरुषमेव च।
सर्वथा क्रियतां यत्नः सीतामधिगमिष्यथ॥ **4.63.12**॥ 2315

पक्षलाभो ममायं वः सिद्धिप्रत्ययकारकः।
इत्युक्त्वा तान् हरीन् सर्वान् सम्पातिः पतगोत्तमः॥ **4.63.13**॥ 2316

उत्पपात गिरेः शृङ्गाज्जिज्ञासुः खगमो गतिम्।
तस्य तद् वचनं श्रुत्वा प्रतिसंहृष्टमानसाः।
बभूवुर्हरिशार्दूला विक्रमाभ्युदयोन्मुखाः॥ **4.63.14**॥ 2317

अथ पवनसमानविक्रमाः
प्लवगवराः प्रतिलब्धपौरुषाः।
अभिजिदभिमुखां दिशं ययु -
र्जनकसुतापरिमार्गणोन्मुखाः॥ **4.63.15**॥ 2318

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
किष्किन्धाकाण्डे त्रिषष्टितमः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ चतुःषष्टितमः सर्गः ॥

समुद्रस्य विशालतामालोक्य विषीदतो वानरान् सान्त्वयित्वाङ्गदस्य तान् प्रति पृथक् पृथक् समुद्रलङ्घनशक्तिविषयकः प्रश्नः

आख्याता गृध्रराजेन समुत्प्लुत्य प्लवङ्गमाः।
सङ्गताः प्रीतिसंयुक्ता विनेदुः सिंहविक्रमाः॥ **4.64.1** ॥ 2319

सम्पातेर्वचनं श्रुत्वा हरयो रावणक्षयम्।
हृष्टाः सागरमाजग्मुः सीतादर्शनकाङ्क्षिणः॥ **4.64.2** ॥ 2320

अभिगम्य तु तं देशं ददृशुर्भीमविक्रमाः।
कृत्स्नं लोकस्य महतः प्रतिबिम्बमवस्थितम्॥ **4.64.3** ॥ 2321

दक्षिणस्य समुद्रस्य समासाद्योत्तरां दिशम्।
सन्निवेशं ततश्चक्रुर्हरिवीरा महाबलाः॥ **4.64.4** ॥ 2322

प्रसुप्तमिव चान्यत्र क्रीडन्तमिव चान्यतः।
क्वचित् पर्वतमात्रैश्च जलराशिभिरावृतम्॥ **4.64.5** ॥ 2323

सङ्कुलं दानवेन्द्रश्च पातालतलवासिभिः।
रोमहर्षकरं दृष्ट्वा विषेदुः कपिकुञ्जराः॥ **4.64.6** ॥ 2324

आकाशमिव दुष्पारं सागरं प्रेक्ष्य वानराः।
विषेदुः सहिताः सर्वे कथं कार्यमिति ब्रुवन्॥ **4.64.7** ॥ 2325

विषण्णां वाहिनीं दृष्ट्वा सागरस्य निरीक्षणात्।
आश्वासयामास हरीन् भयार्तान् हरिसत्तमः॥ **4.64.8**॥ 2326

न विषादे मनः कार्यं विषादो दोषवत्तरः।
विषादो हन्ति पुरुषं बालं क्रुद्ध इवोरगः॥ **4.64.9**॥ 2327

यो विषादं प्रसहते विक्रमे समुपस्थिते।
तेजसा तस्य हीनस्य पुरुषार्थो न सिद्ध्यति॥ **4.64.10**॥ 2328

तस्यां रात्र्यां व्यतीतायामङ्गदो वानरैः सह।
हरिवृद्धैः समागम्य पुनर्मन्त्रममन्त्रयत्॥ **4.64.11**॥ 2329

सा वानराणां ध्वजिनी परिवार्याङ्गदं बभौ।
वासवं परिवार्येव मरुतां वाहिनी स्थिता॥ **4.64.12**॥ 2330

कोऽन्यस्तां वानरीं सेनां शक्तः स्तम्भयितुं भवेत्।
अन्यत्र वालितनयादन्यत्र च हनूमतः॥ **4.64.13**॥ 2331

ततस्तान् हरिवृद्धांश्च तच्च सैन्यमरिन्दमः।
अनुमान्याङ्गदः श्रीमान् वाक्यमर्थवदब्रवीत्॥ **4.64.14**॥ 2332

क इदानीं महातेजा लङ्घयिष्यति सागरम्।
कः करिष्यति सुग्रीवं सत्यसन्धमरिंदमम्॥ **4.64.15**॥ 2333

को वीरो योजनशतं लङ्घयेत प्लवङ्गमः।
इमांश्च यूथपान् सर्वान् मोचयेत् को महाभयात्॥ **4.64.16**॥ 2334

कस्य प्रसादाद् दारांश्च पुत्रांश्चैव गृहाणि च।
इतो निवृत्ताः पश्येम सिद्धार्थाः सुखिनो वयम्॥ **4.64.17**॥ 2335

कस्य प्रसादाद् रामं च लक्ष्मणं च महाबलम्।
अभिगच्छेम संहृष्टाः सुग्रीवं च वनौकसम्॥ **4.64.18**॥ 2336

यदि कश्चित् समर्थो वः सागरप्लवने हरिः।
स ददात्विह नः शीघ्रं पुण्यामभयदक्षिणाम्॥ **4.64.19**॥ 2337

अङ्गदस्य वचः श्रुत्वा न कश्चित् किञ्चिदब्रवीत्।
स्तिमितेवाभवत् सर्वा सा तत्र हरिवाहिनी॥ **4.64.20**॥ 2338

पुनरेवाङ्गदः प्राह तान् हरीन् हरिसत्तमः।
सर्वे बलवतां श्रेष्ठा भवन्तो दृढविक्रमाः।
व्यपदेशकुले जाताः पूजिताश्चाप्यभीक्ष्णशः॥ **4.64.21**॥ 2339

नहि वो गमने सङ्गः कदाचित् कस्यचिद् भवेत्।
ब्रुवध्वं यस्य या शक्तिः प्लवने प्लवगर्षभाः॥ **4.64.22**॥ 2340

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
किष्किन्धाकाण्डे चतुःषष्टितमः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ पञ्चषष्टितमः सर्गः ॥

पर्यायेण वानरैः स्वस्वदूरगमनशक्तिपरिमाणस्य प्रतिपादनं जाम्बवदङ्गदयोः संलापो जाम्बवतो हनुमन्तं प्रेरयितुं तत्पार्श्वे गमनम्

अथाङ्गदवचः श्रुत्वा ते सर्वे वानरर्षभाः।
स्वं स्वं गतौ समुत्साहमूचुस्तत्र यथाक्रमम्॥ **4.65.1** ॥ 2341

गजो गवाक्षो गवयः शरभो गन्धमादनः।
मैन्दश्च द्विविदश्चैव सुषेणो जाम्बवांस्तथा॥ **4.65.2** ॥ 2342

आबभाषे गजस्तत्र प्लवेयं दशयोजनम्।
गवाक्षो योजनान्याह गमिष्यामीति विंशतिम्॥ **4.65.3** ॥ 2343

शरभो वानरस्तत्र वानरांस्तानुवाच ह।
त्रिंशतं तु गमिष्यामि योजनानां प्लवङ्गमाः॥ **4.65.4** ॥ 2344

ऋषभो वानरस्तत्र वानरांस्तानुवाच ह।
चत्वारिंशद् गमिष्यामि योजनानां न संशयः॥ **4.65.5** ॥ 2345

वानरांस्तु महातेजा अब्रवीद् गन्धमादनः।
योजनानां गमिष्यामि पञ्चाशत्तु न संशयः॥ **4.65.6** ॥ 2346

मैन्दस्तु वानरस्तत्र वानरांस्तानुवाच ह।
योजनानां परं षष्टिमहं प्लवितुमुत्सहे॥ **4.65.7** ॥ 2347

ततस्तत्र महातेजा द्विविदः प्रत्यभाषत।
गमिष्यामि न सन्देहः सप्ततिं योजनान्यहम्॥ **4.65.8**॥ 2348

सुषेणस्तु महातेजाः सत्त्ववान् कपिसत्तमः।
अशीतिं प्रतिजानेऽहं योजनानां पराक्रमे॥ **4.65.9**॥ 2349

तेषां कथयतां तत्र सर्वांस्ताननुमान्य च।
ततो वृद्धतमस्तेषां जाम्बवान् प्रत्यभाषत॥ **4.65.10**॥ 2350

पूर्वमस्माकमप्यासीत् कश्चिद् गतिपराक्रमः।
ते वयं वयसः पारमनुप्राप्ताः स्म साम्प्रतम्॥ **4.65.11**॥ 2351

किं तु नैवं गते शक्यमिदं कार्यमुपेक्षितुम्।
यदर्थं कपिराजश्च रामश्च कृतनिश्चयौ॥ **4.65.12**॥ 2352

साम्प्रतं कालमस्माकं या गतिस्तां निबोधत।
नवतिं योजनानां तु गमिष्यामि न संशयः॥ **4.65.13**॥ 2353

तांश्च सर्वान् हरिश्रेष्ठाञ्जाम्बवानिदमब्रवीत्।
न खल्वेतावदेवासीद् गमने मे पराक्रमः॥ **4.65.14**॥ 2354

मया वैरोचने यज्ञे प्रभविष्णुः सनातनः।
प्रदक्षिणीकृतः पूर्वं क्रममाणस्त्रिविक्रमम्॥ **4.65.15**॥ 2355

स इदानीमहं वृद्धः प्लवने मन्दविक्रमः।
यौवने च तदासीन्मे बलमप्रतिमं परम्॥ **4.65.16**॥ 2356

सम्प्रत्येतावदेवाद्य शक्यं मे गमने स्वतः।
नैतावता च संसिद्धिः कार्यस्यास्य भविष्यति॥ **4.65.17**॥ 2357

अथोत्तरमुदारार्थमब्रवीदङ्गदस्तदा।
अनुमान्य तदा प्राज्ञो जाम्बवन्तं महाकपिः॥ **4.65.18**॥ 2358

अहमेतद् गमिष्यामि योजनानां शतं महत्।
निवर्तने तु मे शक्तिः स्यान्न वेति न निश्चितम्॥ **4.65.19**॥ 2359

तमुवाच हरिश्रेष्ठं जाम्बवान् वाक्यकोविदः।
ज्ञायते गमने शक्तिस्तव हर्यृक्षसत्तम॥ **4.65.20**॥ 2360

कामं शतसहस्रं वा नह्येष विधिरुच्यते।
योजनानां भवाञ्शक्तो गन्तुं प्रतिनिवर्तितुम्॥ **4.65.21**॥ 2361

नहि प्रेषयिता तात स्वामी प्रेष्यः कथञ्चन।
भवतायं जनः सर्वः प्रेष्यः प्लवगसत्तम॥ **4.65.22**॥ 2362

भवान् कलत्रमस्माकं स्वामिभावे व्यवस्थितः।
स्वामी कलत्रं सैन्यस्य गतिरेषा परन्तप॥ **4.65.23**॥ 2363

अपि वै तस्य कार्यस्य भवान् मूलमरिन्दम।
तस्मात् कलत्रवत् तात प्रतिपाल्यः सदा भवान्॥ **4.65.24**॥ 2364

मूलमर्थस्य संरक्ष्यमेष कार्यविदां नयः।
मूले हि सति सिध्यन्ति गुणाः सर्वे फलोदयाः॥ **4.65.25**॥ 2365

तद् भवानस्य कार्यस्य साधनं सत्यविक्रम।
बुद्धिविक्रमसम्पन्नो हेतुरत्र परन्तप॥ **4.65.26**॥ 2366

गुरुश्च गुरुपुत्रश्च त्वं हि नः कपिसत्तम।
भवन्तमाश्रित्य वयं समर्था ह्यर्थसाधने॥ **4.65.27**॥ 2367

उक्तवाक्यं महाप्राज्ञं जाम्बवन्तं महाकपिः।
प्रत्युवाचोत्तरं वाक्यं वालिसूनुरथाङ्गदः॥ **4.65.28**॥ 2368

यदि नाहं गमिष्यामि नान्यो वानरपुङ्गवः।
पुनः खल्विदमस्माभिः कार्यं प्रायोपवेशनम्॥ **4.65.29**॥ 2369

नह्यकृत्वा हरिपतेः सन्देशं तस्य धीमतः।
तत्रापि गत्वा प्राणानां न पश्ये परिरक्षणम्॥ **4.65.30**॥ 2370

स हि प्रसादे चात्यर्थकोपे च हरिरीश्वरः।
अतीत्य तस्य सन्देशं विनाशो गमने भवेत्॥ **4.65.31**॥ 2371

तत्तथा ह्यस्य कार्यस्य न भवत्यन्यथा गतिः।
तद् भवानेव दृष्टार्थः सञ्चिन्तयितुमर्हति॥ **4.65.32**॥ 2372

सोऽङ्गदेन तदा वीरः प्रत्युक्तः प्लवगर्षभः।
जाम्बवानुत्तमं वाक्यं प्रोवाचेदं ततोऽङ्गदम्॥ **4.65.33**॥ 2373

तस्य ते वीर कार्यस्य न किञ्चित् परिहास्यते।
एष सञ्चोदयाम्येनं यः कार्यं साधयिष्यति॥ **4.65.34**॥ 2374

ततः प्रतीतं प्लवतां वरिष्ठ -
मेकान्तमाश्रित्य सुखोपविष्टम्।
सञ्चोदयामास हरिप्रवीरो
हरिप्रवीरं हनुमन्तमेव॥ **4.65.35**॥ 2375

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
किष्किन्धाकाण्डे पञ्चषष्टितमः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ षट्षष्टितमः सर्गः ॥

हनुमदुत्पत्तिकथां श्रावयित्वा जाम्बवता समुद्रलङ्घनाय तस्य प्रोत्साहनम्

अनेकशतसाहस्रीं विषण्णां हरिवाहिनीम्।
जाम्बवान् समुदीक्ष्यैवं हनूमन्तमथाब्रवीत्॥ **4.66.1** ॥ 2376

वीर वानरलोकस्य सर्वशास्त्रविदां वर।
तूष्णीमेकान्तमाश्रित्य हनूमन् किं न जल्पसि॥ **4.66.2** ॥ 2377

हनूमन्हरिराजस्य सुग्रीवस्य समो ह्यसि।
रामलक्ष्मणयोश्चापि तेजसा च बलेन च॥ **4.66.3** ॥ 2378

अरिष्टनेमिनः पुत्रो वैनतेयो महाबलः।
गरुत्मानिव विख्यात उत्तमः सर्वपक्षिणाम्॥ **4.66.4** ॥ 2379

बहुशो हि मया दृष्टः सागरे स महाबलः।
भुजङ्गानुद्धरन् पक्षी महाबाहुर्महाबलः॥ **4.66.5** ॥ 2380

पक्षयोर्यद् बलं तस्य भुजवीर्यबलं तव।
विक्रमश्चापि वेगश्च न ते तेनापहीयते॥ **4.66.6** ॥ 2381

बलं बुद्धिश्च तेजश्च सत्त्वं च हरिपुङ्गव।
विशिष्टं सर्वभूतेषु किमात्मानं न सज्जसे॥ **4.66.7** ॥ 2382

अप्सराऽप्सरसां श्रेष्ठा विख्याता पुञ्जिकस्थला।
अञ्जनेति परिख्याता पत्नी केसरिणो हरेः॥ **4.66.8**॥ 2383

विख्याता त्रिषु लोकेषु रूपेणाप्रतिमा भुवि।
अभिशापादभूत् तात कपित्वे कामरूपिणी॥ **4.66.9**॥ 2384

दुहिता वानरेन्द्रस्य कुञ्जरस्य महात्मनः।
मानुषं विग्रहं कृत्वा रूपयौवनशालिनी॥ **4.66.10**॥ 2385

विचित्रमाल्याभरणा कदाचित् क्षौमधारिणी।
अचरत् पर्वतस्याग्रे प्रावृडम्बुदसन्निभे॥ **4.66.11**॥ 2386

तस्या वस्त्रं विशालाक्ष्याः पीतं रक्तदशं शुभम्।
स्थितायाः पर्वतस्याग्रे मारुतोऽपाहरच्छनैः॥ **4.66.12**॥ 2387

स ददर्श ततस्तस्या वृत्तावूरू सुसंहतौ।
स्तनौ च पीनौ सहितौ सुजातं चारु चाननम्॥ **4.66.13**॥ 2388

तां बलादायतश्रोणीं तनुमध्यां यशस्विनीम्।
दृष्ट्वैव शुभसर्वाङ्गीं पवनः काममोहितः॥ **4.66.14**॥ 2389

स तां भुजाभ्यां दीर्घाभ्यां पर्यष्वजत मारुतः।
मन्मथाविष्टसर्वाङ्गो गतात्मा तामनिन्दिताम्॥ **4.66.15**॥ 2390

सा तु तत्रैव सभ्भ्रान्ता सुव्रता वाक्यमब्रवीत्।
एकपत्नीव्रतमिदं को नाशयितुमिच्छति॥ **4.66.16**॥ 2391

अञ्जनाया वचः श्रुत्वा मारुतः प्रत्यभाषत।
न त्वां हिंसामि सुश्रोणि मा भूत् ते मनसो भयम्॥ **4.66.17**॥ 2392

मनसास्मि गतो यत् त्वां परिष्वज्य यशस्विनि।
वीर्यवान् बुद्धिसम्पन्नस्तव पुत्रो भविष्यति॥ **4.66.18**॥ 2393

महासत्त्वो महातेजा महाबलपराक्रमः।
लङ्घने प्लवने चैव भविष्यति मया समः॥ **4.66.19**॥ 2394

एवमुक्ता ततस्तुष्टा जननी ते महाकपे।
गुहायां त्वां महाबाहो प्रजज्ञे प्लवगर्षभ॥ **4.66.20**॥ 2395

अभ्युत्थितं ततः सूर्यं बालो दृष्ट्वा महावने।
फलं चेति जिघृक्षुस्त्वमुत्प्लुत्याभ्युत्पतो दिवम्॥ **4.66.21**॥ 2396

शतानि त्रीणि गत्वाथ योजनानां महाकपे।
तेजसा तस्य निर्धूतो न विषादं गतस्ततः॥ **4.66.22**॥ 2397

त्वामप्युपगतं तूर्णमन्तरिक्षं महाकपे।
क्षिप्तमिन्द्रेण ते वज्रं कोपाविष्टेन तेजसा॥ **4.66.23**॥ 2398

तदा शैलाग्रशिखरे वामो हनुरभज्यत।
ततो हि नामधेयं ते हनुमानिति कीर्तितम्॥ **4.66.24**॥ 2399

ततस्त्वां निहतं दृष्ट्वा वायुर्गन्धवहः स्वयम्।
त्रैलोक्यं भृशसङ्क्रुद्धो न ववौ वै प्रभञ्जनः॥ **4.66.25**॥ 2400

सभ्भ्रान्ताश्च सुराः सर्वे त्रैलोक्ये क्षुभिते सति।
प्रसादयन्ति सङ्क्रुद्धं मारुतं भुवनेश्वराः॥ **4.66.26**॥ 2401

प्रसादिते च पवने ब्रह्मा तुभ्यं वरं ददौ।
अशस्त्रवध्यतां तात समरे सत्यविक्रम॥ **4.66.27**॥ 2402

वज्रस्य च निपातेन विरुजं त्वां समीक्ष्य च।
सहस्रनेत्रः प्रीतात्मा ददौ ते वरमुत्तमम्॥ **4.66.28**॥ 2403

स्वच्छन्दतश्च मरणं तव स्यादिति वै प्रभो।
स त्वं केसरिणः पुत्रः क्षेत्रजो भीमविक्रमः॥ **4.66.29**॥ 2404

मारुतस्यौरसः पुत्रस्तेजसा चापि तत्समः।
त्वं हि वायुसुतो वत्स प्लवने चापि तत्समः॥ **4.66.30**॥ 2405

वयमद्य गतप्राणा भवानस्मासु साम्प्रतम्।
दाक्ष्यविक्रमसम्पन्नः कपिराज इवापरः॥ **4.66.31**॥ 2406

त्रिविक्रमे मया तात सशैलवनकानना।
त्रिःसप्तकृत्वः पृथिवी परिक्रान्ता प्रदक्षिणम्॥ **4.66.32**॥ 2407

तथा चौषधयोऽस्माभिः सञ्चिता देवशासनात्।
निर्मथ्यममृतं याभिस्तदानीं नो महद्बलम्॥ **4.66.33**॥ 2408

स इदानीमहं वृद्धः परिहीनपराक्रमः।
साम्प्रतं कालमस्माकं भवान् सर्वगुणान्वितः॥ **4.66.34**॥ 2409

तद् विजृम्भस्व विक्रान्त प्लवतामुत्तमो ह्यसि।
त्वद्वीर्यं द्रष्टुकामा हि सर्वा वानरवाहिनी॥ **4.66.35**॥ 2410

उत्तिष्ठ हरिशार्दूल लङ्घयस्व महार्णवम्।
परा हि सर्वभूतानां हनुमन् या गतिस्तव॥ **4.66.36**॥ 2411

विषण्णा हरयः सर्वे हनुमन् किमुपेक्षसे।
विक्रमस्व महावेग विष्णुस्त्रीन् विक्रमानिव॥ **4.66.37**॥ 2412

ततः कपीनामृषभेण चोदितः प्रतीतवेगः पवनात्मजः कपिः।
प्रहर्षयंस्तां हरिवीरवाहिनीं चकार रूपं महदात्मनस्तदा॥ **4.66.38**॥ 2413

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
किष्किन्धाकाण्डे षट्षष्टितमः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ सप्तषष्टितमः सर्गः ॥

हनुमता समुद्रं लङ्घयितुमुत्साहस्य प्रकाशनं जाम्बवता तस्य प्रशंसनं वेगेनोत्प्लवनाय हनुमतो महेन्द्रपर्वत आरोहणम्

तं दृष्ट्वा जृम्भमाणं ते क्रमितुं शतयोजनम्।
वेगेनापूर्यमाणं च सहसा वानरोत्तमम्॥ **4.67.1** ॥ 2414

सहसा शोकमुत्सृज्य प्रहर्षेण समन्विताः।
विनेदुस्तुष्टुवुश्चापि हनूमन्तं महाबलम्॥ **4.67.2** ॥ 2415

प्रहृष्टा विस्मिताश्चापि ते वीक्षन्ते समन्ततः।
त्रिविक्रमं कृतोत्साहं नारायणमिव प्रजाः॥ **4.67.3** ॥ 2416

संस्तूयमानो हनुमान् व्यवर्धत महाबलः।
समाविद्ध्य च लाङ्गूलं हर्षाद् बलमुपेयिवान्॥ **4.67.4** ॥ 2417

तस्य संस्तूयमानस्य वृद्धैर्वानरपुङ्गवैः।
तेजसाऽऽपूर्यमाणस्य रूपमासीदनुत्तमम्॥ **4.67.5** ॥ 2418

यथा विजृम्भते सिंहो विवृते गिरिगह्वरे।
मारुतस्यौरसः पुत्रस्तथा सम्प्रति जृम्भते॥ **4.67.6** ॥ 2419

अशोभत मुखं तस्य जृम्भमाणस्य धीमतः।
अम्बरीषोपमं दीप्तं विधूम इव पावकः॥ **4.67.7** ॥ 2420

हरीणामुत्थितो मध्यात् सम्प्रहृष्टतनूरुहः।
अभिवाद्य हरीन् वृद्धान् हनूमानिदमब्रवीत्॥ **4.67.8**॥ 2421

आरुजन् पर्वताग्राणि हुताशनसखोऽनिलः।
बलवानप्रमेयश्च वायुराकाशगोचरः॥ **4.67.9**॥ 2422

तस्याहं शीघ्रवेगस्य शीघ्रगस्य महात्मनः।
मारुतस्यौरसः पुत्रः प्लवनेनास्मि तत्समः॥ **4.67.10**॥ 2423

उत्सहेयं हि विस्तीर्णमालिखन्तमिवाम्बरम्।
मेरुं गिरिमसङ्गेन परिगन्तुं सहस्रशः॥ **4.67.11**॥ 2424

बाहुवेगप्रणुन्नेन सागरेणाहमुत्सहे।
समाप्लावयितुं लोकं सपर्वतनदीह्रदम्॥ **4.67.12**॥ 2425

ममोरुजङ्घावेगेन भविष्यति समुत्थितः।
समुत्थितमहाग्राहः समुद्रो वरुणालयः॥ **4.67.13**॥ 2426

पन्नगाशनमाकाशे पतन्तं पक्षिसेवितम्।
वैनतेयमहं शक्तः परिगन्तुं सहस्रशः॥ **4.67.14**॥ 2427

उदयात् प्रस्थितं वापि ज्वलन्तं रश्मिमालिनम्।
अनस्तमितमादित्यमहं गन्तुं समुत्सहे॥ **4.67.15**॥ 2428

ततो भूमिमसंस्पृष्ट्वा पुनरागन्तुमुत्सहे।
प्रवेगेनैव महता भीमेन प्लवगर्षभाः॥ **4.67.16**॥ 2429

उत्सहेयमतिक्रान्तुं सर्वानाकाशगोचरान्।
सागराञ्शोषयिष्यामि दारयिष्यामि मेदिनीम्॥ **4.67.17**॥ 2430

पर्वतांश्चूर्णयिष्यामि प्लवमानः प्लवङ्गमः।
हरिष्याम्युरुवेगेन प्लवमानो महार्णवम्॥ **4.67.18**॥ 2431

लतानां विविधं पुष्पं पादपानां च सर्वशः।
अनुयास्यति मामद्य प्लवमानं विहायसा॥ **4.67.19**॥ 2432

भविष्यति हि मे पन्थाः स्वातेः पन्था इवाम्बरे।
चरन्तं घोरमाकाशमुत्पतिष्यन्तमेव च॥ **4.67.20**॥ 2433

द्रक्ष्यन्ति निपतन्तं च सर्वभूतानि वानराः।
महामेरुप्रतीकाशं मां द्रक्ष्यध्वं प्लवङ्गमाः॥ **4.67.21**॥ 2434

दिवमावृत्य गच्छन्तं ग्रसमानमिवाम्बरम्।
विधमिष्यामि जीमूतान् कम्पयिष्यामि पर्वतान्।
सागरं शोषयिष्यामि प्लवमानः समाहितः॥ **4.67.22**॥ 2435

वैनतेयस्य वा शक्तिर्मम वा मारुतस्य वा।
ऋते सुपर्णराजानं मारुतं वा महाबलम्।
न तद् भूतं प्रपश्यामि यन्मां प्लुतमनुव्रजेत्॥ **4.67.23**॥ 2436

निमेषान्तरमात्रेण निरालम्बनमम्बरम्।
सहसा निपतिष्यामि घनाद् विद्युदिवोत्थिता॥ **4.67.24**॥ 2437

भविष्यति हि मे रूपं प्लवमानस्य सागरम्।
विष्णोः प्रक्रममाणस्य तदा त्रीन् विक्रमानिव॥ **4.67.25**॥ 2438

बुद्ध्या चाहं प्रपश्यामि मनश्चेष्टा च मे तथा।
अहं द्रक्ष्यामि वैदेहीं प्रमोदध्वं प्लवङ्गमाः॥ **4.67.26**॥ 2439

मारुतस्य समो वेगे गरुडस्य समो जवे।
अयुतं योजनानां तु गमिष्यामीति मे मतिः॥ **4.67.27**॥ 2440

वासवस्य सवज्रस्य ब्रह्मणो वा स्वयम्भुवः।
विक्रम्य सहसा हस्तादमृतं तदिहानये॥ **4.67.28**॥ 2441

लङ्कां वापि समुत्क्षिप्य गच्छेयमिति मे मतिः।
तमेवं वानरश्रेष्ठं गर्जन्तममितप्रभम्॥ **4.67.29**॥ 2442

प्रहृष्टा हरयस्तत्र समुदैक्षन्त विस्मिताः।
तच्चास्य वचनं श्रुत्वा ज्ञातीनां शोकनाशनम्॥ **4.67.30**॥ 2443

उवाच परिसंहृष्टो जाम्बवान् प्लवगेश्वरः।
वीर केसरिणः पुत्र वेगवन् मारुतात्मज॥ **4.67.31**॥ 2444

ज्ञातीनां विपुलः शोकस्त्वया तात प्रणाशितः।
तव कल्याणरुचयः कपिमुख्याः समागताः॥ **4.67.32**॥ 2445

मङ्गलान्यर्थसिद्ध्यर्थं करिष्यन्ति समाहिताः।
ऋषीणां च प्रसादेन कपिवृद्धमतेन च॥ **4.67.33**॥ 2446

गुरूणां च प्रसादेन सम्प्लव त्वं महार्णवम्।
स्थास्यामश्चैकपादेन यावदागमनं तव॥ **4.67.34**॥ 2447

त्वद्गतानि च सर्वेषां जीवनानि वनौकसाम्।
ततश्च हरिशार्दूलस्तानुवाच वनौकसः॥ **4.67.35**॥ 2448

कोऽपि लोके न मे वेगं प्लवने धारयिष्यति।
एतानीह नगस्यास्य शिलासङ्कटशालिनः॥ **4.67.36**॥ 2449

शिखराणि महेन्द्रस्य स्थिराणि च महान्ति च।
येषु वेगं गमिष्यामि महेन्द्रशिखरेष्वहम्॥ **4.67.37**॥ 2450

नानाद्रुमविकीर्णेषु धातुनिष्पन्दशोभिषु।
एतानि मम वेगं हि शिखराणि महान्ति च॥ **4.67.38**॥ 2451

प्लवतो धारयिष्यन्ति योजनानामितः शतम्।
ततस्तु मारुतप्रख्यः स हरिर्मारुतात्मजः।
आरुरोह नगश्रेष्ठं महेन्द्रमरिमर्दनः॥ **4.67.39**॥ 2452

वृतं नानाविधैः पुष्पैर्मृगसेवितशाद्वलम्।
लताकुसुमसम्बाधं नित्यपुष्पफलद्रुमम्॥ **4.67.40**॥ 2453

सिंहशार्दूलसहितं मत्तमातङ्गसेवितम्।
मत्तद्विजगणोद्घुष्टं सलिलोत्पीडसङ्कुलम्॥ **4.67.41**॥ 2454

महद्भिरुच्छ्रितं शृङ्गैर्महेन्द्रं स महाबलः।
विचचार हरिश्रेष्ठो महेन्द्रसमविक्रमः॥ **4.67.42**॥ 2455

पादाभ्यां पीडितस्तेन महाशैलो महात्मना।
ररास सिंहाभिहतो महान् मत्त इव द्विपः॥ **4.67.43**॥ 2456

मुमोच सलिलोत्पीडान् विप्रकीर्णशिलोच्चयः।
वित्रस्तमृगमातङ्गः प्रकम्पितमहाद्रुमः॥ **4.67.44**॥ 2457

नानागन्धर्वमिथुनैः पानसंसर्गकर्कशैः।
उत्पतद्भिर्विहङ्गैश्च विद्याधरगणैरपि॥ **4.67.45**॥ 2458

त्यज्यमानमहासानुः सन्निलीनमहोरगः।
शैलशृङ्गशिलोत्पातस्तदाभूत् स महागिरिः॥ **4.67.46**॥ 2459

निःश्वसद्भिस्तदा तैस्तु भुजगैरर्धनिःसृतैः।
सपताक इवाभाति स तदा धरणीधरः॥ **4.67.47**॥ 2460

ऋषिभिस्त्रासससभ्भ्रान्तैस्त्यज्यमानः शिलोच्चयः।
सीदन् महति कान्तारे सार्थहीन इवाध्वगः॥ **4.67.48**॥ 2461

स वेगवान् वेगसमाहितात्मा
हरिप्रवीरः परवीरहन्ता।
मनः समाधाय महानुभावो
जगाम लङ्कां मनसा मनस्वी॥ **4.67.49**॥ 2462

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
किष्किन्धाकाण्डे सप्तषष्टितमः सर्गः॥